हा ननेत्यतेदं श्ये उपसंख्यानमिति क्ङितो दःस्तावः परावदूसचानिदितामिति नलोपः स्यात् सत्यं। छंदस्त्वात्समाधेयः। क्नितं। चितं। स्तुतं।
सूनुतः।४ म्रुष्टं। डित्। चिनुतः। अस्यात्। निमित्त सप्तमी स्याश्रयणं किं। व्यवहितेपि यथा स्यात्। छिन्नं। भिन्नं। इत्यादिति किं। कामयते। शब्दस्या पाराश्रयणं किं।
लैगवायनः। ओर्गुणो हि इक एव प्रवर्तते। ननु तत्रैकपदे परिस्थितिः। ओदिति निर्दिष्टस्यानिवृत्तौ नू। तद्गुणं। तद्धितकाम्यो रिक्त प्रवृत्त गुणादिति।
ननु क्ङितीति सप्तमी निर्देशात् तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपतिष्ठेत तत्र निः शब्दस्य नेरं तर्ये पेवाद् इश्ये ओ आद् गुण क्रियत्वाद् व्यवहितो
आदितस्य निषेधः स्यात्। ननु भिन्नं छिन्नमित्यादावपीति चेत्। भवेदेवं यदि क्ङितीत्येतन्निषेध्यया क्रियया साक्षात्संबध्येत। इह तु गुणवृद्धि
भ्यां संबध्यते। यस्य च भावेनेति सप्तमी। क्रियां तयाश्रयणा दौत्सर्गिक सत्तारोपः। ततश्च क्ङिति सति प्राप्ते ये गुणवृद्धी इति संबंधेत्। तेन नि
ड्सान्ध्य समभिव्याहार न्यायेनोपलक्षणीभूत सत्ताश्रयस्य निमित्तत्वे मुक्तमार्गतः फलति। न त्विह विशेष्य निमित्ततायां सप्तमी विधानमस्ति।
न चात्र निर्दिष्ट परिभाषा संभवति। विध्यंग भूतानां परिभाषाणां साक्षाद्विधेय निषेध्य क्रियान्वयित्वेन प्रवृत्तेः। इदं तु क्रियान्वयित्वेन विशे
षणं न तु क्रियायाः। अतोऽत्र न परिभाषाप्रवृत्तिः। अन्यथा वृद्धिर्यस्याचामादिरित्यत्रैकपदे भाषोपस्थाने शालीयादिर्न सिध्येत्। न च तत्रैकः
स्थाने वृद्धिः। अतएव तु दोचामात स्थानेऽत्र सूत्रे स्थाने ग्रहणं कृतं। भातः स्थाने योगार्थ इति भगवद्भाष्यमा न विशेषणे आत इत्यस्मिन्न षष्ठी स्या
ने योगे ति परिभाषाया अप्रवृत्तेः। गुणानां च परार्थत्वाद संबंधः समत्वात्स्यादिति न्याया यो घ्यत्रानुसंधेयः। ननु तर्हि नेनेवन्यायेन क्ङितीत्येतत्
प्रधानीभूतया क्रियया संबध्यतां ननु तच्छेषभूताभ्यां गुणवृद्धिभ्यां प्रधानाश्रयस्य संभवतस्याग्गादिति चेन्न। यत्र हि गुणाः कृतास्तत्संस्काराः योगा २
प्रधानोपकाराय समहते प्रभवंति तत्रात्मनोपि संस्कारमनुभूय प्रधानेन संबध्यते। यथा पानीयमेलादिसंस्कृतं पुरुषेण। उक्तंच। गुणाः कृता

स्मर्संस्कारः प्रधानं प्रतिपद्यते । प्रधानस्योपकारे हि तथा भूयसि वर्तते इति । इह गुणवृद्ध्योः क्ङिति ह्रस्वत्वेन विशेषितयोः प्रधानस्य महानुपकारो भवति ।
व्यवहितस्यापि प्रतिषेधसिद्धेः । श्नोः क्ङित्करणं चाग्रहणापत्तेः । अन्यथा प्रधानेनैवान्वये निर्दिष्टपरिभाषया चोपस्थितौ ससांव्यवहिते निषेध
स्याप्रवृत्तौ व्यर्थमेव श्नोः क्ङित्वं स्यात् । तस्माद्यथाव्याख्यातमेव साधु । ननु यदि येन परस्सप्तमीत्वं हि श्चर्त्वे दोषः । ...प्रधानगुणप्रा
मेद्यति चेन्न । अन्तरङ्गत्वादियङुवङ्प्रवृत्तेः । धि धारणे रि पि गतौ तुदादयः धियति रियति पियति । णिश्रिद्रुस्रुभ्यः कर्तरि चङ् । अशिश्रियत् ।
अदुद्रुवत् । असुस्रुवत् । इह तिपमाश्रित्य प्राप्तो गुणो बहिरङ्गः । श्चङाश्रयाविषयङुवङावन्तरङ्गौ । तदुक्तं । श्चङि तस्यान्तरङ्गत्वादिति मृ
जेरजादौ संक्रमे वृद्धिर्वैष्यत इति काशिकायां । इदं चेक्को गुणवृद्धी इति सूत्रे प्रसंगात्कैयटाकरणं तेरमनत्वे नोक्तं भाष्ये । अस्यार्थः । संक्रामतोऽ
पक्रामतो गुणवृद्धी अस्मादिति व्युत्पत्त्या गुणवृद्धिप्रतिषेधनिमित्तं मृतः क्ङित्प्रत्ययोऽत्र संक्रमशब्देनोच्यते योगरूढेः । तेन मृजेरजादिसंक्रम
धात्वंशलोपनिमित्त [illegible] तयावृद्धिप्रतिषेधहेतावप्यच्प्रत्यये नासौ विकल्प्यः प्रवर्तत इत्यवधेयं । अत एव क्ङिति चेति वचनं तत्र भाष्ये कृतं ।
मृजन्ति । मार्जन्ति । अत्र हरदत्तः अचीत्युच्यमाने पिपठिषति विधिस्तदादावल्ग्रहण इति सिद्धे आदिग्रहणं मुख्याजादिग्रहणार्थं । तेन व्यप
देशिवद्भावेनाजादौ प्रत्यये ममृजत्वयाममृजे इत्यादौ न भवतीति तत्रिंसं । मुख्याजादिपरिग्रहे प्रमाणाभावात् । नहि भाष्ये आदिग्रहण
कृतं येन तद्दुक्तार्थो लभ्येत । किन्तु क्ङिति चेति पठितं वचनं । यत्तु ततः प्राग्युक्तं भाष्ये इहान्ये वैयाकरणा मृजेरजादौ संक्रमे विभाषावृद्धि
मारभन्त इति । ननु तदादिपरिभाषाबलल्लब्धवाक्यार्थानुवादमात्रं न तु परकीयविधिवाक्यशरीरमिदं येन तद्युक्तमर्थं ज्ञापयेत् । अत
एवात्रेयो मृजेरिति भिन्नाद्विपाठादङ् । गणपाठादेव वृद्ध्यभावइत्याह । अत एव रक्षितेनापि धातुप्रदीपे [illegible] तुंदपरिमृजस्तुंदपरिमार्ज इत्यु
भयं दर्शितं । दुर्घटवृत्तौ तु तुंदपरिमृज इत्यत्र व्यवस्थितविभाषया वृद्धिर्नेत्युक्तं । अत एव धातुवृत्तिषु रूपं ममृजममार्जेति रूपद्वयमुदाहृतं ।

शु.को.

६ अन्यथा आचिनवं अमार्जमित्यादावपित्वेन सार्वधातुकमपिदिति ङित्वापत्तेः। इह च ज्ञापकं नत्वपीति सूत्रं। ६

यत्तु मुख्याजादि ग्रहणवादिनोपि मते अत्र वृद्धिविकल्पो दुर्वार एव। तथाहि मध्यमपुरुषबहुवचनस्य थस्य परस्मैपदानामिति सूत्रेण विधीयमानो
कारादेशोऽप्यस्य प्राप्नोति। न चैवं विधिवैयर्थ्यं णलादीनां यथासंख्यसंपादनेन चरितार्थत्वादित्याशंक्य भाष्यकार एव द्वैधा संभाधास्यति।
अकार इत्यास्यायमनेकाल्त्वात् सर्वादेशः। यद्वा धातोरित्यधिकाराद्देः परस्येति थकारमात्रस्याकार इति तत्र पक्षद्वयेपि अतो गु
ण इति पररूपस्याचः परस्मिन्निति स्थानिवद्भावान्मुख्याजादित्वमस्त्येवेति वृद्धिर्दुर्वारा दनमि अभमते दूषणमुक्तं तन्न। आद्यन्तवदित्यतिदेशा
द्वस्थानिवद्भावेपि मुख्यत्वाभावस्य मुखचत्वादिति दिक्। स्यादेतत्। अचिनोदमार्ट् इत्यादौ स्थानिवद्भावेन तिपो ङित्वात् क्ङिति चेति गुणवृ
द्धिनिषेधः स्यात्। न चाल्विधित्वात् स्थानिवद्भावासंभवः। अनुबन्धकार्येष्वनल्विधाविति निषेधस्याप्रवृत्तेः। अन्यथा ल्यपः कित्वाभावादे
वइत्वाप्राप्तौ कित्त्वनिषेधार्थेनत्सूत्रेण। यत्तु सार्वधातुकमपिदिति अपिद्वचनं ज्ञापकमिति तन्न। शृणोति हि विश्वतः प्रतीत्यादौ स्थानेऽन्तरतमपरिभाषया
स्या पित्वादनुदात्तौ सिपः स्थाने अनुदात्तस्यैव हेः प्राप्तौ उदात्तसंपादनेन चरितार्थत्वात्। अपित्वसामर्थ्याद्धि तत्रान्तरतमपरिभाषा बाध्यते।
प्रतिपत्तिलाघवार्थमुदात्त इति वक्तव्ये अपिद्वचनं ज्ञापकमिति वास्तु। न्यायसिद्धोप्ययमर्थः। अनुबन्धानामनेकान्तत्वेन स्थानिवद्भावप्रवि ने ५
ष्टतया स्थान्यलाश्रयविधिविषयकस्यानल्विधाविति निषेधस्याप्रवृत्तेः। अनुबन्धा एकान्ता इति मतेपि स्थानिवत्प्रतीतेः प्रागेवान्तरङ्गेण
लोपेन तेषामपहारात्। तस्माल्लुङ्लङाद्यादेशानां तिबादीनां स्थानिवद्भावेन ङित्वं दुर्वारमिति। अत्राहुः। यासुट् परस्मैपदेषूदात्तो ङिच्च वचनं ज्ञा स्त्रे ४
पकं लादेशानां स्थानिवद्भावेन ङित्वं न भवतीति। तथा च वार्तिकं। लकारस्य ङित्वादादेशेषु स्थानिवद्भावप्रसङ्ग इति चेत् यासुटो ङिद्वचनात् सि
द्धमिति। ननु स्तु यादित्यादौ अनित्यलक्षणवृद्धिप्रतिषेधार्थं चिनुयुरित्यादौ गुणनिषेधार्थं च यासुटो ङित्वमस्तु। उतो वृद्धिर्लुकि हलि
सूत्रे हि उत इति निर्दिष्टस्थानिवद्भावरूपपरिभाषा नोपतिष्ठते गुणनिषेधेति तु क्ङिति चेत्यस्यापवाद एव। तथा च स्थानिवद्भावेन लब्धं ङित्वं स्तु याच्च

ऽधुरित्यादौ च वृद्धिगुणौ निषेद्धुं नालं। पुनर्ङित्त्वस्यासमर्थत्वाद्दुःभय निषेधो भविष्यति। तथा च गुणवृद्धिनिषेधे चरितार्थं यासुटो ङित्त्वं व्यर्थं तद्वादेशो पुनरपि
यङित्त्वस्य विरहं ज्ञापयेदिति चेत्। उच्यते। उत औदिति वक्तव्ये वृद्धिमहत्त्वसंज्ञापूर्वको विधिरनित्यो यथा स्यादित्येवमर्थं। तेन स्तुयादित्यत्र न वृद्धिः।
तथा चिनुयुरित्यत्र न गुणः। क्वसस्याचीत्यतोऽचीत्यनुवर्त्य अजादौ गुणसिगुणविधानात् भिदेर्गुणो गुणसिचेत्यकारं प्रश्लिष्य अ आत्सातुस्तूवेतिकृतम्
धारया श्रयतो न अजादौ गुसिगुणविधानाश्रयणोऽतु च कुर्वन्तु रित्यादावति प्रसंगः। गुणो विन्दुमविभक्ति कं उरुसीति वच्छेदः उकारादौ गुसीतिवा
र्थः। गुसिगुणो यासुट प्रतिषेधइति वार्तिकमपि उक्तरीत्या सिद्धार्थकं भवनपरमिति तावद्वार्तिककारस्य हृदयं। भाष्यकारमते तु सार्वधातुकमपि
दि५ दितिसूत्रे अपिदिति यो गाविभज्य ङिति चानुवर्त्य आर्त्तिचाश्रित्य ङिरपित् भवति पिच्च ङिन्न भवतीति वाक्यार्थ इयं वर्ण्यते। दृंदं चहलः श्रइतिसूत्रे
भाष्ये स्पष्टं। तेन श्रूतादित्यत्र श्रुवइत्यूत्। तातङ ओपदेशिकङित्त्वेनातङ्गोगुणादिदेशिकस्य वहिरंगस्य पित्त्वस्य बाधात्। अतिदिष्टादुपदिष्टं ब
लीय इति न्यायात्। अचिनोदित्यादौ औपदेशिकेन तिवादीनां पित्त्वेनाश्रय मातिदेशिकं ङित्त्वं बाध्यते। तेन गुणः सिद्धिः। अस्मिं
न६ अपक्षे यासुटो ङित्त्वं न ज्ञापकं किंतु स्यादित्यादावप्राप्तङित्त्वविधायकं। तेन च पित्त्वस्य चिनोतीत्यादौ सार्वधातुकस्य बाधः। अ
तः स्तुयादित्यादौ पित्त्वे हलीति विधीयमानाच्छ्रूर्नप्रवर्तते। चिनुयुरित्यादौ प्रागेव देवसमर्थनीयं। एवं हि तवार्तिकमते तु श्रूतादित्यत्र इतुप्रा तु५
प्नोति आगमशास्त्रमनित्यमिति तु कथं चिद्साधेयः। चक्षुतः हलः अः श्नानस्थानविति श्नानचः श्लिकरतो न कचिदनुबंधकार्येष्वनल्विध
धाविति निषेधः प्रवर्तत इति ज्ञाप्यते। तेन श्रूतादित्यादौ न कश्चिद्दोष इति। अतः तव भाष्यमते भवि सीदेत्यत्र ङित्त्वं नांकदिरुपमा लोपस्त्रो गित् दृ
श्यता छिन्नस्लोश्च ऊपूनेतिदिक्॥ दीधीवेवीटां॥ दीधीवेव्योरिट्श्च गुणवृद्धी न स्तः। आदीध्यनं। आदीध्यकः। आवेव्यनं। आवेव्य
कः। अकणिषं। अरणिषं। कणिता श्वोरणिता श्वः। इह अमंप्रतिसिसं तमंनतिपो ऽदेशं प्रतिनुकणितइतितां तमंनातस्य अभंडादेशं च

सार्वधातुकं निमित्तीकृत्य लघूपधगुणः प्राप्तो नेन निषिध्यते । दरिद्रस्तु दृढो न संभवत्येव । लुङि ततां स्फोरयितुं अद्युस इस्य प्रयोगः । न हि तुजं तेन तन्नं ते वा इहे
गुणप्राप्तिः । प्रत्ययावयवत्वात् तस्य । अथ दीङ् क्षये धीङ् अनादरे । वेञ्जतंतु संताने । वी गत्यादिषु । एतेषां मिह ग्रहणं कुतो नेति चेन्न । अवयवप्रसिद्ध्यपे
क्षया समुदायप्रसिद्धेर्बलवत्त्वात् । किं च वकुलेर्ग्रहणे अभिप्रेते संदेहार्थं दीवेधीवीटामित्येव ब्रूयात् । इदं चात्र आगमएवग्रहणे तेन लुङ्ग ... ग
तावित्यैति धातुः । ननु धातुसाहचर्याद्धातुरेव गृह्यतां । मैवं । साहचर्यस्य सर्वत्रानियामकत्वात् । अन्यथा हि स्त्रियाः तु द्रितिचलोर्थे इति सत्रेऽकूलोर्थग्र
हणं न कुर्यात् । हि स्त्रियि इति सुजन्ताभ्यां साहचर्येण तनुविष्यस्यापि सुजन्तस्य ग्रहणसंभवात् । अत एवागमापेक्षया पठ्यते न ध्यायितिव्या द्विधाडः पर्वनिपा
तः सत्रेऽकृतः । इदो पिधातुर्नैतु प्रकृतित्वोविशेषणम्भावृतरलो ते स्ये न पूर्वनिपातः स्यात् । अत्रेदमवधेयं । दाध्वको वेश्यघइतिपदुत्तरहूं तेन तदू
दाधावेवीभ्यां शुद्धभ्यामेव लघुलिङ्रूपं न तु एं पतभ्यामपि । पनुर्षीवर्णयोरितिसूत्रेहरदत्तेनोक्तः वर्णशब्दो ... वर्णविक्लारे इति धातोः पचाद्यजन्तः ।
अयमालेएवइवर्णयथास्यात् । नुमितामभूदिवमर्थः तेन एंपताभ्यां लघुलिति लोपस्य पूर्वविधौ स्थानिवत्त्वेपि अयमालेलोभावाङ्गोपाभावे
पतिरुतेदाध्ववोवेश्यघइत्येवशुद्धेनसमांकारं रूपं भवतीति । तदेतन्माहेशापिशादत्तामित्यविलिङ्गंत्यत्रे भाष्यकारैरेव एंपतस्यदाधपइतिकू
पंशुद्धस्य तु दाधकइतिव्युत्पादितत्वादुपेक्ष्यं । तत्र हि वर्णग्रहणं तु मत्पीवर्णयथा स्यादित्येवमर्थमिति शांक्य स्थानिवद्भावेन सिद्धं रं तरंगत्वा लि
लोपात्प्राकूर्पीवर्णयोरितिऔपसिद्धेअवर्णग्रहणं प्रत्याख्यातं । ननु वर्णग्रहणं कुर्वतः सूत्रकारस्याशयं भाष्यकारो ज्ञाद् न्यमेवाश्रि
सञ्ञ मइतिचेत्सत्यं । तथापि यथोत्तरं मुनीनां प्रामाण्यादृष्टा ... द्धिशु स्तदवस्थैवेति दिक् । स्यादेतत् । दाधावेव्योडिन्त्वात् क्ङितिचेतिसू
त्रेणैव निषेधो स्तु किमिह दीधीवेवी ग्रहणेन । मैवं । इग्लक्षणयोर्हि सति निषेध इत्युक्तं । न च अचो ञ्णितीति वृद्धिरिङ्लक्षणा । किं च कार्यि
णो निमित्तत्वे पर्वेण सिद्धिः संभवेदपि । न च कार्यी निमित्ततया श्रीयते । च्यवते प्लवते इत्यादावपि गुणनि ... षेधापत्तेः । अत्र च लिङ्गं
कुटादिमध्ये कुङ् शब्दे इत्यस्य पाठः स्यं डित्वाय यितर्ताति निर्देशश्च । पनु प्रकृतसूत्रेदाधावेव्यो ग्रहणं मैत्रस्य दि भाषाज्ञापकमिति त
वै१

न १ नः। अनिल्लक्षणत्वाद् द्विर्निषेधेन च चरितार्थत्वात्। भाष्यकारेण तस्य प्रत्याख्यास्यमानत्वाच्च परिभाषायां लिङ्गं तत्र स्थानिवद्भावानुसर्तव्यत्वाच्च। स्यादेतत्।
यदि कार्यनिमित्तत्वेन नाश्रीयते। कथं तर्हि दुर्लुन विषतीत्यत्र द्विर्वचनेऽचीति नुशब्दस्य द्वित्वं। इषद्रसस्याज्ञादित्वेऽपि द्वित्वं प्रतिषेधात् पि मध्ये प्रविष्ट
तयानिमित्तत्वासंभवात्। सन्यङोरिति षष्ठीमाश्रित्य सन्नन्तस्य द्वित्वविधानात्। अन्यथा प्रतीषिषतीति सनो द्वित्वं न स्यात्। यत्तु सन्यङो
रिति सप्तम्याश्रयणे विसन्यङोरकारे आरत्वसामर्थ्यात् द्वित्वं भविष्यतीति तन्न। दिद्रसिषितादिष्वोपदेशत्वात् प्रतिबंधेन अजादेरिति पद
स्योत्पादनेन चाकारे आरत्वस्य चरितार्थत्वात्। अन्यथा दिदिषतीत्यादावपि व्याप्तेश्च। यदि हि तत्रापि स्थानिवत्त्वात् ईडसो द्विर्वचनेऽ
तेऽ ीषतीति स्यात्। अत्रोच्यते। कार्यमनुभवन्नेव कार्यी निमित्ततया नाश्रीयत इति परिभाषार्थः। अदिदिषतीत्यत्र हि अजादेर्द्विती
यस्येति दिसशब्दे द्वित्वप्रवृत्तिः। तदन्तर्गतश्च इस्शब्द इति नासौ द्वित्वं प्रति निमित्तं कार्यभाक्त्वात्। दुर्लुन विषतीत्यत्र तु नुशब्दस्य
द्वित्वं प्राप्तं तदन्तर्गतश्च इस्शब्द इति भवत्येव निमित्तं तत्र भावितामात्रेऽनाह निमित्ततेति सन्यङोरिति सूत्रे भाष्यकारेणैव स्फुटीकृत
त्वात्। तथा च द्विर्वचनेऽचीति स्थानिवद्भावान्नुशब्दस्य द्वित्वमुचितमेव। यत्तु द्विर्वचनेऽचीति सूत्रे अचि किं जेघ्रीयते देध्मीयते इति प्रा
योमस्तु दाहरणं तेदव्याप्रातत। घ्रीयृध्मी यङस्य द्वित्वभाक्त्वात् घ्राध्मोर्ङि ईत्वं प्रति निमित्तमतस्य यङो द्वित्वं प्रति अनिमित्तत्वा
त्। तस्मान्नत्र अचीस्य भविष्यति जेदस्येत देवव्यावर्त्यं बोध्यं। गाङ्कुटादीति द्विलकारक निर्देशमाश्रित्य सन्वत्स्याप्यामेव गाङो देश
विधानात्। अत्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्येति तत्र संवार्तिकमपि अपि जगेदस्येत स्मिन्नुदाहरणे कार्यातिदेशाश्रयणे अनूरु
हणस्यवैयर्थ्यं स्यादित्येव योऽयमिति दिक्। यत्तु अतिदेशवत् सूत्रे वक्ष्यते अत्र ग्रहणं समानाश्रयप्रतिपत्त्यर्थमिति तत्र आश्रयत्वं स्या

४ नितयानिमित्ततयावाक्यं चित्रा अयमा चेलान तु निमित्ततये वेत्सान्तहः। तेन भूताहाविनिशाभावो हे ऽपि लेव कर्तव्ये असिद्धो भवति। अन्यथापि लोहेः
कार्यितयानिमित्तत्वाभावाद सिद्धत्वं न स्यात्। अत एव समानाश्रयमाभीयमाभीये असिद्धमित्येवाहुर्न तु समाननिमित्तमिति। इदं च सू
त्रं भाष्यवार्तिकयोः प्रत्याख्यातं। तथा हि दीधी वेव्यो छंदसो धातत्वन तु लोके प्रयोगार्हौ। छंदसि चानयोर्गुणो दृश्यते। हे आयं तत ऋपयन्नदीधेत्। अदी
धयुरश्विना इव तासट्यादौ। न चायं बाहुलकं न समाधेयः। तथा सति निषेधसूत्रारंभस्यैवलाघवेनोचितत्वात्। तथा इटो पि तरह लोव्यर्थं। आर्ध ना ४
ने ५ धातुकस्येडित्यत्राद्यि ड्वधिकृतीतिस्त्रादिड्ग्रहणमनुवर्तते। तत्र इटो विकारा भावार्थं। इटू इडेव न तु विकृतेत्यि ति व्याख्यानात्। ततो ल य ५
दि।८ घुपधगुणाभावासिद्धं कुलिताद्रवोरलिनाद्भवद्दे त्योन चैवं पिपठीरित्यत्र दीर्घो न स्यादिति वाच्यं। नियमस्य सिद्धत्वात्। अपाठीसेदित्यत्र स्व
लोदीर्घस्तु न वार्यते सिचो ऽप्रत्यादेशो सिद्धो वाच्य इति शापकात्। यद्वा अंगाधिकारे क्वियमा लो नियम अंगमेव विकारं [redacted] व्यावर्तय
ति तेन वो रिति मकः सवर्णदीर्घ इति च दीर्घो भवत्येव। यद्वातेस्यत्र तु महोलिटीत्याद्यं मस्मामर्थ्याद्दीर्घो भवत्येव। इदं च वक्ष्यते। पिपठी
षि आखुलकुमार ति इत्यत्र सांतमहतः संयोगस्येति दीर्घो न स्यात्। सिद्धत्वादंगलक्षणे ओंसी स्यादौ चरितार्थत्वाच्च। पिपठीरपाठी इत्यते
त्यादिप्रयोगेष्वैतस्मात्तोऽस्यवैलक्षण्यादिति। अत्राहुः। पिपठी पीतिप्रयोगो साधुरेव। नह्यत्र नुमागमो लभ्यते। अल्लोपस्य स्थानिवद्भावेनास
जंतत्वात्। न चैवमप्यजंतत्वमयुक्तो नुम् स्यादेवेति वाच्यं। तस्य सकाराद्युत्तरत्र प्रसक्त्या दीर्घस्य तथा पद्धतेः। सांत संयोगाभावात्। वस्तु प ४
तस्तु भजंतत्वमयुक्तो नुमत्र न भवत्येव। स्थानिवद्भावासंभवात्। अनादिष्टादचः पूर्वस्य विधौ हि सः। न चाजंतमनादिष्टादचः पूर्वस्ये
नतस्य नुमि कर्तव्ये ऽल्लोपः स्थानिवत्स्यात्। न नुपजंतत्वमयुक्तोऽदुर्वाह इः। न च तस्मिन्कर्तव्ये स्थानिवद्भावः पूर्वस्य। धौ नुमंत स्थानिव
दिति निषेधात्। अन्यथा सरवीयतेः क्विपि सरवीः सुतीयतेः सुतीरित्यादि न स्यात्। अल्लोपस्य स्थानिवद्भावेन यणादेशाप्रसंगात्। अत्रो

यते। षिलुगुपधात्वचट्परनिर्ह्रासकुसेषु उपसंख्यानमिति तावद्वार्तिकशरीरं। तत्र धात्वंशस्यैव यद्यपि द्वैधा व्याख्यायते क्रोष्टुनं स्यान्निवर्द्दति। क्रौष्टिविधिं
तिनस्थानि विवर्द्दितिच। देश्यते: षिविद्युत्सिष्यादेरन्यतरथ्याख्यानाश्रयणेन सिद्धत्वविसर्जनीयते: ष्ठदीरिस्तस्या यथ्याख्यानं विनाऽसिद्धेः। स स्थ्या १
वमाचक्षाणोलोहिस्थस्यद्विप्रेतीव्याख्याने विनाऽसिद्धेश्च। तथाविधौ विधिं प्रतीति द्वितीयव्याख्याने वेसैस्त्तार्वत्रिकं। क्रौष्टुमनिति तु धातो
र्वं। स्यात्स्यादिसूत्रमपर्यंतस्येसूत्रचभाष्यादौ अश्विं तेन तु सार्वत्रिकं। अत्र चेडूहलप्रत्याख्यानपरमत्रत्यं भाष्यमेव प्रमाणं। कथमन्यथा विप ग्र ४
ठीपी सादो दीर्घस्येषेत्सूत्रीसाचतर्लूमेइदूस्यहलं प्रत्याचक्षीत। तस्मात्ते पिपठिषिभाष्यलोकुर्वनी स्वेवं रूपंभवतीति स्थितं ॥ हलोऽनंतराः
संयोगः॥ अभिरव्यवहिताहलः संयोगसंज्ञास्युः। संज्ञाप्रदेशाः संयोगांतस्यलोपइत्येवमादयः। इह इतरेतराश्रयेत्वद्विद्रुग्वाचिनावहुव्रीहौ निश्र
षिद्रुइत्सर्व्वज्ञमादवग्रहे संशयानभाव्यं। आधेयप्रधानेनां तरेसव्ययेन सह बहुव्रीहौ आधेयनिषेधप्रतीतेरवग्रहे पि भाव्यमेव संशयान
हितत्रांतरामध्योऽक्कंचिदस्तिकिंतुमध्यमात्रंवर्तते। मात्राहृस्वत्वावदवग्रहां तरमितिप्रातिशाख्यवलेनतत्र मात्राकालाववसानाभ्युपगमा तु १
त। यत्तुप्रातिशाख्यांतरं अर्धमात्रोवग्रहइतितत्तु सर्वत्रसंहितायां अर्धमात्राकालस्य सत्त्वात्तत्तोतिरिक्तोर्धमात्राकालोवग्रहोस्तीत्ये
वंपरं अतःप्रातिशाख्ययोरविरोधः। तदिहकतरःपक्षोग्राह्यइतिचेत्। उभयथापदेषइतिभाष्यकाराः। ननु वक्ष्यइत्यादेौसत्त्वं संयो
गसंज्ञायां संयोगगुर्विति गुरुत्वात् गुरोरनंतइति प्लुतेनभाव्यं। नत्वन्यथेतिमहान् फलेविशेषः। तत्कथं पक्षद्वयाभ्युपगमइतिचे
न्न। अक्षुइत्यस्याधिकरणल्ट्‌नेहइत्यत्र संबंधाभावात्। विचार्यमाणेनानिमित्तादौ तु वाक्यस्य टेरित्यनुवर्ततेनतुगुरोरनंतइति। न
प २ नक्षुभवोऽक्ष्यः दिगादिषु पाठो यते। अपोयोनिमिनतुषु चेतिसप्तम्याऽलुक्। ततःसंबुद्धौहे अक्ष्योऽत्र स्यादवप्लुतमेदइतिचेत्।
अत्राह:। नैवंविधेविषये अवग्रहंपदकाराःकुर्वंति। अत्र च संप्रदायएववशरणमितिबोध्यं। पुनर्वचैतत्। गोन्योगातुंगोभिर्मदायचि

9 यइ इत्याया त्वकाइन्यके इत्यादौ गोभ्यो गोभिः इत्यत्र काइत्यादौ नांसस्य पिपदत्वे अवग्रहाच्चरणात् इयिवांसमिति क्विध इत्यादौ इयिवांसमिति विना
पिपदसंज्ञां च स्तोः पूर्वभिज्ञागमांतेऽवग्रहकरणं च। एतेन सिसासन् उक्थशसः शिरिष इत्यादौ पदकाले सत्वह्रस्वत्वादयोऽपि व्याख्याताः
पत्नुमानो महां तमिति मंत्रे वेदभाष्यकारैरुक्तं छांदसः पदकालीनो ह्रस्व इति तदपि संप्रदायमात्रपरतया कथंचिन्नेयं। न त्वक्षरलोपेन पद
कारा इति भाष्ये पदविभागः पौरुषेय इति कैयटादिभिरुक्तत्वादिति दिक्। कथं तर्हि तत्र तत्रावग्रहे विशेष उच्यते इति चेत्। अवांतरपद
त्वे सत्यवग्रहः क्रियत इत्युत्सर्गमभिप्रेत्येति गृहाण। अप्सु यो निर्वा अश्व इत्यादावपि सुशब्दात् पूर्वं नास्त्यवग्रहः। अवांतरपदसंज्ञाने
कृत्वे उत्तरकालप्रवृत्तित्वात् याऽवग्रह इति वैदिकसंप्रदायात्। अत एव मधुरसेन भिरिस्य च भिसः पूर्वमवग्रहः न भ उत्तिभिरित्यत्रा
पीवं। इंद्रमणः पुर एते वेत्यत्र च वशाब्दात् प्रागिति दिक्। महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थं संपृश्यंतेऽस्मिन् समुदाये वर्णा इ
ति। तेनात्र समुदाये वाक्यपरिसमाप्तिर्न तु प्रत्येकं ह्यादिसंज्ञावत्प्रत्येकं। तथा सति तिर्यगादि इत्यादौ यकारः संयोग इति वान्यस्य
संयोगादेरित्येत्वं स्यात्। सिद्धांते तु भवो रहाभ्यामिति द्वित्वे सत्यपि तस्यासिद्धतया तिर्यगादि इत्यादावेत्वं न भवति। किं च प्रत्येकं संयोग
संज्ञेति पक्षे संहृषीष्ट इत्यत्र ऋतश्च संयोगादेरितीट् स्यात्। संस्क्रियत इत्यत्र गुणोऽपि संयोगाद्यो रिति गुणः स्यात्। दृषत् करोति इत्यत्र
ककारसंनिधौ तकारस्य संयोगांतस्य संयोगांतलोपः स्यात्। शास्त्रासिद्धत्वात्र स्कलितकारे परतः स्कोरिति लोपः स्यात्। तिर्यगित्यादौ सं
योगादेरातो धातोर्मण्वत इति निष्ठानत्वं स्यात्। जातौ वेदं बहुवचनं हल इति। जात्याख्यायामेकस्मिन्निति वचनात्। तेन द्वयोरपि सं
योगसंज्ञा भवति। अतः शि क्षेत्यादौ गुरोश्च हल इत्यै प्रत्ययः सिध्यति। यत्र तु बहवो हलः संश्लिष्टास्तत्र द्वयोर्बहूनां वाऽविशेषेणासं

सां। न चैकाच् द्विर्वचनन्यायेन समुदायस्यैव स्यात् इति वाच्यं। वैषम्यात्। तथा हि। द्विर्वचनं समुदायावयवैकाचोर्युगपद्वक्तुमशक्यं संस्तातुश
क्यात्। तथा समुदाये द्विरुक्ते अवयवा अपि द्विरुक्ता भवंति। वृक्षः प्रचलन् सहावयवैः प्रचलतीति न्यायात्। इह तु समुदाये प्रवर्तमाना संयोग
संज्ञया नावयवानां तत्कार्यसिद्धिः। अतोऽविशेषेण द्वयोर्बहूनां च संज्ञे ति स्थितं। यदि तु बहूनामेव स्यात्तर्हि संस्वर्यत इत्यत्र गुणोऽर्तिसंयो
गाद्योरिति गुणो न स्यात्। गोमान् प्रियोऽस्य? इत्यत्र संयोगान्तलोपो न स्यात्। निर्ग्लान इत्यादौ निष्ठानत्वं न स्यात् इति दिक्। ननु यदि द्वयोरपि सं
ज्ञा तर्हि इंद्रीयतेः सनि इंदिद्रीयिषतीति न स्यात्। इह हि संयोगौ द्वौ। नदोर्दरौ च। तत्र नकारस्यैव दकारस्यापि नन्द्रा इति द्वित्वनिषेधः प्राप्नोति।
नैष दोषः। तत्र हि अजादेरित्यनुवर्तते सा च कर्मधारयात्सप्तमी। तेनादेरचः परा नदराः संयोगादयो न द्विरुच्यंते इति सूत्रार्थः। एवं च पूर्व
सूत्रे द्वितीयस्येति न कर्तव्यमेवेति वक्ष्यते। हलः किं। तितउच्छं। अत्र तनोतेर्डुः सन्वच्चेति डुप्रत्ययः सन्वद्भावात् द्वित्वं। सन्ध्यक्षरे तीत्वं च।
व्यस्तोच्चारणसामर्थ्याद्गुणाभावः। यदि हि अचोरप्यनंतरयोः संयोगसंज्ञा स्यात्। तर्हि संयोगांतस्येति सकारलोपः स्यात्। अनंतरा इ
ति किं। पनसम्। यदि हि सकारमकारयोः संयोगसंज्ञा स्यात् तर्हि स्कोरिति सूत्रेण सलोपः स्यादिति दिक्॥ मुखनासिकावचनोऽनुना
सिकः॥ मुखसहिता नासिका मुखनासिका तयोच्चार्यमाणोऽनुनासिकसंज्ञः स्यात्। संज्ञाप्रदेशा आङोऽनुनासिकश्छंदसीत्यादयः।

अभ्र आँ अपो ... । गभीर आँ उग्रपुत्रे। इह उच्यते इति वचनः। कृत्यल्युटो बहुलमिति बाहुलकात्कर्मणि ल्युट्। राजभोजनाः शाल्यय
यो २ इति वदितिव्यसन्नसादिनः। भाष्य ... कैयटौ स्तु। उच्यतेऽनेनेति वचनं। करणे ल्युट्। सामान्येन पुंस्त्वं। शक्यं चक्षुरुपहंतुमितिवत्।
तेन तुल्यं क्रिया चेद्वतिः। संस्कृतं भक्षा इति वत्। इदं च विशेषणानां चाजातेरिति सूत्रे वक्ष्यमाणेन पदसंस्कारपक्षे गुणवचनानामितिस्था

शा०को०

ऊष्मसंज्ञकशकारस्थानीयस्य शश्च्योरिति द्विकारस्य यमवारणाय प्रवृत्ते इत्यर्थः

10 दिशा च निवृत्ति स्वनेन सह यथा न विरुध्यते तथा तत्रैव वक्ष्यामः। ततो मुखनासिकावचनो यस्येति बहुव्रीहिः। मुखेति किं। यमानुस्वारयोर्मा भूदिति भा
ष्ये। तत्र वर्गाद्यादि तथा तुरीयं पंचमे परे तन्मध्ये पूर्ववर्णसमानाकारं वर्णान्तरं प्रातिशाख्ये आगमत्वेन विहितं तद्यमसंज्ञं। यमश्च यमः। यमो हि द्वितीये
प्रायेण समानाकारो भवतः। यथा पलिक्नीः चख्नतुः अग्निः अघ्घ्नत् इत्यत्र ककारादय इत्येष्यः परभागो मात्रार्द्ध शो यमाग्गमः। यत्र नं विवरणे वर्णपं तं ७
तं ८ चमयुक्ताः प्रथमादयो यमा इति तन्निवृत्त्यर्थं। अयोगवाहप्रतिपादके नह यवरा सूत्रस्य भाष्येण सह विरोधात्। केवलनासिक्यत्वपरेण यमानुस्वारा
णामेवेति भाष्येण सह विरोधाच्च। अथेदं भाष्यं न केवलं नासिक्यत्वपरं किंतु ओं इत्यादीनां भागमात्रं नासिक्यं। यमानुस्वारानां तु मुखे नासिक्य
त्वे विप्राप्ते सावकाशा सिध्यायेन नासिक्यत्वमप्यस्ति न तु तदीयं भागमात्रं तथैवैतं परं। तथापि आदितश्चतुर्णां तदसंभवात्। किं चैवं नैव क्षेपो न प्रयोज
१ विरोधः। नमिति तद्दूषकभाष्यग्रंथः। यदुक्तं तीस्यादौ यमे तु नासिका इत्यस्य प्रवृत्त्यापत्त्या तत्पक्षे दोषस्योद्धृतत्वात्। अत एव प्रातिशाख्ये - स्पर्शा यमाननुनासि
काः स्वान् परेषु स्पर्शेष्वनुनासिकेषु इति सूत्रस्य प्रदेपुवत् भ्रमं श्रुति तत्र यमं निषेधुमारभ्यं न स्वप्रसंयोगप्रकृतेः परस्तात् यमापत्तिमिति सूत्रे परस्ता
च्छूत्रयुक्तः यमः प्रकृत्यैव सदृक् श्रुतिर्वा यमेन मुख्यास्ति समानकालेत्यादि सूत्रोतरे विपिस्पष्टमेव यमस्य वर्णान्तरत्वं। तथा च नारदीयशिक्षा
यामपि। अनंत्यश्च भवेत्पूर्वो त्यंतश्च परतो यदि। तत्र मध्ये यमस्तिष्ठेत् सवर्णः पूर्ववर्णयोः। सवर्णः सदृशः। अत एव वर्णयोरिति द्वित्वमवि
अनचि चेति द्वित्वेन वक्षितं पश्च इत्यादौ जकारद्वयसत्वे विभ्रमया अत्रैव सवो रं तदेवाद्ध इत्यादौ जकारद्वयाभावादिति व्याख्यातारः। तथा कल्कं तत्र व्याकरणस्य स्वधा
दे पवलक्षणस्य प्रणेता औदव्रजिः ... प्यसूत्रयत्। अनंत्यासंयोगे मध्ये यमः पूर्वस्य गुण इति। पूर्वस्य गुण इत्यस्य पूर्वस्य भक्त इत्यर्थः। एतेना
गमत्वेऽस्फुरीकरोति। तथा संयोग श्लंखव्याख्यायां गौतमशिक्षायामपि। अथ चतुर्यमलक्षणमुदाहरणं सयमायमाभ्यां यमास्ताव यथा जिं
अनचि चेति द्वित्वेन रिति हौर्गकादौ यमनकारो। यज्ञ इति हैर्जकादौ यम भकारादित्यादि। तथा तत्रैव तंत्रारंभे। अयस्पिंडो यथा क्षिप्तं पिंडश्चेति त्रेधा संयोगं विभ
ज्य यमसहितमयःपिंडमित्युक्त्वा अंतस्य यमसंयोगो विशेषोपलभ्यते। अशरीरं यमं प्राहुः अंतःस्थः पिंडनाय इत्युक्तं। अंतस्थो वर्णपंचमः। अ
शरीरमिति स्वरभक्त्यादिवत् व्यंजकलिपि विशेषशून्यमित्यर्थः। लक्षणावशेनैव तदीयस्य लिपिविशेषानिश्चयसंभवाल्लिपिसंप्रदायप्रवर्तकाचा

यैः स्वरभक्तेर्विषयमस्यापि व्यंजनाद्भिन्नतालिपिर्न कल्प्यते इत्यर्थः । रलयोरूष्मणि परे मध्ये स्वरभक्तिरिति हि प्रसिद्धं शिक्षादौ । यत्र तु भेदं विधेन लक्ष्यते
न स्पृष्टावधारणं कर्तुं शक्यते तत्रास्यालिपिर्नतरां प्रवर्तितं यथा विसर्गादौ । पाणिनीयशिक्षायामपि । त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः संभवतो मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा । स्वरा विंशतिरेकश्च स्पर्शानां पंचविंशतिः । यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः । अनुस्वा
रो विसर्गश्च ᳵकᳶपौ चापि पराश्रितौ । दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च । अत्र हि यमानां पृथग्गणनात् स्वपक्षमेव वर्णांतरत्वं । गणनामित्थं ।
अ इ उ ऋ इति चतुर्णां ह्रस्वदीर्घप्लुतभेदात् त्रैविध्ये द्वादश ऌकार एकः । ए ओ ऐ औ दीर्घप्लुतभेदादष्टौ इत्थं स्वरा एकविंशतिः । य र ल व श ष स हेत्यष्टौ य
माश्चत्वारः । प्रथमयमद्वितीययमादिभेदेन विभजनात् । अत एव कुं खुं गुं घुं इति यमचतुष्टयं व्याख्यातारो वदंति । क च ट त पाः कुः ख छ ठ थ फाः
खुरित्यादिपरिभाषाभाषितस्य ततदुत्तरस्याशरीरस्यापि कथंचित्प्रदर्शनितात्पर्यकं चेदमिति ध्येयं । अनुस्वारविसर्गᳵकᳶपाश्चत्वारः । दुःस्पृष्ट
श्च ळ्हः वानां प्रसिद्धः । ईषे वोढ्वे ति । इत्थं त्रिषष्टिः । ऌकारस्य प्लुतसंभवात्तेन सह चतुःषष्टिः । तदेतद्दुष्टं संभवतद्वितिह यवरट् सूत्रे क्षीरो
दकारोऽप्याह । वर्गांत्येन स्यात् परे तयोर्मध्यवर्तीनासिक्यस्थानो यम इति । यत्तु कश्चिदाह । यमा आदेशाः । न च ते षामानुनासिक्यपक्षे तत्र स्तद्
पंक्तौ स्यादेव सानुनासिकद्वित्वस्यानुनासिकादेशपक्षस्यात्रैवाद्योऽप्रयोजनमिति भाष्यविरूपमेतेति वाच्यं । व्यवस्थितविभाषाश्रयणादिति । त
दुष्टं । प्रागुक्तप्रातिशाख्यनारदीयशिक्षादिसकलग्रंथविरोधेन आदेशपक्षस्याग्रहस्याचेत्तोऽगतत्वात् व्यवस्थित । विभाषाकल्पनेनस्य निर्मू
लत्वाच्च । तेन तदीयलेखनमप्रामाण्यमेव । अनुपसर्गाद्वा इत्यादौ चवर्गाभावे द्विः कस्य चुत्वाभावं साधयंतस्तदनुगामिनोऽपि परास्ताः ।
नारदेन यथा इत्यत्र अकारद्वयस्य स्फुटमभिधानात् । तस्मिन्नस्य ... यस्यास्मांभट्टानां पर्वणामिती स्पारस्य कप्रयोगद्वयसजातीयस्समभिव्या
हारात्स्पष्टो भेद इति तु प्रसिद्धं शास्त्रे । अत एव व्यंजनकारस्यैकस्यानेकस्य वा विशेषोऽस्तीति भाष्यं । व्यंजनात्स्वरस्य व्यंजनं परं यस्य ... स्वरं भूत

ततश्चाविधिप्रदेशे आङोनुनासिकइत्यादौ यथाप्राप्तस्यागमस्य एव विधिरिति ।७

॥ स्य च दुर्लक्ष्यो भेदाभेदविभागइत्येवं परतया तत्र अतएव पदेन व्याख्यातं । अतएव कुकुपुत्रसेषु तत्र आपयसा वार्य इति भाष्यग्रंथः । अनुपसर्गादिति सूत्रेपि
केषांचित् अनुनासिकपाठः संमत एव । पाठांतरं तु अस्याचतुरं आसु च तदसहनैः इतिवत् सौत्रत्वाद् संहितायोः समाधेयमिति दिक् । तदेतत् सकलमभि का २
भिसंधाय प्रक्रियाप्रधानो गुरूणां वरयोर्लघु । तत आङोनुनासिक इत्यादौ तु अनुनासिकत्वं भवत्येवेति । यमथ मुखनासिकावचनोनुनासिक इत्यनो वेति मतद्वयं । नासि
क्या नासिकास्थानां मुखनासिक्या वेति तैत्तिरीयप्रातिशाख्यात् । अनुनासिकविषये तु दर्शनद्वयं केचिद्वर्णो मुखेन नासिकया चोच्चार्यत इत्ये
पे ५ कं । पूर्वो भागो मुखेनापरो नासिकेति द्वितीयं । तदेवमिदं त्रैतीयं । द्वितीयपक्षे तीययोर्भागमात्रस्य नासिक्यत्वे पितृ उपसर्गात् भागांतरमपि च
इदं संभासते । तथा च नासिकास्थानीयस्य भागमात्रविषयतया नासिकावचनग्रहणेन मुखनासिक्यो वर्णो न गृह्यते । किंतु मतविशेषे केवलनासि
कास्थानतया यमादयएव गृह्येरन् । विड्वनोरनुनासिकस्यात् इत्यादौ त्वनुवादे अप्रवृत्तिरेव स्यात् इत्युदाहृत भाष्योक्तराश्रयः । तस्मादुभयनिष्ठ सिप ७
यो मुखपदोपादानं सार्थकमिति स्थितं । प्रथमदर्शने तु प्रासादवासिन्यायाश्रयणेनोभयवचनानामविशिष्टा संज्ञा । अंतरतम्या अविधिप्रदे
शे पुमस्यानुस्वारागमप्रवृत्तिः तथा च मुखशब्दोपादानं न कर्तव्यमिति भाष्ये स्थितं । मुखवचनं दूषयत्वेवं तु ककारटकारादीनामपि स्या
त् । तत्र अभ्रांक इत्यत्र ककारलोपः स्यात् पक्व इत्यत्र वकारलोपः स्यात् । तत्र भित्सत्र पलोपः स्यात् । ओदनपाकेऽत्र अनुनासिकस्य चिह्न स्यालोपे इति
दीर्घः स्यात् । अनु पश्चात् नासिकाव्याप्रियते यस्मिन् नासिकायाः पश्चात् मुखं व्याप्रियते यस्मिन्निति वान्वर्थसंज्ञेयं तेन नासिकाव्यापारस्य
भागविषयकत्वेन नात् प्रासादवासिन्यायस्याविषयोयमिति ध्वनितं । एतदयं प्रत्याख्यानं तु शरणं । प्रदेशवाक्ये त्वेव प्रायुक्तस्य ना
सिकामनुगतस्य स्वस्य वा योगस्याश्रयने लौकिकेषु सिद्धि इति दिक् ॥ तुल्यास्यप्रयत्नं सवर्णं ॥ ताल्वादिस्थानमाभ्यंतरप्रयत्नश्चेत्येतद
द्वयं यस्य वर्णस्य येन वर्णेन सह समानं स तस्य सवर्णो बोध्यः । संज्ञाप्रदेशास्तु अकः सवर्णे दीर्घ इत्यादयः । तुल्यमास्यं तुल्यमिति बहुव्रीहिः । लो त्यादयः २
वयोधर्मविशेष नाम्येतानि तुल्यास्य धानास्य सममित संमिते पुरुषः इति सूत्रे तुल्याशब्दात् संमिते यत् इत्याधानात् । तथाप्य

येस्तदृशमात्रेरूढः शब्दः। अस्यंतेसुध्याद्यंतियेनवर्णा निस्सास्यं अस्पृष्टेपैवाह्लब्धातलवरलोप्यत्। यद्वा। आस्यंदतेअन्नंप्राप्य द्रवीभवतीत्यास्यं अन्येष्व
पीतिऽप्रत्ययः। अथवा अनेन द्रवीक्रियते इत्यास्यं अंतर्भावितण्यर्थात् कर्मणि डः पदितः स्नातापदि द्रवेतिवत्। तत्र भवं मास्यं ताल्वादि स्थाने
हलौ ३ शरीरावयवात् यत्। यस्येति लोपे यस्य मामिति यलोपः। न चात्र लोपस्य स्थानिवद्भावः शंक्यः। यलोपे पूर्वविधौ तन्निषेधात्। प्रकृष्टो यत्नः प्रयत्नः प्रक
र्षश्चात्र तद् आस्यंतरं प्रयत्नो वा प्रयत्नः। आभ्यंतरप्रयत्नो हि वर्णोच्चारं भवत्कालस्तव व्याप्रियं ते तथा च तुल्यौ स्थाने प्रयत्नौ यस्येति द्वंद्वगर्भो
बहुव्रीहिः। यद्वा। तुल्य आस्ये प्रयत्नो येषामिति त्रिपदे बहुव्रीहिः। आस्ये इति विशेषणात् बाह्यप्रयत्नव्युदासः। आस्ये इत्येकत्वं विवक्षितं। तद्भिन्न
तोस्य शब्दोपादानसामर्थ्यात्। तेनभिन्नस्थानानामर्थाद्व्युदासः। यद्वा। तुल्यः आस्ये तुल्यास्यः मयूरव्यंसकादित्वात् समासः। तुल्यास्यं प्रयत्नो
यस्येति विग्रहः। यद्वा। आस्ये प्रयत्नः आस्यप्रयत्नः स तुल्यो यस्येति। एवमन्येपि विग्रहादिकं प्राग्वत्। तदेवं समासचतुष्टयमपि भाष्ये स्थितं।
द्वंद्वगर्भो बहुव्रीहिः। त्रिपदो वा पूर्वभागे तत्पुरुषगर्भः उत्तरभागे वेति। तुल्यशब्दस्य संबंधिशब्दत्वात् येन सह तुल्यस्थानप्रयत्नं तेन सह
सवर्णमिति लभ्यते। न हि सातापरलेरेसुखे स्वसुतमातामार्या दृश्यते किं तु पूर्णस्य वमातेति दिक्। तुल्यस्थानमित्येति किं। तुल्यप्रयत्नानाम
पि कचटतपानां माभूत्। तेन तमेर्त्र सत्र शस्ते शसरीति परस्य लोपो न भवति। प्रयत्नग्रहणं किं। चकारशकारयोर्माभूत् सति सावर्ण्ये वा
श्चो तति इत्यत्र शकारलोपः स्यात्। आभ्यंतरत्वविशेषणमप्येतदर्थमेव। अस्ति हि श्वासाघोषविवारा स्यबाह्यप्रयत्नसाम्यं चशयो
रपि। नन्वस्य प्राणत्व महाप्राणकृतो भेदोस्तीति चेत् किं ततः। न हि सर्वप्रयत्नसाम्यं विवक्षितुं शक्यं। अः ङ्किं तद् इत्यादावसिद्धिप्रसंगा
त्। ऋकारयोरपि बाह्यप्रयत्नभेदात्। सर्वप्रयत्नसाम्यं हि स्वस्य स्वेनैवायाति न तु परेण। तथा सवर्णसंज्ञाप्रणयनमपि व्यर्थं स्यात्।
अणुदित् तुल्यास्यप्रयत्नस्येत्युक्ते सर्वमाप्यंभस्यात्। प्रकृते धातरीस्युक्ते हल्लोपमंपानी सवेवयथासंख्यप्रवृत्त्यामाहा तस्यमिस्सा

१४ दोषमकारस्यैव शिष्टिः इत्यादौ ऽकारस्यापि लोपो न स्यादिति हि सिद्धान्ते सवर्णग्रहणं कृतं । स वाच्याप्ति तदेवोपादानं प्रयत्ने साम्यं विवक्षायां तद्वक्ष्यति ए
वस्यात् । अथ यावद्भ्यां साम्यं यावदाभ्यंतरसाम्यं वा विवक्ष्येत एवमपि मधुलिट् इत्यत्र विसर्गस्य संयोगान्तलोपः स्यात् । संवारधकारयोः सव
श्वासाघोषविवारमहाप्राणत्वरूपबाह्यप्रयत्नचतुष्टयेनापि साम्यात् । अथ स्थानप्रयत्नविवेकः । अकुहविसर्जनीयाः कण्ठ्याः । इचुयशा
स्तालव्याः । ऋटुरषा मूर्धन्याः । लृतुलसा दन्त्याः । उपूपध्मानीया ओष्ठ्याः । ए ऐ कण्ठतालव्यौ । ओ औ कण्ठोष्ठ्यौ । वकारो दन्तोष्ठ्यः । जिह्वा
मूलीयो जिह्वामूलस्थानः । अनुस्वारो नासिक्यः । यत्नो द्विधा । आभ्यंतरो बाह्यश्च । तत्राभ्यंतरश्चतुर्धा । स्पृष्टता ईषत्स्पृष्टता संवृतता विवृत
ता चेति । तत्र स्पृष्टता स्पर्शानां । ईषत्स्पृष्टता अंतस्थानां । ह्रस्वस्यावर्णस्य प्रयोगे संवृतता । शास्त्रीयेष्वपि तु विवृतता प्रतिज्ञायत इति म
हाभाष्ये प्रतिपादितं । ऊष्मणः संवृतता इति तु प्रातिशाख्यव्याख्यातॄणां सर्वसाधारणं । ऊष्मणां च स्वराणां च विवृतता । एषां चतुर्णामप्याभ्यंत
रत्वं वर्णोत्पत्तिप्राग्भावित्वात् । तथाहि नाभिप्रदेशात् प्रयत्नप्रेरितो वायुः प्राणो नाम ऊर्ध्वमाक्रामन् उरःप्रभृतीनि स्थानान्याहंति । ततो व
र्णस्य तदभिव्यंजकध्वनेर्वा उत्पत्तिः । तत्रोत्पत्तेः प्राक् यदा जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानैः तालुआदिस्थानैः सम्यक् स्पृशंति तदा स
स्पृष्टता । ईषत्स्पृशंति तदा ईषत्स्पृष्टता । समीपावस्थानमात्रे संवृतता । दूरत्वे विवृतता । अत एव इचुयशानां तालव्यत्वाविशेषे
पि तालुस्थानेन सह जिह्वाग्रादीनां चवर्गोच्चारणे कर्तव्ये सम्यक्स्पर्शः । यकारे ईषत्स्पर्शः । शकारे [illegible] कारयोस्तु दूरेण स्थितिरि
त्यासामनुभवं शिक्षाकाराणां चानुसृत्य विवेचनीयं । भाष्यकारास्तु नाकृतकालोविवृतस्य प्रत्याख्यानावसरे ऊष्मणां स्वराणां चेष
द्विवृतत्वं विवृतत्वं चेति वैलक्षण्यं वक्ष्यति । तदप्यनुभवानुसार्येवेति सुहृद्भिराकलनीयं । बाह्यास्तु प्रयत्नाः पुनरेकादश । विवारः
संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति । एते च वर्णोत्पत्तेः पश्चात् ऊर्ध्वं प्रतिहते निवृत्ते प्राणा
ख्ये वायौ उत्पद्यंते । अत एव बाह्या उच्यंते । गलबिलस्य संकोचात् संवारः । तस्यैव विकासाद्विवारः । एतौ च संवृतविवृतत्वरूपाभ्यां भा

इतरे सर्वे महाप्राणाः ।२

म्यं तस्मात्संभिन्नावेव। तयोः सम्यगपि स्पृष्टत्वस्थानाभ्यन्तरादिसवर्ण्येयं। वर्गाणां प्रथमद्वितीयाः शषसविसर्गजिह्वामूलीयोपध्मानीया
यमौ च प्रथमद्वितीयौ विवृतकण्ठाः श्वासानुप्रदाना अघोषाः। वर्गयमानां प्रथमेऽल्पप्राणाः। वर्गाणां तृतीयचतुर्थाः अन्तःस्था हका
रानुस्वारौ यमौ च तृतीयचतुर्थौ संवृतकण्ठा नादानुप्रदाना घोषवन्तो। वर्गयमानां तृतीया अन्तःस्थाश्चाल्पप्राणाः यथा तृतीया तथा
पञ्चमा आनुनासिक्यमेषामधिको गुणः इति शिक्षासु स्थितं। वर्गयमाः खफछठथाः विसर्गः शषसा एव च। एते श्वासानुप्रदाना अ
घोषाश्च विवृता एव ते। कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः। अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः। यद्यप्येते वाह्याः प्र
यत्नाः सवर्णसंज्ञायामनुपयुक्तास्तथापि अन्तरतमपरीक्षायामुपयोक्ष्यन्त इतीह प्रदर्शिताः। अन्तरतमविशेषणव्यावर्ण्यतया व्युत्पादिताः।
नन्विह सूत्रे प्रयत्नग्रहणं व्यर्थं। तल्लुप्तं तास्यशब्देन ताल्वादिस्थानस्य प्रयत्नस्य च लाभादिति चेन्न। प्रत्येकं व्यापारे
निराकांक्षार्थमुभयोरुपादानात्। तेन स्थानप्रयत्नोभयसाम्ये सत्येव संज्ञा न त्वन्यतरसाम्येपि। एवं स्थिते यत्फलितं तत्स्पष्टार्थमु
पन्यस्यते। अष्टादशधा अवर्णः परस्परं सवर्णाः। तथा इवर्णोवर्णौ ऋकारश्चाष्टादशधा वर्णस्तु द्वादशेति त्रिंशन्मिथः सवर्णाः। लृवर्णस्य दी
र्घा न सन्तीत्युक्तत्वात्। ऋलृवर्णयोर्मिथः सावर्ण्यं स्योपसंख्यानाच्च। एचस्तु द्वादशधा मिथः सवर्णाः। ननु एकारैकारयोः ओकारौकारयो
र्वा मिथः सवर्णौ यथा चेतन तथा अइउण्सूत्रे एव प्रतिपादितं। अकारेण एचोः न सावर्ण्यं प्रयत्नभेदादितीहैव सूत्रे भाष्ये स्पष्टं। अत ए
व एदैतोरपि शकारेण न सावर्ण्यमिति तेषां नाज्झलाविति सूत्रे उदाहरणत्वं नास्ति। न चात्र स्थानभेदेन निर्वाहः। एचामकारेण सह
कण्ठस्थानसाम्यात्। एदैतोः शकारेण सह तालुस्थानसाम्याच्च। नहि यावत्स्थानं तत्साम्यं विवक्षितं। असमानानां त्ववर्णैः सह अ
सावर्ण्यापत्तेः। यवलानां सानुनासिकनिरनुनासिकानामसावर्ण्यापत्तेश्च। नहि निरनुनासिकानामपि नासिकास्थानं येन साम्यं स्यात्। सर्व ७

13 ननु तद्धितांतात्स्वशब्दवलोत्तात् आदि सामान्यमात्रं लभ्यते। ओष्ठात्प्रभृति प्राक्काकलकात् आस्यं मुखं च जीवायाः तु अंतप्रदेशाः पंचदशमतिरित्या
भ्यस्तेभ्यः कथं नासिकास्थानभेदे नासवर्ण्यं मापाद्यते इति चेत्। नासिका हि नवाख्या वर्णान्तस्य निमित्तं। तत्र जिह्वाग्रादिव्यापाराभावा
त्। किंतु अंतरास्ये वितते च मांसपिंड एव च भवेत्। तत्संबंधोऽदेश्या विशेषो नासिकायास्तु वर्णान्तस्य निमित्तमिति सिद्धांतोऽत। तस्यास्य ओष्ठादि व२
भ्यो विशेषात्। वर्ग्यो वर्ग्येण सवर्णः। तुल्यास्यप्रयत्नत्वात्। रेफस्य रेफ एव सवर्णः। एवमूष्मणामपि ऊष्माण एव सवर्णाः नान्ये।
रा.का.५ तुल्यास्यप्रयत्नत्वाभावात्। शषसहानां यथाक्रमं इकारऋकारलृकारैः सह भाष्यकारमते यद्यपि तुल्यास्यप्रयत्नास्तथापि न सवर्णाः नाज्झ
सि.८ लाविति निषेधात्। भाष्यकारमते तु प्रयत्नभेद एवैष्यते। इह स्थानभेदात्प्राप्तां सवर्णसंज्ञां विधातुं वार्तिकमारभ्यते। ऋकारलृकारयोः
सावर्ण्यं विधिरिति। होतृ लृकारः। होतृकारः। उभयांतरतमः लृकारांतरतमश्च दीर्घो नास्ति भवतीति परिशेषाद्दीर्घकारः। स्यादेतत्। अकः
तस्यायमर्थः ७ सवर्णे दीर्घ इत्यत्र ऋति ऋ वा वचनं लृति लृ वा वचनमिति वक्ष्यति। अकः सवर्णे ऋति परे पूर्वपरयोः स्थाने वा ऋ भयमादेशो भवति। द्वि
मात्रो यो मध्ये द्वौ रेफौ तयोरेका मात्रा अभितो अज्भक्तेरपरा ईषत्स्पृष्टश्चायं। तत्र प्रयत्नभेदात् ह्रस्वादेशो हलादन्त्याद्दीर्घसंज्ञाया
अभावादप्राप्तो यं विधीयते। लृति लृ वेति। अयमपि द्विमात्र ईषत्स्पृष्टश्च। मध्ये द्वौ लकारौ तयोरेका मात्रा अभितोऽज्भक्तेरपराऽपूर्वव
दप्राप्तो विधीयते। तत्र वा वचनमिति वाशब्दो दीर्घसमुच्चयार्थो भविष्यति। वास्याद्धि विकल्पोपमयोरेवार्थेऽपि समुच्चयेऽस्याभिधानात्।
तेनाप्राप्तत्वदीर्घो भविष्यति। तत्किं सवर्णसंज्ञया। ननु लृति लृ वेत्यत्र सवर्णे इत्यनुवर्तते न वा। आद्ये होतृ लृकार इत्यत्र ऋलृवर्ण
योः सवर्णसंज्ञां विना नेष्टसिद्धिः। अंत्ये दध्युकारो मध्वृकार इत्यादावतिप्रसंग इति चेन्न। प्रथमवार्तिके ऋतीत्युपनीय ऋत इति पंचम्यंत
पाठेनैव सर्वसामंजस्यात्। सवर्ण इति च पूर्ववार्तिकेऽनुवर्तते। तेन धात्रंश इत्यादौ नातिप्रसंगः। द्वितीयवार्तिके तु सवर्ण इति निवृत्तं

तइत्यनुवर्तते। तस्मादृवः सवर्णे इत्यत्र अवर्णग्रहणं कर्तव्ये न वचनद्वयेनैव सवर्णे निर्वाह इत्यारलृकारयोः सवर्णविधिर्दिलीहत्यं वार्तिकं व्यर्थमिति। एवं द्वयमेवं
वार्तिकमाश्रित्य सुपा ह्रस्ववचनद्वयप्रत्याख्यानं द्वैवन्याय्यत्वात्। तथाहि तद्वचनद्वयं कुर्वतापि रेफद्वयलकारद्वयगर्भयोर्ऌद्धिजेययोर त्वं लावदेष
यं। तन्निर्वाहार्थं वर्णसमाम्नायेलो पठनीयो। अन्यथा हि विधानमात्रमनयोः स्यान्नत्वचकार्यं प्लुतः। तद्विधाने हि अवश्यमेतत् परिभाषया अचट्
स्तुपतिष्ठते। ननु ईषत्स्पृष्टस्थानं चूत्वा तन्मा भूत्त्वप्लुतः। विवृतस्य तु ऋकारस्यापि त्वेन प्लुतः सिद्ध एवेति चेत् सत्यं। विवृतः प्लुतः सिद्धः। ईषत्स्पृष्टो तु द्व
यौ रेफद्वयलकारद्वयगर्भौ न सिध्यतः। अत एवाच्संज्ञामात्रेणापि न निस्तारः। ग्रहणकशास्त्रप्रवृत्तेस्तावन्मात्रेणानिर्वाहात्। किंतु अणस्तु
पाठ एव कर्तव्य इत्युक्तं। सति च णसुपाठे तान्यां त्रिमात्रयोरपि ग्रहणात् प्लुतसंज्ञायां सत्यां पक्षे ईषत्स्पृष्टो प्लुतौ भवतः। एवं स्थिते पाठे वच
नद्वयं मास्तु तद्धि येययोरपि दीर्घतया अकः सवर्णे इत्येव सिद्धेः। ननु स्थानेन्तरतमपरिभाषया विवृतस्य स्थानिनो विवृता एव वर्णा दीर्घौ स्या
तां न त्वीषत्स्पृष्टाविति चेन्न। रेफद्वययुक्तस्य स्थानिनो रेफद्वययुक्त एवादेशः सदृशः इत्यपि हि संभवति। तथा च किं रेफद्वययुक्तत्वमादर्तव्यं
किं वा विवृतत्वमित्यत्र विनिगमकाभावेन पर्यायेणोभयप्रवृत्तौ सिषाधयिषितस्य रूपद्वयस्य निर्वाहात्। ऌकारेपि कलृप्तिद्वकारस्य लतरत
मो विवृत दीर्घः कृत चित् लृकारांतर लमोलृकारद्वयगर्भ ईषत्स्पृष्ट इति सवर्णे दीर्घसिद्धिः। तदेवं पाठे वचनद्वयं न कर्तव्यमि
ति स्थितं। ननु तदेवास्तु संज्ञाविधाने तु मास्त्विति चेन्न। वचनद्वयारंभे गौरवस्य स्पष्टत्वात्। किंच संज्ञाभावे ऋ सकेः उपसर्गादृ
ति उरण् रपर इत्यादिषु ऋकारे णलृकारग्रहणं न स्यात्। एवं सिद्धांतेपि न वृकार इत्यादौ रपरत्वप्रसंगः। रप्रत्याहाररपरत्व
स्य वक्ष्यमाणतया लपरत्वसिद्धेः। ऋदितां लृदितां च धातूनामनुबंधकार्येषु संकरस्तु न भवति। धातुपदेशकाले पृथगनुबं
धकरणसामर्थ्यात्। विधिवाक्येष्वपि पृथगुपादानसामर्थ्यात्। अन्यथा सर्वान् ऋदितः लृदित एव पठित्वा विधावपि तेनैव रूपे

त्वानुवदेत् । संभवत्येकरूप्ये वैरूप्याश्रवणायोगात् ॥ नाज्झलौ ॥ अज्झलौ मिथः सवर्णौ न स्तः । अकारहकारयोः इकारशकारयोः ऋकारषकारयो
र्लृकारसकारयोश्चेति स्थलचतुष्टये पूर्वसूत्रेण प्राप्तं सावर्ण्यमनेन निषिध्यते । तेन आनडुहं चर्म वैपाशो मत्स्य इत्यत्र यस्येति चेति हकार
शकारयोर्लोपो न । अन्यथा हि यस्येत्यनेन दीर्घाणामिव हकारशकारयोरपि लोपः स्यात् । तथा दण्डहस्तः दधिशीतलंऽत्र षड्भि
त्यादौ सवर्णदीर्घः स्यात् । दधिसान्द्रमित्यादौ यणादेशश्च स्यात् । इह अज्झलौ कस्यापि न सवर्णौ स्त इति वाक्यार्थो न ग्राह्यः । संज्ञोरं
भवे यथार्थापत्तेः । विहितप्रतिषिद्धत्वेन विकल्पोऽनुत्पाद्यवात् तुल्यास्यप्रयत्नं वेत्येवानुवदेत् । नाप्यचामज्भिर्हलां हल्भिः सावर्ण्यं निषिध्यते ।
नाज्झलावित्यत्रैव सूत्रे सवर्णदीर्घस्य प्रसक्तेः इति पूर्वसवर्णदीर्घस्य च निर्देशात् । ननु सूत्रे वाऽऽत्र निर्देशो न तु ह्रस्वः तावतैवेष्टसिद्धे
रिति चेत्तर्हि दीर्घनिर्देश एव ज्ञापकोऽस्तु । तेन हि अचामज्भिः सावर्ण्यमनिषिद्धमिति ज्ञापितेऽपि परिशेषाद अज्झलोर्मिथो निषेध एव
पर्यवस्यति । सत्येऽपि सवर्णदीर्घ इति ज्ञापकाच्च । यत्तु नाज्झलावित्येव कुतो न सूत्रितमिति तन्न । कर्तृषड्दधिसान्द्रमित्याद्यसिद्ध्याप
त्तेः । ऋकारलृकारयोरनच्त्वात् । अहलत्वात् इति चिह्नपूर्वं एवासिद्धत्वात् । अस्तु वा पक्षे तथापि अज्ञपेक्षया व्यक्तिगौरवमे
व स्यात् इति अजग्रहणं सपठनीयाय इह शंक्यपतामिति शंकायागर्भ स्वावर्णौ वर्णतत्वात् । शाब्दे श्रोत्रव्यक्तिज्ञप्ते सत्यपि वर्णा
श्रवणे विशेषो नास्तीत्येवोत्तरं । वस्तुतस्तु नाज्झलावित्येव सूत्रयितुमुचितं । स्यादेतत् । शान्तं भाभिरपि सावर्ण्यं निषिध्येत । ते
हि इकारादिभिर्गृहीतत्वात् अच्च संज्ञकाः । हलं सूपदेशादुत्तरत्र । न चास्यादेवनिषेधादिकाराद्योर्न सवर्ण इति वाच्यं । एतत्सू
त्रार्थबोधात् प्राक् पदार्थोपस्थितेरावश्यकतया तस्यामवस्थायामिकारादिभिः शादीनामुपस्थानस्य दुर्वारत्वात् । ततश्च परस्परा
तः शासषषः यशस्कारमित्यादेः प्रवृत्तिर्न स्यात् । ततश्चैकैकत्रैश्यं अयंस्यैतादृष्यते तद्दृष्यं । तथा च पूर्वपक्षवा

तिर्वं। अच्‌ स्थलोः प्रतिषेधे शाकार प्रतिषेधो व्यर्थत्वात्‌। अकारशकारस्य हलोः ग्रहणमुपलक्षणं। किंच अवर्णस्याकारादृत्त्वाभिन्नस्य परस्वर्णं स्याव
र्ण्यं न स्यात्‌। तत्‌ तत्र अदंड ज्ञाव भिस्या सेदृश्येन स्यात्‌। तथा हि हकारे ल्लग्नहलः एकारो हल्लक्ष्ये पाठ आत्‌। नन्वा सि भिन्नेव सूत्रे एतस्य प्रवृत्तिः ये
न ग्रहणं लक्षणस्य मसावर्ण्ये न प्रवर्तेतेति। मत्र सिद्धांते वार्तिककार एवाह। सिद्धमनच्‌त्वा द्वाक्यापरिसमाप्तेर्वेति। तत्र सूत्र प्रत्या
ख्याने तोतरं प्रथम वार्तिकं मिप्रेते। तथा हि शिक्षा वाक्ये विवृत मूष्मणामिति योगो विभज्यते तत्र च इ उ वदित्यनुवर्तते स्वराणां चे
त्यत्र विवृतमित्यनुवर्तते। ईषदिति निवृत्तं। तथा च प्रयत्न भेदादूष्म स्वरयोः सावर्ण्यप्राप्तौ विंशं सूत्रेण। तथा च भूराम न वृत्त्वादे
वासिद्धमित्यर्थः। उपलक्षणं चेदं। अकारस्याहः करणादित्यपि बोध्यं। सूत्रारंभमभ्युपेत्येदं। वस्तुतः स्तु तुके [illegible] ीत्या सूत्र मेवनारं
भणीयमित्यर्थः। ईषद्विवृतस्यानुवृत्तिं समानप्रयत्नतो च स्वीकृत्य सूत्रारंभ पक्षे प्याह। वाक्यापरिसमाप्तेर्वेति। अयमाशयः। इ
ह पूर्वेण वर्णनामुपदेशः। ततः इत्संज्ञा ततः आदिरन्त्येन सहेतेति प्रत्याहार सिद्धिः। ततो नाज्झलाविति सूत्रस्य वाक्यार्थबोधः। ततो पवादविषय
परिहारेण सवर्णसंज्ञा निश्चये सति ग्रहणक शास्त्र प्रवृत्तिः। नैवं तत्सूत्र ति ष्यति समये। अन्यथा एतत्सूत्रे ले वइकारशाकार प्रदीनां सा
वर्ण्य निषेधादिकारेण शकारा ग्रहणे सति मस्त्वलत्वादिति हेतोरसिद्ध्या त्वदीयः पूर्वपक्षोऽसंभवदुक्तिः एव स्यात्‌। अथ पदार्थ ज्ञा
नस्य वाक्यार्थ बोधहेतुतया एतद्वाक्य स्थ पदार्थ बोधकाले एतद्वाक्यार्थ ग्रहाभावादिह सूत्रे इकारेण शकार ग्रहः स्यादेव। इतः पू
र्वे सावर्ण्यनिषेधाग्रहादिति चेत्‌ न। इतः पूर्वं ग्रहणक शास्त्र मेवनेति घन्न भिस्य पि कथं न प्रवर्तेत चेत्‌। नन्वेवं तुल्यास्य प्रयत्नं
नाज्झलाविति सूत्रे भक्तः सवर्णे दीर्घ इति दीर्घो न प्रवर्तेतेति चेन्न। सवर्णसंज्ञा पुनरकाले प्रवर्तमानदीर्घशास्त्रस्य दंडहकारादावि

15 वेह प्रतिबद्धप्रवृत्तित्वात् । उद्देश्यतावच्छेदककूपाकांतत्वाविशेषात् । न च सवर्णदीर्घविधानात् प्रागेतत्त्वार्थबोधानुपपत्तिरिति वाच्यं ।
पदार्थोपस्थितिप्रभृतिसामग्रीसंपत्तौ सत्यां साधुत्वबोधकवाक्यार्थज्ञानविलंबेन शाब्दबोधविलंबादर्शनात् । अन्यथा व्याकरण
शास्त्रापरिशीलनविकलानां क्वापि शाब्दबोधो न स्यात् । तथा वैयाकरणानामपि व्याकरणस्य च घटादिशब्देषु व्याकरणादेव साधुत्व
बोधे तदुत्तरकाले च वाक्यार्थावगतौ आत्माश्रयान्योन्याश्रयचक्रकाणां दुर्वारत्वादिति दिक् । साधुत्वज्ञानं तु न शाब्दबोधे हेतुः
अस्तु वा अभियुक्तवाक्यत्वेन साधुत्वानुमितिः । ततः शाब्दबोधे जाते उच्चारितेऽपि लक्षणवाक्यांतरेऽपि लक्षणप्रवृत्तिरिति दि र्ण
क् । वस्तुतस्तु शरोपरस्वरे सावर्ण्यनिषेधे सत्यपि न क्षतिः । परःशतादिषु हि रूपद्वयं सिद्धं तेपीष्यते । शतात्परा इति विग्रहे
कर्त्तर त्वेकता वर्तुलमिति बहुलं च नाद्धा सुप्सुपेति वा समासे कृते पारस्करादित्वात् सुडिति सकारस्य श्रुत्वं ततो न चिचेति द्वित्वे च
नेऽनुशरोचीति अनचीति वा द्वित्वनिषेधो द्वित्वे चेत्तत्रान्यतरस्य द्वित्वनिषेधादिका देश शकारस्य ग्रहणात् । ततोऽस्य शरोऽस
रीति लोपविकल्पात् द्विशकारे त्रिशकारं वा रूपमिति सावर्ण्यनिषेधेपि सिद्ध्यत्येव रूपद्वयं । अनचि चेति द्वित्वस्यापि वैकल्पि
कत्वात् । तत्र द्वित्वस्य वैकल्पिकत्वे यदोनुनासिकेऽनुनासिकोवेत्यतो वेत्यनुवर्तनात् सर्वत्र शाकल्यस्येति पाक्षिकनिषेधाद्वा ।
लोपस्य वैकल्पिकत्वेनुस्वयोऽहोऽन्यतरस्यामित्यतोऽन्यतरस्यां ग्रहणानुवृत्तेरिति सवधेयं । तस्मात्सावर्ण्ये सत्यसत्यपि वा परश्शतादि
ति द्विशकारकत्रिशकारकरूपयोरविशेषः । परश्शता धास्ते येषां परश्शत्याशतादिका दित्यमरः । एवं रामष्षष्ठो यथास्स्रो
रमित्यादावपि । अत एव भाष्ये अपर आह तस्य पक्षस्य वार्तिककृद्रूपमपि एतदाहेति वाचयाख्याप अस्तु वा ग्रहणमित्यादिभिः ॥

कारादीनामिति कास्यशेषाध्याहारेण प्रतिज्ञाविरुद्धार्थो वाशब्द इति व्याख्याते। तत्र अपर आह स्यपदिष्टो पोद्भावनं तद्वीजं तु इजन्तरीत्या भार्षुस्साव र्ण्यनिषेधानिषेधयोः फलाविशेषेपि प्रागुक्तरीत्यादंडागमित्यादि न सिध्येत्। तदर्थं च सूत्रं प्रत्याख्यानस्य वाक्यापदिसमाप्ति न्याय स्ववा आश्रयणे आवश्यक शुद्धांशाभिः सावर्ण्याभावाभ्युपगमे निर्मूलत्व एवेति। स्यादेतत्। अगृहीत सवर्णानामेव नाज्झलाविति निषेध इति तावत् स्थितं। तथा च ईकारादीनां शकारादिभिः सावर्ण्यं निषेधात् कुमारीशेत इत्यादौ सवर्णदीर्घः स्यादित्याशंक्या पीत्यनुवृत्त्या समाहितं। एवं स्थिते मालाढ्य इत्यादौ षत्वं स्यात्। हकारे ण आकारग्रहणे सति गौरी विस्रादि वदिणः परत्वान्नेपा धात्। किंच विश्वपाभिरित्यत्र होढ इति ढत्वं स्यात्। वागाशीरित्यत्र झयोहोन्यतरस्यामिति आकारस्य चः स्यात्। गासीधभिरित्यत्र इणः षीध्वमिति मूर्धन्यादेशः स्यात्। दृस्रोषित्यादौ दादेर्धातोर्घ इति घत्वं स्यात्। रामआयाती त्यादौ हशि चेत्युत्वं स्यात्। देवा आयां तीत्यादौ हलि सर्वेषामिति यलोपः स्यात्। श्येनायितेत्यादौ क्यस्य विभाषेति लोपः स्यात्। निचाय्येत्यादौ हलोयमां यमिति यलोप श्चस्यादिति बहूपप्लवप्रसंगः। अत्रोच्यते। आकारो न हकारस्य सवर्णः। ततो आकारः इत्यइ उण्सूत्रोद्दृत शिक्षादीत्यामि न प्रयत्नत्वात्। सवर्णे ण्ग्रहणमपरिभाष्यमाकृति ग्रहणादिति वार्तिकमते तु हकारा कारयो देवदत्त्यनाकृतत्वा देवनाति प्रसंगः। यद्वा आकारसहितौ च आचसच हलश्च आझलाविति सूत्रे आकारप्रश्लेषो व्याख्येयः। तेन आकारस्य अचांच हल्भिः सहसावर्ण्यं निषिध्यते। आकारप्रश्लेषे लिंगं तु कालसमयवेलासु तुमुन्नित्यादि निर्देशाः। अत्र पक्षे आश्च आश्चेति द्वं द्वेन सवर्णदीर्घेण च नाज्झलाविति सूत्रे दीर्घस्वरः प्लुतोपि निर्दिष्ट इति व्याख्येयं। तेन पिपासो इत्यादौ गुरोरनृत इति प्लुताकारस्य

निस्यो

चाकवापितेत्यादौ घस्यहलइति यलोपः स्यात्। १८

16 रस्य सन: सस्य षत्वं नेसन्वधेयं। भाष्यमते तु द्युष्मणामीच ह्रस्वतत्ताभ्युपगमेन सावर्ण्यप्रसक्तिरेव नास्तीति तत्र प्रत्याख्यानात् सन्देहस्य नावकाशः॥
इति श्री शब्दकौस्तुभे प्रथमाध्यायस्य प्रथमे पादे चतुर्थमाह्निकं॥ शुभमस्तु॥ ॥ईदूदेद्द्विवचनं प्रगृह्यं॥ ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्या
त्। हरी एतौ। विष्णू इमौ। गंगे अमू। तपरकरणमसंदेहार्थं द्विरदिति कार्यः। अन्यथा ह्रस्वयणादेशोऽस्त्विति स्वस्यापि निर्देशः स्यादपि सम्भाव्येत।
ततश्च अकुर्व... त्रे स्यादवति प्रसंगः स्यादिति भावः। भाष्ये तु व्यक्तिः पदार्थो भेदकाश्च गुणा इति पक्षमाश्रित्य गुणानां तपरकरणं नादार्यो
णां संग्राह्यार्थं तपरकरणमित्युक्तं। इदं च ईदिति प्रथमतकारस्यैव फलं नित्यवधेयं। तावतैव ऊकारेऽपि सिद्धेः। तासर इति पंचमीस
मासपक्षस्यापि स्थितत्वात्। एकारस्य तु अपरत्वादेवानुदितत्त्वेन सवर्णग्राहकतासिद्धेः। ईदूतोः परमन एत्वान्नगुणानां तपरकरणसं
ग्रहाय पुनरायत्नः। तस्माद्भाष्यमतेऽपि द्युदेतोस्तपरकरणमसंदेहार्थमेव। गुणानामभेदकत्वे तु ईदित्यपि तथैव सम्भिप्रेत्य एकरूपत्वं
विवक्षितं। इह तपर इति सूत्रे पंचमीसमासो मास्तित्वभिप्रेत्य उदिति तथापि ततपर एव एकारो निर्दिष्ट इत्यपि सुवचं। स्या
देतत्। असंदेहायापि क्रियमाणं तपरत्वं प्लुतं व्यावर्तयेदेव। यथा योगीलितं चक्षुः पदं न हि न पश्यतीति न्यायात्। अथायंदकारः
कदेशविकृतिवदिति चेत्। एवमपि एकारोऽग्नक्ता तु प्लुते। अग्ने त्वान्त्वीदूतौ। वाक्यापरिसमाप्तिन्यायेनोपस्थितत्वात्। जातिपरो निर्दे न ४
श इति चेत्। तर्हि ह्रस्वेऽप्यतिप्रसक्तिः। अस्तु वा व्यक्तिरपि विशेषणीभूता विवक्षितेति चेत्। कथं तर्हि प्लुतसंग्रहः। न च प्लुतव्यावृत्ति
विशिष्टैवेति वाच्यं। अग्नी३ इति इत्यत्र अप्लुतवदुपस्थितौ सूत्रेण प्लुतत्वे प्रयुक्ते प्रकृतिभावेन सिद्धेऽपि प्रगृह्यत्वप्रयुक्तस्य तस्याप्य
मानत्वात्। अप्लुतवदित्यस्य तु देवदत्तेनासाद्यो रिगार्थ्यत्वाद्वैयर्थ्यं न शंक्यं। तथा च षष्ठवार्तिकं। न ह्रस्वे नप्लुतकार्यप्रतिषे

इति २

ध्यार्थं प्लुतप्रतिषेधो हि प्रगृह्यस्य प्लुतप्रतिषेधप्रसंगोऽन्येन विहितत्वादिति। अत आह भाष्यकारः। यथोद्देशं संज्ञापरिभाषमिति पक्षे अयमुत्तरप्रगृह्यसं
ज्ञां प्रति प्लुतोऽसिद्धः। तथा च त्रिमात्रत्वेऽपि द्विमात्रप्रतिपादनासिद्धत्वसंज्ञाकार्यकालपक्षे परं प्रगृह्यसंज्ञाया अप्रवृत्तेः प्रगृह्यस्यैवेन तद्देशं तया
तां प्रति प्लुतस्यासिद्धत्वेन अनुनासिकः प्रवर्त्तेतैवेति स्यादेवं दोषः। एतेन अग्नी३इती इत्यादौ प्रकृतिभावोऽपि व्याख्यातः। प्लुतप्रगृह्या अचि नित्य
पकार स्वरसंधिषु प्लुतस्यासिद्धत्वेऽपि संज्ञाप्रसिद्धत्वानपायात्। यथोद्देशपक्ष एवेहाश्रयणात् तदनुकूलत्वात्। वस्तुतस्तु अनुनासिकप्रवृ
त्तिभयेनैवेह यथोद्देशपक्षाश्रयणं प्रकृतिभावस्तु कार्यकालपक्षेऽपि समुपपादः। न च प्रगृह्यप्रकृतिसूत्रेणैव एकवाक्यतापन्नां संज्ञां प्रति
प्लुतस्यासिद्धतया त्रिमात्रस्य संज्ञा दुरुपपादेति वाच्यं। प्लुतस्यासिद्धतायां बीजाभावात्। यत्तु प्लुतः प्रकृत्येत्येतदेव ज्ञापकमिति। तन्न।
प्लुतग्रहणेन तत्संस्थानिनो लक्षणया सवर्णसामंजस्यात्। न चैवं लक्षणे व [illegible] दोष इति वाच्यं। श्रुतार्थापत्तिमूलकवाक्यान्तरकल्पनापेक्ष
याः लक्षणाया एवाभ्यर्हितत्वात्। अस्तु वा विशेषापेक्षं ज्ञापकं। सिद्धः प्लुतः प्लुतस्य प्रयुक्ते प्रकृतिभावे इति न तु प्रगृह्यत्वप्रयुक्तेऽपि। तस्मात्
कार्यकालपक्षमाश्रित्य प्रकृतिभावस्य समर्थयितुं शक्यत्वेऽपि अनुनासिकप्रवृत्तिवारणायैवेह यथोद्देशपक्षाश्रयणमिति स्थितं। अ
ग्नहरत्र यद्यपि संज्ञायामसिद्धः प्लुतस्तथापि अनुनासिकपर्युदासे सिद्ध एव। तेन तत्र पक्षस्यानेन संज्ञाकृता द्विमात्रत्वं। न सोऽनुनासि
कविधौ स्थानी। किंतु त्रिमात्रः। न चास्यैव विवक्षा नास्यापि प्रगृह्यत्वं अविधित्वात्। किं च। अवश्यं सिद्धः प्लुतः स्वरसंधिषु सिद्धस्याश्र
यणीयं। दे३ आ३ इदं इति प्लुतस्य दीर्घेण निर्दिष्टत्वात् यथा स्यात्। अत एव सुश्लोका३ इति सुश्लोके तीस्य च गुणो भवति प्लुत स्वेव निवर्तयति
न तु स्थानिनं। अन्यथा हि आदेशरूपे प्लुतः स्यात्। तेनेदिह यथोद्देशेऽपि संज्ञापरिभाषं कथमिदं वैष्णवसिद्धिः कथं वा नंपेषु प्रवृत्तिपरवि

17 ग्रोध इत्ति विपश्चित: प्रश्नपकाङ्गति। अत्राहुः यद्यपि ह्रिमात्रत्रिमात्रेणापहृतः तथापि दीर्घत्वासिद्धत्वात् तिश्चतस्त्रासिद्धत्वे बोधनात् त्रिमात्रे ह्रिमात्रत्वे
नायमिति बुध्वा प्रश्नः स्व संशोधियते। अतएवामुनेस्तत्र मुनेरुक्ते तत्रुपतीयते न नाभावे चक्रते सुधि चेतिप्रियौ मृशाद्देणेव दशव्रो यमिति बुध्वा
ता ३ याचो नाति तस्य दिहौ पृते त्राष्टस्याप्यार्थ नाभावेक्ते व्येकृतेच सतिमुभावो नासिद्ध इत्यस्य मेव्याख्यातं। कैमे ऽने तस्त्रे चे संनिपातेप
रिभाषया समाहितं। न चिह ह्रिमात्रेकृता संज्ञी स्या चिवं द्रावे न त्रिमात्रे आनयामः। येनानाप्ति धा विति निषेधः प्रांक्यै त न हिरजत भ्रम
२५ प्रयुक्ता प्रवृत्तिः शृङ्क्ति न गोचयूदीति मुर्ह्रं। एतावानेव विशेषः। रुयत भ्यमो नाहार्यः प्रवर्तक इहतु शास्त्र प्रामाण्या दाहार्या शेषो ऽपि नतद्ध्रा
ते ६ स्त्र प्रवृत्ता प्रवृत्तौ च नियामक इति तदेव केय दे नैव स्कृ टी कृतं। यदाहशास्त्रा सिद्धत्वा श्रयणा च [illegible] म्रुतंबुद्धौ सत्यां प्रगृह्यत्वे विधीय व ६
मानेह्रिमात्रत्वबुद्धिः प्रवर्तते। तथा च वक्ष्यति। असिद्ध वचनमुत्सर्गलक्षणाभावार्थमादेशलक्षण [illegible] णप्रतिषेधार्थं चेति। चित्ततु कोर
सिद्धएतत्सूत्रस्थं वार्तिकमिदं। उत्सृज्यते निवर्त्यते आदेशेनेत्युत्सर्गः स्थानी सर्वाणि निमित्तं यस्य कार्यस्य तु गादेः तस्य प्रवृत्त्यस स्व ५
र्थमित्यर्थः। तथा चैकरूप्यार्थं सर्वत्र शास्त्रासिद्धत्वमेवेति भावः। एतेन यस्थाने न संख्या कृतानसोनु नासिकविधौ स्थानीति प्रथ
मकृषणामुद्धृतं। यदपिडाढ्वं मुस्त्रोक्तेत्यादौ आदेशो प्लुतः श्रयेति तदपिन। उत्तरीत्या तथा प्यादेशेन प्लुतस्यैव निवृत्तेः। प्लुतो ते ४
नयापहृिमत इति बुद्धिः परं तस्यता सीस्त्यदेतत्॥ यत्तुषष्ठे भाष्यकारो वक्ष्यति सिद्धः प्लुतः स्वरसंधिषु इति तत्तु इहानुना
सिकपर्युदासानुरोधाद् यथोद्देशपक्ष एवाश्रयणीय इति स्थिते स्वरसंधि सामान्यापेक्षया पकाश्रयमतोपि न दोष इत्याशयेन ये २
तु सामान्यापेक्षतया मे वकिं चिदाचहे वीरमस्तीति दिक्। ननु उदात्त [illegible] हरणे षु ईदादिकमेवाद्ध्वचनं न तु तदंतमिति चेन्न।

व्यपदेशिवद्भावेन तदन्तत्वात् । ननु ईदूदेदन्तं द्विवचनान्तमित्येवं कथं न व्याख्यातम् । एवं हि सति व्यपदेशिवद्भावो नाश्रयणीयो भवतीति चेन्न । कुमार्योरगारं
कुमार्यगारं वध्वोरगारं वध्वगारमित्यत्र प्रत्ययलक्षणेन द्विवचनान्तेऽतिव्याप्तेः । संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति सुप्तिङन्ते
पदमित्यन्तग्रहणेन ज्ञापितत्वा[illegible] तेन ईदाद्यन्तं यत् द्विवचनं तदन्तं प्रगृह्यं । कुमार्यगारशब्दो नु समासान्ते द्विवचनं न चीदाद्यन्तमिति प
राप्तं । संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणात् । यत्तु अस्मिन् पक्षे दूषणं तेनैरमुक्तं । अ [illegible] अमुके संपद्येते शुक्लास्तां वस्त्रे इत्यत्रेश
दान्तेरप्राप्त्या अतिप्रसक्तं बाधित्वा परत्वाच्छ्रीभावेऽन्ते तस्य नु किं प्रत्ययलक्षणेन शुक्ली इत्यस्य प्रगृह्यत्वं स्यादिति । तन्न । अन्तरङ्गा
नपि विधीन् बहिरङ्गोऽपि लुग्बाधत इति परिभाषया औकारस्यैव लोपात् । तस्य चेदादीतत्त्वविरहात् । अप्लुत ईदादि विशेष्यं ।
तथा च द्विवचनसंज्ञं ईदादि प्रगृह्यमित्यर्थ इति चेन्न । गंगे इत्यादेः सिद्धावपि [illegible] इत्याद्यसिद्धेः द्विवचनावयवो ह्ययमेका
रो न तु द्विवचनं । किं च प्रगृह्यमित्यस्य संनिहितत्वात् द्विवचनमेव संज्ञि न तु ईदादिः विप्रकृष्टत्वात् । तस्माद्यथा व्याख्यातमेव मनो
रमं । वार्त्तिककारः मणीवादीनां प्रतिषेधो वक्तव्य इति पठित्वा मणीव रोदसीव दंपतीव जंपतीवेत्युदाहृतः । मुनित्रयानु
मतादप्रमाणमिदमिति तिके यादयः । एवं च वदद्भिः समानन्यायतया अन्येषाममुनित्रयानुक्तानां वार्त्तिककारोक्तानां तु इय
त्वेष्टिः शं सिद्धुहि गुहि ष्योर्वा । क्रमेके छन्दसि इत्यस्य पिकस्य भाषायां च । अंगगात्रकंठेभ्य इष्यते इत्यादिनामनादर्त्तव्यतोक्ता ।
मणीवोष्ट्रस्य लम्बेते इति तु इवार्थकेन वाशब्देन निर्वाह्यमित्याहुः । भाष्यकारस्तु संबुद्धौ शाकल्यस्येताविति शाकल्यग्रहणस्य सिं
हावलोकितन्यायेनेह संबन्धाद्व्यवस्थितविभाषाश्रयणाच्छेदनमत इत्याह । केचित्तु इवार्थे वशब्दः प्रयुक्तो भीमो भीमसेनो

18 इति वत्-कार्दंव स्वांडितदलानिवपंक् आनी स्यादि व औस्याहुः । यस्तु तस्तुवद्वा यथा तथैवैवं साम्य इत्य मत् त्वं थेववेलि पाठमाश्रित्य शात्रवं व प पुर्यं शाद्
तिकालिदास प्रयोगस्य तद्या ख्यातम्भि रूदाहरु णात्तवं सुस्पं । युक्तश्चायमेव पाठः प्रातिपदिकप्रकृतेस्तद्धितस्य वनेरनेनुगुणत्वात् । एते
न स्फुटोस्तनाभ्यामलिदं पतीवतद्धितो चनाभ्यां कुचकुम्भाशश्यां निपस्यविंहहृदिकगतेना विलोमली वनी लोमरलै विरेजतुरितिश्री
हर्षप्रयोगोपि गतार्थः । अदसोमात् ॥ अस्मात्परावीदूतौ प्रगृह्यौ स्तः । अमी ईशाः । रामकृष्णावमू आसाते । न च अमुकेत्युदाहरणं पूर्व
सूत्रेणगतार्थमितिवाच्यं । तस्मिन्नुक्ते ऽर्थे मुत्वस्यासिद्धत्वात् । अदसोमादिति सूत्रं प्रति तु नासिद्धत्वं । आरंभसामर्थ्यात् । तथा चवा
र्त्तिकं । आश्रयात्सिद्धत्वं यथा रोरुत्वे इति । पुंद्विवचनमेव चेत्तोदाहरणं स्त्रीनपुंसकयोर्द्विवचने तु मुत्वस्यासिद्धत्वे पेकारांतत्वाद व
पर्वेतौ वसिद्धसंज्ञा । ततश्च प्रकृतिभावो नेनासिद्धः पर्युदास श्चासिद्धए वेत्स्वधेयं । यत्तु हरदत्तेनोक्तं । अलोपप्रगृह्यस्येसयोपस्थितेनास्य
वसूत्रेणसंज्ञायां क्रियमाणायां मुत्वस्यासिद्धत्वाल्लिंगत्रयेपि द्विवचने ऽनुनासिकपर्युदासः पर्वेतौ वसिद्धः एनत्सूत्रारंभसामर्थ्य
द्विवचनार्थः पुंसि द्विवचने प्रकृतिभावार्थश्चेति । तच्चिंत्यं । तुतसंग्रहानुरोधेन परं सूत्रे यथोद्देशपक्षस्यैव स्थापितत्वात् ।
तस्मात्पुंसिद्विवचने ऽनुनासिकपर्युदासो प्येतत्सूत्रस्य फलं न तु प्रकृतिभावमात्रमित्यवधेयं । अथापि कथं चिद्धरदत्तोक्तिः समर्थयि
तव्ये सा महत्ताहीत्यं समर्थनीया । पूर्वसूत्रे कार्यकालपक्षएवास्तु न चैवं क्षुतस्यानुनासिकपर्युदासेन स्यादिति वाच्यं । ईईऊत्तदुत्तद
इति शरपर्यासरभागे श्रुतस्यापि प्रक्षिप्य निर्देशात् । एकारस्तु अणत्वादेव श्रुतं न ग्रहीष्यति । न च मादपि परत्सपर इति तत्कालग्रहणा
पत्तिः । कृदोरविति वैदृष्ट्वा रएवायमित्याभाष्यात् । पुंलिंगे चैतत्त् । यथोद्देशपक्षे लुप्तादप्रागोवसंज्ञा प्रवृत्तौ सत्सां ततः लुते कृते

व

तस्येवाह्रस्वमात्रत्वेन पक्षद्वयस्याप्यविसंज्ञायाः पुनः प्रवृत्तौ बीजाभावात् । नाभावस्तु मुभावात् प्रागप्राप्तः । ततो मुत्वे निमित्तत्वेनाभावप्रा
प्तस्य मुभावे दशाहो यमितिनुध्याप्राप्नुवन्नदीर्घः प्रतिविधीयत इत्युचितं । न ह्यसौ लुप्तात् प्रागेव प्रगृह्यसंज्ञावन्मुभावात् प्रागेव
प्रवृत्तः । येन पुनर्न प्रवर्तेत । एतेन यद्वृत्तस्य हरदत्तेनेत्थं प्युक्तावित इति यावदुक्तं साधु । भाष्यके यदयोक्तमपि भावः ।
लुप्तात् प्राक् प्राप्तावपि प्रगृह्यसंज्ञापूर्वाभावान्निष्पद्यते । न च लुप्ते ऽनुनासिकप्रवृत्तिरेव पूर्वमस्मिन्निति वाच्यं । संज्ञाया अप
वादभावापि तद्भावात् । प्रगृह्यत्वप्रयुक्तपर्युदासस्येव विधिस्पष्टत्वस्य तरलतौ विरुद्ध्या व्रेति । मुख्योक्ते तौ तत्रादावप्यन्तरंग
त्वात् लुप्तः । अन्तरंगं बहिरंगमपीति न्यायात् । अकृतव्यूहा मनुंस्तरामः । नन्वान्तरंगन्यायमात्रेणोपयोगित्वमस्तु अपूर्वसूत्रे तौ नकृत्स्याद्यर्थं यथोद्दे
शपक्षेऽप्यनुपपत्तेः । तथाच रूढत्वे स्त्योर्लोपे प्रतीन प्रगृह्यसंज्ञां प्रत्येन मुत्वमीत्वयोः सिद्धत्वं स्यात् । नत्वपादीन्नप्रत्ययापि । तत
श्चामीआसत्ते इत्यत्र अभ्यादेशप्रसंगः । अन्न आसाते इति पुंस्त्वादेशः । अमी अत्र एङः पदान्तादतीत्येकादेशप्रसंगश्च ।
न च संज्ञां प्रत्येवासिद्धत्वेन वचनानर्थक्यं स्यादिति वाच्यं । अनुनासिकपर्युदासेन चरितार्थत्वात् । अमी अत्र । यद्यनुनासिकपर्यु
दासमात्रं प्रयोजनं स्यात्तर्हि संज्ञास्तेनप्र त्ययेत । अतो प्रगृह्यस्यानुनासिकः । अदसो नेत्येव भ्यात् । अमी अमुके अमु
काभ्यामित्यादौ नुसिद्धं तेपि न भवत्येवानुनासिकः । अनेनत्वादनवस्थानत्वात् । अतत्राभ्यामा हे हूल्ला मीहूदूह एवान कर्तव्यं ।
न चैवं हे अमुक इत्यत्रापि निषेधापत्तिः । सदादीनां संबोधनविभक्तिविरहस्य प्रोक्तत्वात् । अतः संज्ञाविधानसामर्थ्यात्प्र

19 ऽन्तिभावार्थत्वमप्यस्य विज्ञायते। तद्बलाच्च अयादिविरहोपि सिध्यति। प्रकृतिभावस्यापवादरूपतया उपसंज्ञातनिमित्तोऽप्युत्सर्गो उपजनिष्यमाण
निमित्तेनापवादेन बाध्यत इति परिभाषाबलाच्च। यत्तु संज्ञाविधानसामर्थ्याद् याकीन्नं संज्ञां च प्रति मुखमीत्वयोः सिद्धत्वे ह्रस्वापनादयादीनां
विलोपरत्वान्मुखमीत्वे इति तन्न। अयाद्यभावस्य ज्ञापनेऽन्यथानुपपत्त्यर्थापत्तेर्हि साक्षादुपपादकत्वविषयताभोक्तव्यत्वात्। किंच मुखमीत्वयो
रेव पदान्वयत्वेन बलीयस्त्वं। अंतरंगो बलीय इति न्यायात्। तत्कथं विप्रतिषेधोपन्यासः नाज्ञानंतर्ये इति निषेधस्तु असिद्धं बहिरंगमंतरंग इत्यस्
स्यापवाद। नतरां हतपरिभाषायाः। यद्यप्यसिद्धं बहिरंगमंतरंगे इत्यस्य नये वगतार्थत्वादंतरंगं बलवदिति पृथक् परिभाषा न कर्तव्येति
विप्रतिषेधे परमिति सूत्रे भाष्यकृद्वक्ष्यति। तथापि अस्मिन्नपि यत्रांतरं। सापवादनिरपवादत्वाभ्यां फले विशेषात्। एवं च इहेस
न्नेहि सततस्येकवचनेन सह गुणोंऽतरंगः सवर्णदीर्घत्वं तु बहिरंगं। न चेह असिद्धपरिभाषया गुणोंऽन्वयते। नाज्ञानंतर्ये इति निषेधा
त्। अत एव अचः परस्मिन्निति सूत्रे भाष्यकृद्वक्ष्यति। आरम्यमाणेऽपि निसो सोऽपरस्मासेऽव्यवस्थया। युगपत्संभवो नास्ति बहिरंगे
ण सिध्यतीति एतच्चानंतर्येऽस्फुटीकरिष्यते। अत एव चोक्तं वार्तिककृता। शाचडंतस्यांतरंगलक्षणत्वादिति। धियति अदुदु
वदि [illegible] स्यादिचतस्रोदाहृतं। आपकं चाय ओमाङ्गे अचे आ ऽङ्ग्रहणं। एवं दृष्टा प्राकुठस्यापरमपि सवर्णदीर्घं बाधित्वा धातूप
सर्गयोः कार्यमंतरंगमित्यंतरंगत्वाद्वृत्ते कृते वृद्धिप्राप्तो सत्संपत्रूपं यथास्यादिति क्रियते एतच्च संप्रसारणाच्चेति सूत्रे भा
ष्यस्पष्टं। कथं तर्हि वार्तिककृतोक्तं विप्रतिषेधादिति। सत्यं। अत एवापरितोषाद्व्यवहारेण अथवेति पक्षांतरमाश्रितमिति
दिक्। माल्विं। अमुके त्र। नचेह स्वत्रे ईद्दूतावेवानुवर्तेते न तु एकारः। सामिमाह्नहतोए कारेणानुवर्तते। अदसो मात्परस्य

सत्वं १९

ईकं तस्य प्रगृह्य
यस्मैलेनअनेवा
लोपात्सर्वादेशः ४

तस्यासंभवात्। अन्यथा त्वनुवर्तेत। एकदेशानुवृत्तिस्तु दुर्ज्ञाना। तस्मादेकारानानुवृत्तिता स्वर्यजहत्कल्पं माकृहणमिति स्थितं। अत एवेदं दिवेष्टयं। इदू
तोस्तमप्यर्थे प्रगृह्यौ। अदसः एअ द्विवचनमित्येव कुतो न सूत्रितं। एवं हि पूर्वसूत्रस्थमीग्रहणं हि तत्प्रकृतसूत्रे माकृहणं चनकर्तव्यमिति
महल्लाघवं एकदेशानुवृत्तिश्च नाश्रयणीया भवतीति ॥ शे ॥ अयं प्रगृह्यः स्यात्। अस्मे इन्द्राबृहस्पती। चतुर्थीबहुवचनस्य स्थाने
सुपां सुलुगिति सूत्रेण शे आदेशः। शित्त्वात्सर्वादेशः। शेषे लोपः। न युष्मेनात्तन्वं धवः। युष्मास्थितिस्यर्थः। अत्र पदपाठकाले युष्मे इती
उदाहरणं बोध्यं। संहितायां तु अभ्यूपर ... तेभावेन स्वरसन्धिर्वा प्रगृह्यत्वे विशेषाभावात्। एवं त्वे इति यः सुदुघास्त्वे इव शमा इत्यादी
नामपि पदपाठकाले उदाहरणं त्वे बोध्यं। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं। तेनेह न। काशे कुशे वंशे हरिशो वं
भृशे। हरिवभृ आभ्यां लोमादिलोपश्च प्रत्ययः। ततः सप्तम्येकवचनं ॥ निपात एकाजनाङ् ॥ एको च निपात आङ् भिन्नः
प्रगृह्यः स्यात्। अनिषेधाधिक्षेपयोः अ अवधं। इ विस्मये। इ इन्द्रः। उ उत्तु पलाक्षेतापानयायोपर्येषु। उ उ मेशः। एकाजिति कर्मधारयः व
र्तिपदार्थप्राधान्येनांतरंगत्वात्। व्याहरति मृगाह इत्यादिनिर्देशाच्च। तेनेह न। प्रेदं ब्रह्म प्रेदं क्षत्रं। प्रेदु इत्यादि। स्यादेतत्। प्रत्ययं
कर्मधारयस्याहिलकजहत्स्वार्थे। निपातोयोऽजिति तावतैवाभिमतसिद्धेः। नव विपरीतविशेषणविशेष्यभावेन अजन्तो यो निपात इत्यर्थः
स्याद्विशेषलेन नदंतविद्योतिवाच्यं। तथा सति व्यावर्त्त्यालाभेन विशेषणत्वैयर्थ्यापत्तेः। न चाहं तं नंख्यावर्त्स्यं। तस्य संज्ञायां सत्यामपि
बाधकाभावात्। न च पुरे स्त्री स्यादेकत्वं तस्य संज्ञायां सत्यां प्रकृतिभावाद्रोरुत्वं न स्यादिति वाच्यं। प्रगृह्यसंज्ञां प्रति रुत्वस्यासिद्धत्वात्
वादोषाभावात्। न च संज्ञा न स्यात् ... प्रगृह्यसंज्ञा एकदेशविकृतस्यानन्यत्वात् रेफस्यापि स्यादेवेति प्रकृतिभावप्रसंगस्तदवस्थ इति

२० वाच्यं । प्रग्रहणं तत्र प्रतीत्य प्रकृतिभावं प्रस्य विकल्पस्यासिद्धत्वात् । ऋकारान्तस्य तु न किंचिद् विप्रतिषिद्धं कथं स्वयं प्राप्नोति यतः प्रकृतिभावेन व्यावर्त्येत तस्मा
द् वाचिपातस्य विशेषतो ऽच्ग्रहणं व्यर्थमेव स्यादिति सुष्ठूक्तं । ननु अजंतस्यैव यथा स्यात् प्राचस्य मा भूदित्येवमर्थं विशेषणं किं न
स्यादिति चेन्न । व्यपदेशिवद्भावेन तस्याप्यजंतत्वानपायात् । विशेषणसामर्थ्याद् व्यपदेशिवद्भावो न प्रवर्तत इति चेन्न । तदंतवि
धिपरिज्ञानेनापि तत्सार्थक्यस्य सुवचत्वात् तथापि अजंतग्रहणे परिभाषायोगे भावश्यके विनिगमकं किमिति चेत् । अच्ग्रहण
मेव लघवे हि । तद्धि व्यपदेशिवद्भावमात्रबाधे ऽव्यर्थं स्यात् । तस्मादचो विशेषणत्वे ऽपि अजाद्युग्रहणज्ञापकात् तदंतविधिर्न ।
अचो विशेषणत्वे तु न तदंतविधिरित्ययं यथाप्येकग्रहणं व्यर्थमेवेति स्थितं । ननु प्लुतसमुदायनिवृत्त्यर्थमेकग्रहण
मस्तु अ इ उ अचेह इति समुदायस्यैव संज्ञा स्यात्प्रायग्रहणात् । एकाच्त्वे द्विर्वचनं न्याय्यादिति तत्र समस्यैव प्रकृतिभावः स्यात् न तु पूर्वयो
रिति चेदेवं । प्रतिस्वैकत्वस्य विवक्षये समुदायनिरासः संभवात् । अथाह भाष्यकारः । अच्समुदायग्रहणशंकानिरासार्थमे
कग्रहणं कुर्वन् ज्ञापयति वर्णग्रहणेषु व्यक्तिः संख्या न विवक्ष्येते किं तु जातिरेव निर्दिश्यत इति । तेनेदमेहल्ग्रहणस्य जा
तिवाचकत्वात् सिद्धमिति वार्तिककृता नवप्रमाणं मत्वेतैन शापितं भवति । इदमेः सिद्धमित्यन्वयः । अत्र हेतुः हल्ग्रहणस्य जा
तिवाचकत्वादिति । तेनेदमेः समितिकृते समनीवंतेति विश्रव्यादि ऽभावेदम इष्येति इदोतोः कृतयोरन्त्योपोऽभ्यासस्येस भ्यासलो
पे हलंतात् पचेति स्रनः क्विलोपे ऽलोपे भष्भावे चकृते धिप्सति धीप्सतीति रूपद्वयं सिध्यति । हल्ग्रहणस्य व्यक्तिपरत्वे तु धो भेदः स

मीपो हल् नकारः न ततः परः सन् यस्मा अपरः सन् भकारात् नासा विकः समीपद्धति कित्वं न स्यात्। तथा च हिंसायां तुक्रादिः उदित्वादिड् स.न.१२
वा इति तं हि षत्नि तिलक्ष मीतिदिक्॥ स्यादेतत्। अइउ अ एषां स्यर्थे एकाच् हि वचनन्यायेषपन्यासो न युक्तः समुदायसंज्ञया अवयवा
नामननुग्रहात्। अत एव हि निरुक्तौ या निर्ले याद् इत्यादौ बहूनां संनिपाते द्वयोरपि संज्ञा स्वीकृता। नापि निपाते समुदायस्य निपा २
तग्रहणेन ग्रहणं। एकैकस्मिन्निपाते संज्ञाविधानसंभवात्। सत्यं। एकाच् समुदायग्रहणशंकामात्रं तु स्यादेव। तन्निरासायैव क्रिय
माणमेकाज्ग्रहणं प्रागुक्तमर्थं ज्ञापयति। वस्तुतस्तु अपृक्तसंज्ञाया मेकग्रहणमुक्तार्थज्ञापकमित्याशिस्य प्रकृते सूत्रे एकाज्ग्रहणं समसा
ग एवव्याप्याख्ये। निपात इति किं। चकारात्र। तथा अततेर्डः अः हे अ आगच्छ स्यापि प्रत्युदाहरणं। आङ् नाङो व्यवस्थामाह भाष्यकारः।
ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः। एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्। इति। इह एतत् छन्दे न पूर्वमनिर्दिष्टत्वादेतमि
त्यस्य एनादेशो न कृत इति क्लिष्टं तन्न। अन्वादेशो ह्यकथितानुकथनमात्रं न तु इदमेवंकथितस्येदमा अनुकथनमिति भाष्यकृ
तो वक्ष्यमाणत्वात्। न स्माद्यत्र किंचिद्विधायवान्यांतरे ऐतन्न्य दुपदिश्यते सोऽन्वादेशः इह तु ईषदर्थादौ योवर्तते तदिति वर्ततिर्न विधेया
किंतु परिचायकतामात्रेणोपात्ता। अतो न एनादेशः। एतेन नत्कं भीरूस्यं त्वमेव तदितं तद्येत्यहं प्राप्येस्यपि व्याख्यातं। भीरु
त्वस्य विधेयत्वाविवक्षणात्। सिद्धस्यैव हेतुतानुवादादिति दिक्॥ ईषदर्थे। आउष्णं। ओष्णं। आङ् ईषदर्थ इति कुतः नीति सूत्रेण
तिरस्कृता ङित्त्वव ह तः। क्रियायोगे। आहृतः एतः प्रादिभिर्हि ङित्साहचर्यतः। मर्यादाभिविधौ चेति। समाहार द्वंद्वे आगमशासनम
स्यानित्यत्वान्नुमभावः। मर्यादया सहिते अभिविधावितिमध्यमपदलोपी वा समासः। मर्यादायां। आ उदकान्तात्। ओदकान्तात्।

२। अभिविधौ आ अहिच्छत्रात्। विनातेनेति मर्यादा। सहतेनेत्यभिविधिः। आङ् मर्यादाभिविध्योरिति ङित्निर्दिष्टः पूर्वप्रक्रान्तस्य वाक्यार्थस्या
न्यथात्वद्योतनाय आकारः प्रयुज्यते। आ एवं नु मन्यसे नैवं पूर्वममंस्थाः सम्प्रत्येवं मन्यस इत्यर्थः। वाक्यारम्भसूचनाय आकार इत्यपरे।
तथा स्मृतेः सूचक आकारः प्रयुज्यते। ततः स्मृतोऽर्थो निर्दिश्यते। आ एवं किल तदिति। अत्र च वाक्यस्मरणयोरङिदित्यत्रैव तात्पर्यम्। अ
तो वाक्यस्मरणयोरन्यत्र ईषदर्थाद्यभावे ङित्त्वं बोध्यं। तेन आ मेन्यस्व रजसो रजसोपदमध्यमौ अपोढ्ठणेने सत्रे ससप्तम्यर्थवर्ते
रप्याकारस्य ङित्त्वेन आङोऽनुनासिकश्छन्दसीति प्रवर्तत इति षष्ठे हरदत्तादयः। युक्तं चैतत्। ङिदङितोरन्यतरलक्षणमात्रेणार्थदु
र्मयविवेकस्याभेतत्रापि ज्ञापकत्वादङिल्लक्षणे तात्पर्यमाश्रित्य मार्गान्तरस्यावश्यंस्यानुवादरूपत्वात्॥ ओत्॥ ओदन्तो निपातः प्रगृह्य =अवधुतिरेकेशाः
संज्ञः स्यात्। आहो इति। उताहो इति। निपात इति किं। देवोसि। वषडूते विस्वावासा आ· वायवायाहि· विच्छेदे· यत्तु गवित्ययमाहेत्येतदेव नि
पातग्रहणस्य व्यावृत्त्यमिति। तन्न। प्रगृह्यसंज्ञायां सत्यामपि फलस्याभावात्। न चैवं प्रकृतिभावापत्तिः। प्रकृतिभावविधौ पदान्ताधिकारा
त्। न चायं पदान्तो विभक्तेरेवेति भ्रमितव्यं। अनुकार्यानुकरणयोरभेदविवक्षया अर्थवत्त्वाभावेनाप्रातिपदिकत्वाद्विभक्तेरनुत्पत्ता
वेन एतद्रूपाभ्युपगमात्। अन्यथा विभक्तिश्रवणापत्तेः। न चैवमपदस्य प्रयोगासङ्गतिरिति वाच्यं। अपदं न प्रयुञ्जीतेत्यस्य अ
परिनिष्ठितं न प्रयुञ्जीतेत्येवंपरत्वात्। तस्य च सुप्तिङादिविधायकतन्त्रविधिशास्त्रमूलकत्वात्। इह तु तत्करोत्याद्युत्पत्ति भक्तेरप्य
प्राप्त्या गो इति स्वरूपस्यैव परिनिष्ठितत्वात्। अत एवेह लोपः शाकल्यस्येत्यपि न प्रवर्तते। कथं तर्हि हृस्वसूत्रे शेऽर्थवद्ग्रहणादिति
वार्त्तिके एङः पदान्तादिति पूर्वरूपं कृतमिति चेत्। तत्रानुकार्यानुकरणयोर्भेदविवक्षितत्वात् विभक्तिं च कृत्वा शेषु अर्थवान् शेऽर्थवानि

तिसमासेनसुपोलुकं कलाव्याख्यानात् । एतेनउत्तरसूत्रेसंबुद्धाविति किंगविसयमाहेसुदाहरणेनोक्त विकारा अपि प्रस्तुताः । तस्मादिह देवोसीत्या
दिकमेव प्रत्युदाहरणं बोध्यं । नच एङः पदान्तादित्यारंभसामर्थ्याद् एवतत्सिद्धिः । हरेवगच्छेत्यादौ चरितार्थत्वात् । नच एङ्ह्रस्वात्सामर्थ्याद् ङ-
सिङसो अस्तु नत्वार्थत्वात् । उत्तरसूत्रे तु संबुद्धिग्रहणाभावे आहो इतीत्यादाव विपरत्वाद्धि क्यापत्तिः । पूर्वसूत्रस्य भवहो ई शाद् इत्या
दौ उत्तरस्य तु विष्णो इतीत्यादौ लब्धावकाशतया विप्रतिषेधसंभवात् । न चेह ओदन्तस्यकार्यितया उत्तरत्वं तु विशेष्यासन्निधाने
नतदन्तविधिविरहादोकारमात्रस्यकार्यितया भिन्नविषयकत्वेन कथं विप्रतिषेध इति वाच्यं । अपरत्वास्त्रियादौ प्रकृतिप्रत्ययावयव
योर्नुमनुटोरिवेहापि फलविरोधे न विषयभेदेपि विप्रतिषेधसंभवात् । अर्थाधिकारपक्षे उत्तरसूत्रे योगाङ्गाक्षिप्तस्य सन्निहिताद्यात्र
दाधिकारपक्षे पि इकोऽझलित्यत्र सनाक्षिप्तस्य धातोरिकाविशेषणाव दिहापि संबुध्याक्षिप्तायाः प्रकृतेरोकारेण विशेषणे तेन
दन्तविधिसंभवाच्च तस्मात्सूत्रद्वयेपि गविसयमाहेति प्रत्युदाहरणं नेति स्थितं । प्रकृतिभावे पदान्तग्रहणं नसंबध्यते इत्याशये
नतु च । निरंधो योज्यः । अस्मिंश्च पक्षे मण्डुकप्लुतिन्याये नइकोसवर्णे इत्यत्र पदान्तग्रहणं संबध्नीयमेव । अन्यथा गौर्यौ गौर्य
इत्यादावतिप्रसक्तेरिति दिक् । स्यादेतत् । निपातसमुदायात्ते आहउ आहो उत उ उतो इत्यादि । ततश्च आदिवक्ष्या निपातरू
कातिस्वनेनैव सिद्धा संज्ञा । नचैवमाहो इतीत्यादिषु ङुङस्य प्रसंगः । निरनुबन्धको मुकारः नतु उम् इति समाधानात् । अत
एव उमङ् इति सूत्रे मकारोच्चारणमपि सार्थकं । अत एवं च उमङ् इत्यत्र भाष्यकृता नोक्ता ह्यनुकारा विशेषे । एको ननुबंधकः अपरः सा
नुबंधक इति । नचैवमपि आ उ ओ इत्यत्र आङ नाङो एकादेशस्य आदिवद्भावादनाङ्ग्रहणेन ग्रहणात् । प्रसज्यप्रतिषेधे हि असम

१ अनाङिति प्रतिषेधोप्यसे प्रतिप्रसवायेदमिति वाच्यं । अनाङिसस्य पर्युदासाश्रयणेन आङ्नाङोरेकादेशस्य २

22 र्थसमासो वाक्यभेदश्च स्यात्। भाष्येपि प्रतिज्ञिद्धार्थमेतदित्युक्तिर् मुत्युश्र यमार्त्तं। कथमन्यथा अनुपदमेव अदो मवदित्यत्रातिप्रसंगमाशंक्य प्र
तिपदोक्तस्यैव ओकारस्य ग्रहणमिति समादधीत तस्मादिदमर्थं विनापि सर्वलक्ष्यं निर्व्यूढमेवेति चेत् अओ ब्यते। आहो ओइत्यादयो न निपात
समुदायाः किं त्वखंडा एव। एतत् अ एतत्सूत्रवलेन प्रातिपदोक्तस्य ओकारस्य ग्रहणमिति भाष्यवचनाद् अध्यवसीयते। तेन आम् अहो दवदते
त्येव आमएवं तत्र मामं त्रितनिपातप्रतिषेधः सिद्धः। अत एव पदकारै रपि ओ श्रुवतमकृत इत्यादौ ओइतिइत्यादि ऐवपदे नैव पठ्यते तदेवं
सत्यकार भाष्यकार पदकाराणां संवादस्तवेति स्थिते निपातसमुदाय एवायमित्याश्रित्य एतत्सूत्रं प्रत्याचक्षाणाः परास्ताः। स्यादेतत्। अ
नदः अदः सम्भवत् अदो भवदित्यत्रातिप्रसंगः। च्व्यन्तस्य निपातत्वात्। दुर्योदि च्विडाच श्रेति गतिसंज्ञाविधानेपि स्मार्यो श्वरान्निपाता
इत्यस्याधिकारात्। न च लक्षणप्रतिपदोक्तपरिभाषया लाक्षणिके ओकारे प्रावर्त्यं नदृशिवाच्यं। वर्णग्रहणे षक्तपरिभाषाया अप्रवृत्तेः।
अन्यथा ए चो यवायावः इत्यपि हरये इत्यादौ न प्रवर्तेत चक्रे चक्रिरे इत्यादौ प्रतिपदोक्ते चारितार्थ्यात्। वर्णस्य प्राधान्ये मास्तु परिभाषावि
शेषणत्वे तु स्यादेवेति चेन्न। अविशेषेणाप्रवृत्तेः सूपपादत्वात्। तथा च षष्ठे वक्ष्यामः। अभ्युपेत्यापि ब्रूमः। अमोगौणः समभवदहो भवद
त्यादौ गमेर्डो इत्यो कारस्य प्रतिपदोक्ततयातिप्रसंगः स्यादेव। न चेह गौणमुख्यन्यायेन समाधानमस्तु। तथाहि। संचीभवति श्राह्म
णास्तद्भवति देवदत्तः मद्भवति त्वं त्वद्भवाम्यहमित्यादौ वचनपुरुषव्यवस्थानुरोधेन च्विप्रत्ययस्थले सर्वत्र प्रकृतेरेव कर्तृत्वमिति सिद्धान्त
स्थितिः। तथा च प्रकृतौ आरोपेण वर्तमाना छिप्रकृतिवाच्यकार्यवदा श्रुतेरुत्पन्नो च्विप्रत्ययं प्रति प्रकृतिभूतस्य ब्राह्मणादिशब्दस्य गौणा
र्थतास्यैव। अत एवा महान् महान् भूतो महद्भूतश्चन्द्रमा इत्यादावान्महतइत्यात्वं न प्रवर्तत इति चेन्न। दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात्। तथा
द्भू

हि। विशिष्टरूपोपादाने गौणत्वमुख्यन्यायः तस्यार्थवत्त्वहतेनानर्थक्यं स्यैतस्यादि भाषारूपत्वात्। अर्थोपस्थितेश्च रूपविशेषग्रहसापेक्ष
त्वात्। तथा च श्रुत्यन्तरगृहीत इति विशिष्टरूपग्रहणेन विधीयमानमात्वं गौणेन भवतीति युक्तं। इह तु ओदितिवर्णपुरस्कारेण विधीयमानाप्र
ग्रहस्य संस्कार्यत्वं गौणार्थत्वे न भवेत्। निपातसंज्ञा तु तस्यापि मुख्यैव। अत एव हि संज्ञा श्वश्रूश्वशुरस्यापत्यं श्वाशुरिरित्यत्र श्वश्रूश्वशुरपदं प्र
वर्तते। अतद्भूतं प्रवर्तत एव। अन्यथा इष्टोऽपत्यार्थतुल्ययोगक्षेमतैव स्यात्। अत एव गौर्वाहीक इति गोवाहीकं पाठयेत्सादोषत्वाध्या
त्वेऽस्त एव। एतयोरपि वर्णोऽर्थयत्वात्। गौरिति तपरत्वे ओकारान्तोपलक्षणार्थमिति वक्ष्यमाणत्वात्। तथा च ओतो णिदिति सूत्रे भाष्य
कृद्भविष्यति। गामित्यत्र परत्वादिकार्यविरहार्थेन आत्वेन बाध्यत इति। तत्रैव कैयटेऽपि वक्ष्यति। ओत इति सूत्रं पाठ्य। ओकारान्तो
पलक्षणतया वा गोत इत्येतद्ग्राह्यमिति। इत्यादिग्रन्थेषु एवमेव स्थितं। ननु वदंति। मुख्य एव स्वार्थे सास्नादिमति गोश
ब्दो व्यवस्थात्वेन मते। ततो वाहीकादिभ्यां तत्र संनिधानाद्गोत्वताप्रतीतिः। गोभवदिस्पर्शे तु गौणार्थतां विना चिरे व दुर्ज्ञमिति वे
षम्यं। तस्मात्सदृक्कार्येषु पन्यायोन प्रातिपदिककार्ये पितिस्थितमिति। तच्चिंत्यं। वाक्यसंस्कारपक्षेऽर्थज्ञानात्प्रवृत्तितः प्रागेव
गौणार्थावगतेः। यत्तु कारकाणां क्रियायैवान्वितः संबंधः ततश्च क्रियावशीकृततानामकेतोकहायनीन्यायेन पार्ष्णिकः पदस्याव
च्छेदः तथा च गामानयेत्यन्वयवेलायां न गौणार्थता। किं तु वाहीकेन सह पार्ष्णिकान्वयच्छेदवेलायां न चातत्र गत्वे न प्रवृत्तेः पदसं
स्कारो बहिरंगगौणत्वप्रतीतावपि निर्वर्तत इति। तदपि न। तावतापि भूते पाठयेति क्रियान्वयायैव गौणताया आश्रयणीयत्वात्।



23 कटोपि कर्मणीष्वाद्यो पातिपक्षे कथं । त्रिदुक्ति संभवेपि स्मामानाधिकरण्याद्भ्याद्वे द्विती ये सैवं रूपे भाष्ये नपक्षांतरेत्युक्तं न्यायानवतारात् । यथा श्रु
तिरित्यत्र इ औ ष्वभावापत्तेश्च । शाब्दप्रयोक्ता वा हीकः मि ष्टस्यैव कर्मत्वादे विवक्षितत्वात्तस्मात् उलो अयत्वात् उच्यात्वेदू सैव तत्वं नतु प्राति
पदिकार्थत्वादिति । अतएव च एकत्र अप्राचामित्याद्यो प्रातिपदिकार्थत्वेपि न स्यादयः विशिष्टरूपपुरस्कारे तौ च सर्वनामसंज्ञावि
धानात् । अभिव्यक्तपदार्थायेइस पि गौणमुख्यन्यायसिद्धार्थकथनपरं । प्रसिद्धाप्रसिद्धत्वे एव हि मुख्यत्वं गौणत्वेदस्यन्यत्र विस्तरः । अत एव सर्वादि
सूत्रे संज्ञोपसर्जनप्रतिषेध इति वार्तिकं प्रत्याचक्षाणो हरदत्त आह । संज्ञाप्रतिषेधस्तावन्न वक्तव्यः । अभिव्यक्तपदार्था य इत्येव सिद्धत्वादिति ।
पतुनत्वैकैय दोष स्यति । प्रसि स्य प्रसिद्धिवशात्संभवेन्नपि गौणमुख्यन्यायो नेहोक्तः पदकार्ये प्रयं ननु प्रातिपदिककार्येष्विति औत्सर्गिको
क्तत्वादिति । तदप्युक्तमात्रं । युष्मदस्मदोः स्वरूपमात्रार्थयोर्लाक्षणिकयोर्गौणत्वं उपसर्जनतायामिव संज्ञायां प्रवृत्त्यापत्तेः । युष्मत्पुत्र पदे अस्मत्पु त्रम
दित्यादावपि तदापत्तेश्चेति दिक् । तदेवं अदोमव ह्नो भवदित्यादौ औदिति प्रगृह्यसंज्ञा अव्ययत्वादिवद्दुर्वा इति पूर्वपक्षः पर्यवसन्नः । अत्रोच्यते ।
पूर्वसूत्रे अनाङिति पर्युदासादाङ्सदृशाः प्रतिपदपठिता एव निपाता गृह्यन्ते । इहाप्यर्थाधिकारे तेन अनाङ् इहानुवृत्तावात तथैवेति सर्वं
सुस्थं । तथा च सर्वादिसूत्रे अकारान्तादौ अनुपसर्जनत्वे सत्येव भवतद्इतिप्रचारे तदोः सः साविति सत्वं तद्धे विशेषितत्वात् गौणताया म
पि स्यादित्याशंक्य त्यदादीनामद्दत्यत्र अनुपसर्जनादिति परिभाषया अनुपसर्जनानामेव ग्रहणात्सिद्धं तथाभूतानामेव सत्वविधावनुव
र्तनात्कश्चिद्दोष इति समाधत्ते कैयटः । संबुद्धौ शाकल्यस्येतावनार्षे ॥ अपि वेदः । तद्रूतमपि तोस्यादौ तथा द्वर्णनात् । संबुद्धिनिमित्तक
ओकारो भवेदिति इतौ परे प्रगृह्यो वा स्यात् । विष्णो इति । विष्णविति । संबुद्धाविति किं । गवित्ययमाहेति वत्सिकाराः । एतन्निष्कर्षश्चाह ।

देवदत्तेउँमत्र्यत्र । अनार्षे किं । अमनवं पवित्यब्रवीत् । इ ताविति किं । पटोत्र । उञः । उअ इत्यस्य प्रगृह्यसंज्ञा वा स्यात् । उ इति विति । ऊँ । उञ इत्यनुवर्तते । शाक
ल्यस्य प्रगृह्यमित्यपि च । प्रगृह्यस्य उञ इतौ परे ऊँ आदेशो वा स्यात् । दीर्घोनुनासिकश्च । ऊँ इति इह यदि एको योगः स्यात् उञ ऊँ इति । तदा आदे
शो विकल्पितेरूपद्वयमेव स्यात् । ऊँ इति उ इति । अतो योगविभागः प्रगृह्यसंज्ञापि विकल्पिता एवमपि ऊँ इति द्वितीयसूत्रे यदि प्रगृह्यग्रहणं शा
कल्यग्रहणं चेति उभयमपि नानुवर्तेत तदा उञ्मात्रस्य नित्यं ऊँ भावविधानात् प्रगृह्यस्यैवा प्रगृह्यस्याप्यादेशः स्यात् । तत्र प्रगृह्यत्वादेशोक्ते स्या ४
स्यान्निषद्भावेन प्रगृह्यत्वा ऊँ इतीति रूपं सिद्धं । न चानन्विधाविति प्रतिषेधः । उञ इति समुदायरूपेणाश्रयणात् । तथा च ऊँ इ ईति सूत्रे
दि इ ई इति समुदायाश्रयणात् अम्नहोस्विच्च गृहोलिङीति दीर्घस्य स्थानिवद्भावमाश्रित्य सिद्धं लोपः सिध्यतीति स्थानिवत्सूत्रे वक्ष्यते ।
अप्रगृह्यस्य तु आदेशे अनुनासिकोऽयं न स्यात् । तथा च इष्टरूपत्रितयमध्ये ऊँ इत्येकमेव रूपं सिद्धं । न त्वपरं रूपमित्यव्याप्तिः । अतिव्या
प्तिश्च । सानुनासिकवकारयुक्तस्यानिष्टस्यापि प्रसंगात् । अथ प्रगृह्यग्रहणमात्रमनुवर्तेत । तदा प्रगृह्यस्य उञो नित्यमादेशः स्यात् ।
ततश्च विति ऊँ इतीति द्वैरूपं स्यात् । न तु उ इतीति तृतीयं । अथ शाकल्यग्रहणमनुवर्तेत । ततउञ्मात्रस्यादेशविकल्पनादूइ
ति उ इतीति द्वयं प्रगृह्यस्य विति । विंतीति द्वयमप्रगृह्यस्येति संकलनेन पारूपचतुष्टयं स्यात् । तत्रत्रितयस्येष्टत्वेपि सानुनासिकवकार
युक्तमनिष्टमापतति । तस्माच्छाकल्यग्रहणं प्रगृह्यग्रहणं चेत्युभयमनुवर्तत इत्युक्तं । इह विभक्तिविपरिणामेन प्रगृह्यस्योञ इति व्या
ख्यातं । आदेशसामानाधिकरण्येन प्रगृह्य ऊँ इत्यादेशो भवतीति व्याख्यानेपि न कश्चिद्विशेषः इत्यवधेयं । अनुपरिनिष्ठितमेव प्रयो गार्हं परि
निष्ठितत्वं च अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रांतत्वं निँहतेतिङः तादात्म्यव्याप्तिवारणाय अप्रवृत्तेति । वैकल्पिकेडागमोद्देश्यतावच्छेद

१ = देवदत्तः पचतीत्यादौ कृतेपि निघाते अतिङः पदात्तिङन्तं वर्तत एव = १

२५ ऽकां तेऽसेदे स्यादव्याप्तिवारणाय योगं विभजते। अत एव पचूल दृइत्यादीनामलौकिकत्वेति सिद्धान्तः। तथा च उ इति इ इति दृ पंनस्यादेव। अत्र हि शाकल्यमते
ऽ आदेशेन भाव्यमेव। इतरेषां तु मते प्रगृह्यत्वमेव नास्ति इति चेन्न। अवदेवं यदि शाकल्यग्रहणं यथाश्रुतं स्यात्। तत्तु विकल्पमात्रतात्पर्यकं। त
था च भाष्यं शाकल्यस्य विभाषा यथा स्यादिति। ड्वा शाकल्यस्येतीति च। तथा च कैयटः। शाकल्यस्य श्रुतेरेव फलं वा ग्रहणं न प्रतिपादयतीति
स्म स्पंतरानुसंधानं ह्रस्वेन विभाषा संपद्यत इति च। यद्वा अस्तु शाकल्यग्रहणं यथाश्रुतं। तथापि निपात एकाजित्यनेनैव सिद्धे उञ इति ता
वन्नियमार्थं। तथा च शाकल्ये भिन्नमतेन प्रगृह्यते इति प्रथमसूत्रार्थः। उञः ऊँ सूत्रे च प्रगृह्यसंज्ञा इत्येतावतैव शाकल्येऽर्थे पुनः शाकल्या
नुवृत्त्या इतरेषामपि मते पाक्षिकः प्रगृह्यो ऽस्तीत्यनुमीयते। तेन उ इति रूपं सिद्धं। अथवा ऊँ इति सूत्रे पुनः शाकल्यानुवृत्तिसामर्थ्याद्वि
दाधिकारात्तत्र यत्नेन शाकल्यस्यैव ऋषेरपत्यांतरं गृह्यते। अस्मिंश्च पक्षे प्रगृह्यसंज्ञा इत्यनुवादसामर्थ्यादेव प्रगृह्यता विकल्प्यतेय
था द्विर्यो प इत्यनुवादसामर्थ्यात् तृठक्लृ इति दिक्। आदेशश्चायमनुनासिक इति निर्देशादेव व्यक्तं। तथा च वृत्तिप्रोतिशाख्ये उक्ता
रश्चेति कर्तलो न युक्तो न लोप कोऽपि तु शाकल्येनेति। रक्तसंज्ञो ऽनुनासिक इति च। अत एव यदेतन्नेति पदकाराः पठंति इत्यनुकरणे
यदोऽनुनासिके ऽनुनासिको वेत्येष विधिः प्रवर्तते॥ ईदूतौ च सप्तम्यर्थे॥ शाकल्यस्येतावितिनिवृत्तं। ईदंतं ऊदंतं च शब्दरूपं सप्तम्य
र्थे वर्तमानं प्रगृह्यसंज्ञं स्यात्। अध्यस्यां मामकी तनू। मामकी तनू इति प्राप्ते सुपां सुलुगिति लुगसप्तमीकावेतौ मामकी इति तनू इतीति पदका
रैकार्यो ऽदाहरत्तेऽवोचेत्। सोमो गौरी अधि श्रित इति संहितायामप्युदाहरंतं। ईदूतौ किं। प्रियः सूर्ये प्रियो अग्ना भवाति। अग्नि शब्दात्
परस्याः सप्तम्या डा आदेशः। पदकारैः प्रगृह्येषु इति शब्दप्रयोगस्य नियमितत्वे नेहापि पदकाले इति शब्दप्रयोगप्रसंग इति प्रत्युदाहर

णमिदं। सप्तमी त्वहल्लिङ्गं। धीती मती सुष्टुती धी साम सा सुष्टुसा इति प्राप्ते तृतीयैकवचनस्य पूर्वसवर्णो ईकारः। ततोऽकः सवर्णे दीर्घ इत्येकादेशः। नविह
सुपो लुकः स्वत्र्अवर्णापत्तेः। अर्थग्रहणं किं। काष्ठामश्नोर्वात्यश्वः। नधामा तिर्नघातिः। संज्ञायामिति सप्तमी समासः। ननु सप्तम्यर्थो वीहा
स्येव तत्कथमर्थग्रहणेऽकृते पीष्टसिद्धिरिति चेत्। इत्थं जहत्स्वार्थावृत्तिपक्षे पदे वर्णवद्धृत्तौवार्त्ते पदार्थानामानर्थक्यात् इदं तमिहानर्थकं।
न तु सप्तम्यर्थवृत्तीति स्पष्टमेव। अजहत्स्वार्था वृत्तिरिति पक्षेपि उपसर्जनपदं न स्वार्थमात्रे पर्यवस्यति किं तु तस्मै तेषु पे प्रधानार्थेऽप्यर्थग
हणे सामर्थ्याच्चयावानर्थः सप्तम्याभि धीयते आधेयमात्रं स्पष्टः निरूढाधिकरणरूपः तावन्मात्रस्येह ग्रहणमिति वृत्तिप्रविष्टे नभ
विष्यति। यद्यपि वाक्यवत्समासेपि लुप्तसप्तमीवलेन अधिकरणमात्रबोधः पश्चाद्वाक्यार्थतया संसृष्टबोध इति वक्तुं शक्यते तथापि
सिद्धान्ते तावत्समर्थः पदविधिरिति परिभाषानुरोधात्समासस्थले एकार्थीभाव एव सामर्थ्यं न तु व्यपेक्षा। अत एवोपसर्जने विशेषणानन्व
योन भवति ऋद्धस्य राजपुरुष इत्यादि द्वितीये वक्ष्यते। मीमांसकादीनामपि निषादस्थपतिन्यायेन पूर्वपदार्थसंबंधिनिलक्षणानुपपत्तिमापु
क्षैवार्थग्रहणेन वाप्यश्वनघातिप्रभृतेर्व्यावृत्तिः। आतिर्वलाकाशारादिरिति रातिरपि अवलाका विसकण्ठिका इत्यमरः। आघा स्त्र्यो पि स्त्रो
लिंगाः वलाका साहचर्यादिति केचित्। वस्तुतस्तु शरारी शरार्यादयस्त्रयः पक्षिविशेषवाचकाः न तु वलाका पर्यायाः। अतो बलाका सार्थे च भक्तिं ६४
शेष २ चित्कटं स्त्रीत्वं तु स्येव [illegible] कोशे स्त्रीलिंगकांडे आघाटिः शरारिर्वटः इत्युक्तेः। अतेरपि साहचर्यात्। न परवद्गुणमसंदेहार्थमिति द्रष्टिः।
अजवा जिर्कं। इद्वतो सप्तमी स्येव लुमेर्थग्रहणाद्वत्। पूर्वस्य चेत्सवर्णो सावाणमूभावः प्रसज्यते। नचैनापत्रदीर्घत्वं तत्रापि समर्णीय
[illegible] दि। लापकं स्यान्नदं तत्वे मानापूर्वपदस्य मत्।। अस्यार्थः। ईद्वतो सप्तमी स्येवास्तु नार्थो अर्थग्रहणेन। अत्रोत्तरमाह लुम इति संज्ञाविधौ

लें २

प्रत्ययग्रहणे तदन्तविधेरभावात्सरस्या एव संज्ञा स्यात्पुनरपि सुपि प्रकृतिभागस्य संज्ञासिद्धये कर्तव्यमेवार्थग्रहणमित्यर्थः । ननु सौ मौ औरी
९८ त्यादौ विभक्तिर्न लुप्यते किं तु धी ली मतीत्यादाविव पूर्वसवर्णे कृते अकः सवर्णे दीर्घ इति दीर्घ एकादेशे तस्यादिवद्भावात्सप्तमीग्रहणेन ग्रहणाद
स्येन सप्तमीत्याशंक्याह पूर्वस्येति आद्यन्तवद्भाव इति । एकादेशं बाधित्वा परत्वादंगत्वाद्याश्रयो स्यातामित्यर्थः । तस्माद्दृतेनेवेति स्थिते अर्थ
ग्रहणं कर्तव्यमेवेति भावः । नन्वर्थग्रहणं मास्तु । वचनसामर्थ्यादस्य संज्ञाविध्यावपि तदन्तविधिर्भविष्यतीत्याशंक्याह वचनोदिति । यत्रैव दीर्घ
त्वं तत्रैव वचनात्स्यात् इति तद्युक्तं सरसीशयानमिति यथा । अत्राह सरःशब्दात्परस्य सप्तम्येकवचनस्य इयाडियाजीकाराणामुपसंख्यानमिति
ईकारादेशे सप्तमी श्रूयते । तथा च सौ मौ औ रीत्यादौ न स्यादेवेत्यर्थः । तत्र दूषयति । तत्रापीति । तत्रापि सप्तम्या लुगेव न तु ईकारः । यदि स
रसीशब्दो वर्तते । असंदिग्धे संदिग्धवचनमेतत् । शक्यापि चेत्स्नातुमिति यथा । अस्ति हि सरसीशब्दः दक्षिणापथे हि महान्ति स
रांसि सरस्य इत्युच्यन्ते इति भवेगिदुक्तेः । कासारः सरसी सरः इत्यमरकोशाच्च । तथा च सरसीः परिशीलितुं मयेत्यादिप्रयोगा अ
तिध पि दृश्यन्ते । एवं च सरसीशब्दोऽपि लुप्तविभक्तिक एवेति वचनात्तदन्तविधिरिति स्थितं । ननु सैरीसामन्तु सरसीशब्दः सरःशब्दोऽपि सांतो नि
र्विवाद एव । तथा च सांतादेव ईकारादेशोऽयमस्तु । एवं हि सति संज्ञाविधौ ज्ञापकात्तत्सप्तम्यस्य तदन्तग्रहणस्य पुनरप्यत्र न कर्तव्यं भव
तीति चेन्न । तथा सति ईकारस्य सुप्त्वेनानुदात्ततया सरःशब्दस्य च सर्वधातोरसुनित्युणादितस्य नित्स्वरेण सरसीति पदमाद्युदात्तं प्रस
ज्येत । गौरादि पुष्पिप्पल्यादयश्चेति पाठात् । पिप्पल्यादयन्तः पातितः सरःशब्दात् ङीषा तु अन्तोदात्तं न सिद्धिष्यते । तथैव वेदपाठात् । एवं

तर्हि प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणं नास्तीति ज्ञापनायेदमर्थग्रहणमस्तु । एवं च ईदूदेद्द्विवचनमिति सूत्रे ईदूदेदन्तं द्विवचनान्तमिति पक्षे ईदूदेदन्तं
७२ यद्द्विवचनं तदन्तमिति पक्षे च असमर्थितो भवति । तत्र हि कुमार्योरगारं कुमार्यगारं अश्वक्रौ? श्वक्रौ संपद्येतां शुक्ला स्तां वेत्यत्र सत्रातिव्याप्तिरिति दो-
षः स च प्रत्ययलक्षणविरहाद्बोध्यस्तदुत्साह ज्ञापकमिति । प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणं नाव स्येति शेषः । ईदूदेदं ज्ञापनमुपयुज्यते तदा
ह तदन्तत्व इति । तदन्तत्वग्रहणे पक्षद्वयेऽपीत्यर्थः । ननु संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेरभावादेव तदन्तपक्षस्तत्र न स्थित इत्यपरितोषादाह भावेति ।
वाच्यत्वमध्याहार्यमित्यर्थः । अत्रेदमवधेयं । अविवक्षितं त्विमईदिति सूत्रादीदित्यनुवर्तमाने याप्पोः किं दूत्वं वा तत्सप्तमी इति सूत्रार्थः ।
व्युत्पादितं । पीत्यनेनेति यद्यपि मुक्तिमार्गः । पिबति रसानिति पाति वा लोकमिति पपीः सूर्यः । वातप्रमिमीते संमुखं धावनादिति वा
तप्रमीः । निःश्रेणीमिवाकृतिः । वातप्रमन्नामा पशुविशेषः । एभ्यः स्त्रियां पितृस्त्रौ सवर्णदीर्घे पपी पपीनामप्र मीइति रूपं निर्विवादं । तथापि
हर्षूयमाणस्य ईकारस्य सप्तमीत्वानवापि सरसी यदीत्यसंगतं ईकारस्य श्रूयमाणत्वासंभवात् सामर्थ्यान्तदन्तविधिर्भविष्यतीति हि तस्या-
र्थः । तस्माद्धकारान्तं श्लोका मर्थ्यान्तदन्तविधौ बध्ये सोमो गौरी अधि श्रित इत्यादावपि भविष्यतीत्याशयः कव्यः । पपी भ्रा मसकू इत्यादौ तु आध्येन प्रकृतिभा-
वेन । नचाप्ययोगः अर्थद्वलः तथाविधानामेवोदाहरणत्वेनोदन्तत्वादिति वाच्यं । मुनित्रयोक्तिं विनाप्यस्मादिधयाथांदसत्यत्वेऽनेऽतिप्रसंगात् ।
लोके प्रगृह्यत्वं न भवतीत्यस्मिन्नर्थे प्रमाणमनुपलं भाच्च । अप्रतिबिद्धमनुमतं भवतीति न्यायेन लोके पि पपी पपी वातप्रमी इत्येषां प्रगृह्यत्वं स्ये
वन्याप्यत्ता श्च । अत एव ईदूदेवनुच्छिति सूत्रे ईदृशे चेति वार्तिकमुपादाय कृत्प्रत्ययः स्वादेशश्चार्थं दस्येन । भाष्ये सहदृश्या सदृसुदाहृतत्वा-
दित्केचिदिति । व्याचक्षाणामुदाहरणतायेदेव्यर्थदसत्वं वदतां मते त्वस्यापदितोपमाविशकुरितिदिक् ॥ दाधाघ्वदाप् ॥ दारूपा धारूपा

26 अथात्र घुसंज्ञाः स्युः । दाप्दैपौ वर्जयित्वा । तत्र दारूपाश्चत्वारः । डुदाञ् प्रतिददाति । दाण् प्रतियच्छति । दो प्रतिद्यति । देङ् प्रतिदयते । धारू
पौ द्वौ डुधाञ् प्रतिदधाति । धेट् प्रतिधयति वत्सो मातरं । अदाबिति किं । दाप् लवने । दातं बर्हिः । न निसार्थः । घुसंज्ञाभावान्न दोदद्घो
रिति न प्रवर्तते । दैप् शोधने । अवदातं मुखं । इह घुसंज्ञाभावाच्च उपसर्गात् इत्येतन्न । घुप्रदेशाः नेर्गदनदेत्यादयः । इह दोदेङ्धेटां
नुकरणं निव्यवस्थापनार्थं प्रकृतिवदनुकरणमिति अतिदेशादेचउपदेशे ह्विलीत्वाद्वे क्रियते अनैमित्तिकमात्वं शितितुप्रतिषेध इति
सिद्धं तात् । न चैवं विभक्तेरुत्पत्तिर्न स्यात् । अथानुदितिप्रातिपदिकसंज्ञानिषेधादिति वाच्यं । अथानुदितिहि पर्युदासोऽयं न तु प्रसज्य
प्रतिषेधः । अस्ति चेहत्स्वार्थ अयमर्थात् तुल्यं । यद्वा यत्नदेते ... दाविवेहापि कार्यविशेषपुरस्कारेणैव अतिदेशः प्रवर्तनीय
विष्यते । तत्रैव तुल्यं दारूपात्त्वे घो अधारूपयोरेकशेषं कृत्वा द्वन्द्वः कर्तव्यः । प्रणिदातेत्यादौ कृतात्वानां दो देङ् धे टां तु स्यान्निवृत्त्या
सिद्धं पुत्वं लक्षणप्रतिपदोक्तपरिभाषया । निरनुबन्धकग्रहणे न सानुबन्धकस्येत्यस्या अनेह प्रवृत्तिः । सर्वेषां स्वरूपेणैवानुकरणत्वात्
अत एव दारयतिधारयत्योर्नास्ति प्रसंगः । तयोरनुकरणे आत्वासंभवेनेह दृष्ट इत्यनयोरनुपादानत्वात् । न च कृतात्वेष्वपि चेन्निर्दे
शात् प्रणिद्यति प्रणिधयति इत्यादौ चात्वविरहात् कथं घुत्वमिति वाच्यं । नहि वयं कृतात्वेषु मनुकुर्मः येनोक्तदोषः स्यात् । अपि
तु दद्दोधेइत्येतेषामनुक्रियमाणेषु लक्षणवशात् निष्पन्नमात्वं भिन्नं । न च लक्षणेन रूपान्यत्वे पि अनुकरणं नाद्रियते । म
ध्युरसेवुह्वातिसूत्रापि स्वरूपप्रतीतेः । गविधियमाहेत्यत्रो शब्दप्रतीते । दोऽरुनु नेहग्रहणं । तदनुकरणे आत्वासंभवात् ।
वार्त्तिकमतेन अन्तानां दाङादीनामात्वविधानात् । साप्येतत्त्वे ङिमिनेपरतस्त्वद्विधानात् । तेनदाऽरु... ... तेपि घुसंज्ञा

विरहात्सन्निपातेत्यग्रे नेर्गदेति निसेत्वात्वं न भवति। घुरेवेति भावे तिवैकल्पिकं तु स्यादेव। तथा उपादात्मनस्य स्वरः शिक्षायां सेत्यत्र स्याच्चोरि श्चेति द्वयं
न भवतीति सत्यकार मते। ननु स्मिन्प्रत्यये दापूर्वे पावंतुकतौ न वा। आद्ये अननुक्तदणोपयुदात्तो भयसामर्थ्यात् योघु संज्ञा विकल्पः स्यात्। अंते
अदाबितित्यर्थं स्यात्। अननुकूलत्वाद्देवस्यापूर्वे योघु संज्ञाभावमिति विरहादिति चेन्न। अदाबित्यस्मिन्न सतितयोरुप्यनुबन्धको संभाव्येत। नहि
लक्षणैकचक्षुषा दोदेङानांदानां दापूर्वे यो अवैलक्षण्यं किंचिदनुभूयते। यद्दुत्वा द्वहलोग्न्वहलो व्यवस्थाप्येकानां। व्याख्यानतो विशेष
प्रतिपत्तिरिति पदमवधि व्यते किंतु अगतिकगतिरेवा। अत्र भिधानेवद्। नच तद्वलेन सिद्धस्य प्रत्याख्यानं शोभते। कार्तिककार
मते तु प्रयोगस्याप्यत्र मेवदाधारूपाल्लोमिदमनुकूलं। न चैवं प्रणिपतति प्रणिदयतद्वत्स्यादेशितिन स्यात्। आत्वाभावात्। तथा देङ्
रक्षणे अदितेत्यादे। व्युत्पादितं। प्रणिदाता प्रणिधाता तेत्योदावपि न स्यात्। आत्वस्य लक्षणाप्रतिपत्वात्। लक्षणप्रतिपदोक्तयोः
प्रतिपदोक्तस्यैव ग्रहणमितिवाच्यं। वचनबलेनैव तत्समाधानात्। तथा चमूल्यायनेवातिर्कं। घुसंज्ञायां प्रकृतिग्रहणे शिदर्थमि
ति। भाष्यकारीयास्तु पठंति शिद्विकृतार्थमिति। तथा च दाधा प्रकृतयो घुइति पठित्वोदात्त्वधाश्च प्रकृतय श्चेति द्वं द्वं कृत्वा सन्निधा
नाद्दाधामेव प्रकृतयइति व्याख्येयं। भाष्यकारास्तु वार्तिकं प्रत्याचख्युः। तथाहि। नेर्गदेति सूत्रे तावदवश्यं प्रकृतिग्रहणं कर्त
व्यं। प्रणिमयते प्रणयमयते सत्त्वापत्तिस्त्वं यथा स्यात्। तदेव पुरस्तादपकृष्य घुप्रकृतिमाङिति पठिष्यामः घुश्च प्रकृतिश्च माश्चेति द्वंद्वः। सन्नि
धाना घपूर्वोत्तरयोः प्रकृतिर्न गृह्यते। नचैवं मीनातिमिनोत्योरपि माप्रकृतित्वाद्ग्रहणापत्तिः। माङोङकारानुबंधस्यैवतत्रावश्यं
पठनीयत्वात्। अन्यथा मामानेद्यत्रातिप्रसंगात्। तस्मात् घुप्रकृतिमाङिति पाठेन प्रणिपतति प्रणिदयतद्वत्स्यादेः सिद्धत्वात् शिदर्थता

वत्पुंसंज्ञा यो प्रकृतिग्रहणं नवक्तव्यमिति स्थितं । भारद्वाजीयो ऽकरीस्य विकृतार्थवद्वक्तव्यमिति पुनरवशिष्यते । तदपि न । गामादाग्रहणेष्वविशे
ष इति परिभाषयैव लाक्षणिकस्यापि दारूपस्य घुसंज्ञासिद्धेः । अस्याश्च परिभाषाया दैपः पित्त्वं लिंगं । तद्धि अदाबिति सामान्यग्रहणार्थं क्रियते
२७ ते लाक्षणिकत्वादेव घुसंज्ञायां दैपग्रहणाभावे तु दिवि निषेधे सामान्यग्रहणार्थेन पित्त्वेन । न चैवमपि दैपो घुसंज्ञा न स्यादेवेति वाच्यं । दोदद्
घोरित्यत्र धेतिनिर्देशस्य ध्वंक्रियमाणेन दद्वयनेन धे टो पि घुसंज्ञाज्ञापनात् । न च दधातिनिर्देशस्यार्थवद्ग्रहणमिति वाच्यं । तत्र दधातेर्हि रिति
त्यादेशविधानादेव दधातोप्रसंगात् । नन्वेवमपि गामादाग्रहणेष्वविशेष इत्यनेन लक्षणप्रतिपदोक्तपरिभाषायाः निरनुबंधकग्र
हणे इति परिभाषायाश्च यथा बाधस्तथा अर्थवद्ग्रहणपरिभाषाया अपि बाधः स्यात् । तथा च प्रतिदारयति प्रणिधारयतीत्यत्रापि प्र
ति प्रसंग इति चेन्न । गदादीनां पउपसर्गत्वस्थानिमित्तादुत्तरस्यतानेव गदादीनूपसृउपसर्गस्य नेरिति व्याख्यानात् । दारयति धारय
त्यवयवयोस्तु दधारूपयोरनर्थकत्वान्न तेभ्य उपसर्गत्वं । यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा इति वक्ष्यमाणत्वात् । न चै
वं प्रणिदापयति प्रणिधापयतीत्यत्रापि णत्वं न स्यादिति वाच्यं । तत्र पुगागमात्पूर्वं दाधाइत्येवस्थाया घुसंज्ञाप्रवृत्तौ पुग्विधिरित्यस्या
पि घुग्रहणेन ग्रहणात् । अनागमकानां सागमका आदेशा इति पक्षे तु स्थानिवद्भावेन घुसंज्ञासिद्धेः । ननु नांतर्यमेवैतयोरंतर्यस्त
प्रयोगेनानप्रोश्वेदन्यदर्थवदिति स्थाने तरतमसूत्रस्थभाष्यरीत्यान्तरपत्यादेरपि दापयत्यादिसाम्यमेव । निष्पन्ने स्यान्तरोपरस्त्या
मुपगमे न रेफपुक्योर्विशेषादिति चेत्सत्यं । सिद्धं तु प्रसंगे रपरत्वादि स्पुरणत्वरपरसूत्रस्थवार्तिकरीत्या समाधानं कृतं । उक्तं भाष्यदीपिका
तु प्रसक्तोद्देशः प्रागुक्तसूत्रेकारमतमाश्रित्योद्भर्तव्यः । नहि दृष्टे इत्यमपोरनुपरलो आलंलभ्यत इति दिक् । इदं लवधेयं । प्रणिदापयती

त्यत्रापि उपसर्गयोः प्रकृत्यर्थविशेषणत्वेनासत्त्वेन नेर्गदेति नित्यं णत्वं । त्वं त्वर्थविशेषकत्वे तु घुसंज्ञकं प्रत्यनुपसर्गत्वात् शेषे विभाषेति विकल्प एव न तु नित्यं णत्
त्वमिति । स्यादेतत् । उपदिष्टधातुरूपस्यात्र सन्निमीमेति सूत्रभावः स्यात् । वार्तिककृता घुसंज्ञायां प्रकृतिग्रहणात् । सत्यं कारणं भाष्यकाराशयोस्तु ना
सौ दोषः । सूत्रकृता दीङो न नुक्कृतत्वात् । भाष्यमते णत्वे प्रकृतिग्रहणेऽपि घुसंज्ञा यांत दिन्नहादिति वैलक्षण्य । वार्तिकमते चिने यदा प्रकृतिः एतं
तानामत्वविधानाभ्युपगमात् । न चैवं आदन्तत्वनिबंधनयुक्प्रत्ययापत्तिः । तत्राकारान्तलक्षण प्रत्ययविधिरिति वचनेनैव तत्सिद्धेः ।
भाष्ये त्वेतद्वचनप्रत्याख्यानापर ङिद्विषये आत्वं सिद्धमिति ताभिरन्यदेतत् । इदं तत्त्व शिष्यते । भाष्यवार्तिकोभयमते पिउ पादासत्तास्य स्वरः श्रि
क्षकस्येत्यत्र स्याधोदिती त्वं प्राप्तं । तत्र भाष्ये तन्निपातनपदि भाषया परिहृतं । उपदिष्ट इति स्थिते ङिद्विषये प्रवर्तमानं आत्वं सिचोऽकित्व
मुपजीवति । यदि चात्र घुसंज्ञा स्यात् । तर्हि स्थाघ्वोरिच्चेति सिचः कित्वं स्यात् । अतोऽकित्वमुपजीव्य प्रवृत्त आकारः कित्वं प्रवर्तितं घुसंज्ञा
नप्रवर्तयत्येवेति । वार्तिककृता तु दीङः प्रतिषेधः स्थाघ्वोरित्त्वे इति वचनमेव कृतं । उभयमते पिदीङ्सूत्रादात्वे कृते प्रणिदातेत्यादेर्नो
देति णत्वं भवति । अत एव वार्तिककृता दीङः प्रतिषेध इत्येव नोक्तं किंतु स्थाघ्वोरित्त्वे इति विषयविशेषो निर्दिष्टः । तच्च मते तु न भाष्यं णत्
त्वेनेति स्पष्टमेव । किंच । भाष्यवार्तिकयोर्न केवलं सूत्रकृता सह विरोधः किंतु परस्परेणापि । तथाहि ॥ भाष्यमते प्रणिदीयते प्रणिदीनं इत्या
दावपि नित्यं णत्वं णत्वविधौ प्रकृतिग्रहणात् । वार्तिकमते तु वैकल्पिकं । एतं तानामेव प्रकृतित्वाभ्युपगमेन ईदं तस्याप्रकृतित्वात् । अन्यथाउ
पदिदीधातद्रूपस्यैव सन्निमीमेति सूत्रभावापत्तेः । तदेवं प्रणिदातेत्यादौ सूत्रकृता सह द्वयोर्विरोधः । प्रणिदीनं इत्यादौ तु भाष्यकृता सह इतरेतरयोर्विरोधो
उपदिहर इति । अत्रेदं वक्तव्यं । यथोत्तरं मुनीनां प्रामाण्या हृष्यो करी सा सर्वत्र दाङि परे नेर्नित्यं णत्वमिति स्थिते सत्यं वार्तिकमते पिदृशेष

विभाषेति व्यवस्थितविभाषामाश्रित्य भाष्याविरोधः संपादनीयः । एवं वाक्यभेदेन सर्वनिर्वाहसंभवे मतभेदकल्पनं न स्यान्नाश्रयणीयत्वादिति । ननु
२४ अदाविति प्रतिषेधे दापलवन इत्यस्यैव ग्रहणं प्रयुक्तं न तु दैपः । पकारे श्रूयमाणे आत्वायोगादिति चेन्न । अनुबन्धा अनेकान्ता इति पक्षे श्रूयमा
णस्यापि पकारस्य ककारादिवदनवयवत्वेन धातोरेजन्तत्वानपायेनात्वप्रवृत्तेः । एकान्ता अनुबन्धा इति पक्षे विभक्तस्यैवात्वं । नानुबन्धकृतमन
नेजन्तत्वमिति सिद्धं तावत् । अत्र च उदीचां माङो व्यतीहार इति निर्देशो ज्ञापकः । न च माङ् मानइत्यस्यैवायं निर्देशः । व्यतिमिमीते इत्यादौ त
स्यापि प्रदाने व्यतीहारे दैपोऽपि संभवादिति वाच्यं । अपूर्वत्वात्तदर्थस्य एकवाक्यसमस्य माङ् मानेइत्यस्मादनभिधानात् । अत्र च भाष्यकारोक्तेरेवं
प्रमाणत्वादित्याहुः । एवं च मेङ् इत्येव पठनीये माङो व्यतीहार इति गुरुकरणं नानुबन्धकृतमनेजन्तत्वमिति ज्ञापनार्थमेव । भाष्यकारास्तु मा
यं देपूर्विं तु दिवादिपुस्तकपूश्शोधने इत्येव पठिष्यन्त इत्याहुः । न च स्वरे भेदः दायतीत्यादेरुभयथापि प्राप्त्युदात्तत्वात् । ननु ताच्छिल्ये चानशि
दायमान इत्यत्र स्वरे भेदः श्यनि धातोराद्युदात्तत्वं । शपि तु चानश्यौतोदात्तत्वमिति चेन्न । उभयथापि तोदात्तत्वानपायात् । नन्वेवमप्यनुक्तस्व
रस्य प्रतिशिष्टत्वेन प्राबल्यमिति वाच्यं । अन्यत्र विकरणेभ्य इति पर्युदासात् । आत्मनेपदेष्वन्यतरस्यामिति भाष्यकृत्पदवत्त्वेन स्वशीवचानश्यप
पि अन्तोदात्तत्वेनानापि प्राग्निर्लोपात् । स्थानिवत्त्वेन समस्यके परं गुणस्तु दकारस्वरस्तु च स्य भाष्यस्योक्तिभ्यां विरोधात् सामान्यादिवद् इति वक्ष्यते । प्याप
त्यादयस्तु दिवादिष्वेवादन्तत्वेन न पठिताः गणकार्यमनित्यमिति ज्ञापयितुं । तेन न विश्वसेदविश्वस्ते । पथिकृवनिताः प्रत्ययादाश्च सं
सइत्यादि सिद्धं । यत्तु भाष्ये एकान्तत्वपक्षे पिनद्धा इत्यत्र पकारस्य पकारलोपे कृते भविष्यति । दापूत्वं तु भूते सर्वमनुबन्धमाश्रित्य संरुत्पाद
नीयमिति सिद्धान्तितं । तत्र एषां प्रत्यवतिष्ठते । सत्यप्येजन्तत्वे उपदेशे एजन्तत्वं कथमिति । अत्रोच्यते । पित्करणसामर्थ्यादुपदेशे एजन्तत्वाभावेपि
आत्वप्रवृत्तिः । वस्तुतस्तूपदेशग्रहणं भाष्यकारेण न मन्यते । तथा चेतत्र वक्ष्यति । उपदेशग्रहणं न करिष्यते । यत्तूपदेशग्रहणम

करिष्यते चेत्तान्तो तेष्वपि प्राप्नोति। अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति न पदनिमित्तस्यान्तवदात्वं भवतीति। यदयं क्रीङ्जीनां णौ च आत्वं शा
स्ति। नैतदस्ति ज्ञापकं विषमार्थमेतत्स्यात्। क्रीङ्जीनां णावेवेति। यस्मात् हि मीनातिमिनोतिदीङां ल्यपि चेत्यत्र एज्ग्रहणमनुवर्तयिष्यतीति
न तु मलिदपयतीत्यत्रापि अन्तरङ्गत्वाद्विति प्रतिषेधः स्यात् इति चेन्न। यथोद्देशपक्षे तदङ्गत्वाद्वस्था पानेव पुसङ्गाया निर्वर्तनत्वात्। कृता
र्थत्वपक्षे तु पुसङ्गायाने त्वसमानदेशत्वात् यथा पुक् प्रतिपत्तिर्पुसं तद्योरसिद्धत्वेन प्राप्नोति पुक् ततो घुसंज्ञा न स्यादिति दोषः प्रसज्ये
त। अत एव भाष्ये दूषणं समाहितम्। तद्यथावपि दिति वक्ष्यामि। यद्भावात्त्वात्तोधात्। सत्यमपि बान्तम्। वृत्त्वेन सर्वत्र पदकार्ये निर्दिष्टः। अ
लोपयतीत्यत्र न सोऽनिषेधस्त्वस्याप्यादत्वान्तत्वान्वेति॥ आपतत्वेव एकस्मिन्। अन्तरङ्गेऽपि आत्त्वविधाविव कार्यालिङ्गः। लोप
गवः। यथा तस्यादीनां प्रत्ययाद्युत्तरत्वं प्रवर्तते। एवं इहापि। आत्वम्। यथा वृक्षाभ्यामित्यादौ सुपि चेति दीर्घत्वं भवति। तद्वदिह
पि। ईङ्गतौ दिवादिः। एयं। अचोयदिति यत्नोत्तौ विधीयमानो यः स्वपो यथा चेयमेयमित्यादौ भवति तथेहापि। इल
न्तु एति स्तु इति स्यपि ह्रस्वमित्येव रूपं न तु एयमिति। एकस्मिन्निति किम्। सभासन्नयने भवः साभासन्नयनः। अत्र हि आकारस्य
आदित्वे सति नमेवात्रिस्य सभासन्नयनशब्दस्य वृद्धत्वं स्यात्। ततश्च अणं बाधित्वा वृद्धाच्छ इति छः प्रसज्येत। ननु वृद्धिर्य
स्याचामादिरिति सूत्रे आदिग्रहणस्यापि दर्शनव्यावर्त्यं। तत्सामर्थ्यादेव सभासन्नयनशब्दे वृद्धसंज्ञा न भविष्यतीति चेन्न। यदि
हि वृद्धसंज्ञासूत्रे आदिग्रहणसामर्थ्यादनातिदेशिकस्य मुख्यस्यैवादेर्ग्रहणं नाहिं शालनातीति शालाप्रत्याहारादिरसहायोपि वृ
द्धेर्न स्यात्। ततश्च शालायां भवः शालीयः इत्यादि न सिध्येत्। असति हि प्रकृतसूत्रे असहायस्यैकस्य ग्रहणे यत्र आदिव्यपदेशो मुख्यो नास्ति अ

29 सहायमध्ये अंते च सत्त्वेऽप्यविशेषादतिदेशस्य विषयः स्यात्। यदि तु अतिदेशसामर्थ्यात् साक्षादेव दृष्टं तर्ह्यविशेषाज्जातसभासंनयनेऽपि
स्यात्। वृद्धसंज्ञायामादिग्रहणं तर्हि व्यर्थमेवेति चेत्। हंतैवं अतिदेशस्यादिग्रहणस्य च सामर्थ्यात्सर्वत्र विध्यापत्तिः। इह एकग्रहणे
कृते तु अंतमध्ययोर्व्यावृत्त्यार्थं वृद्धसंज्ञायामादिग्रहणं सार्थकमिति दिक्। यत्तु न्यासकृतोक्तं। अतिदेशसूत्रे एकग्रहणाभावे वृ
द्धसंज्ञासूत्रस्य मादिग्रहणं अनातिदेशिकप्रतिपत्त्यर्थं स्यात्। असहायादीनां शालादीनामेव वृद्धसंज्ञां बाधयेत्। न तु सभासंनयन
स्य। सभासंनयने ह्येतदंतर्गतां श्रुतरोऽभावोऽपेक्ष्य अनातिदेशिकस्यादित्वस्य तत्र सत्त्वादिति। तच्चिंत्यं। परस्मिन्सति यस्मात्पूर्वं ना
स्ति स आदिरिति सिद्धांतरीत्या मध्यस्येऽपि आदित्वविरहात्। इयानेव हि विशेषः। असहाये सत्यंत विशेषणविरहात् विशिष्टा
भावः मध्यस्थे तु विशेष्याभावाद्विशिष्टाभाव इति। वार्त्तिककारस्तु लोपवादपूर्वत्वमात्र मादिशब्दस्य प्रवृत्तिनिमित्तं।।
अनुत्तरमात्रं चांतशब्दस्य। न तु सत्यन्यस्मिन्निति विशेषणं। गौरवात्। तथा चासहायेऽपि मुख्ययोरेवाद्यंतयोः संभव इति
मन्वानः स्वयमेतदस्याचख्यौ। आह च। अपूर्वानुत्तरलक्षणत्वादाद्यंतयोः सिद्धमेकस्मिन्निति। भाष्यकारस्तु नेतन्मेने। सत्यन्य
स्मिन्निति विशेषणपक्षेऽपि अयुक्तस्य गौरवस्य प्रामाणिकत्वात्। लोके हृदयमादिरंतो वेत्युक्ते अवशिष्टमपि किंचिदस्तीति निय
मेन प्रतियंति। पदान्निपततो पक्षिण इति आशास्तिसाध्या। अनुभवमपलप्य एकदेशमात्रेऽशान्तिकल्पने तु श्वश्रुरादिपदानामपि लो
पवाद्यापत्त्वेमात्रं पि तत्त्वेमात्रं तद्दृष्टं पुत्रस्य मातेत्यंशाशक्यतावच्छेदकं स्यादिति विशिष्टविषयकशाब्दबुद्धेरनवच्छिन्नविशिष्टव्यवहा

स्याकोपः स्यादिति । ननैवमपि व्यपदेशिवद्भावेनैकतः स्वमेव । इयाय आरद्ध स्यादौ धात्ववयवत्वं प्राथम्यं एकाच्त्वं चाश्रित्य द्वित्वं यथा स्यात् ।
एकाच इति हि बहुव्रीहिरिति वक्ष्यते । नचैवं लोके व्यपदेशो यो वर्तते स च ह्रस्वपरत्वे कृते भावे आरद्ध इत्यत्र योरेकाच्त्वं पदादेरिव मुख्यत्वे
वास्तीति वाच्यं । ह्रूर्वं च नेनीतिरूपाति देशेनेद्वः अनयोरेव द्विरुक्तेः । किं च यजेः पंचमलकारे सदेवान्यस्यादि जितो यजी यानि स्वादौ प्रिपे
कृते इति सिषत्स्यपत्वे व्यपदेशिवद्भावेनैव साध्यं । प्रत्ययस्य यः सकारः तस्य षत्वमिति सिद्धत्वात् । तस्माद्व्यपदेशिवदेक
स्मिन्निति सैव सत्यता किं प्रकृतसूत्रेण । व्यपदेशो नाम विशिष्टो मुख्योऽपदेशो व्यवहारः एकाजित्यादिः सो यस्यास्तीति व्यपदेशी
यच्चिप्रत्ययः तिः । तस्मिन्निवासहाये विकार्यं स्यादित्यर्थः । अत्राह भाष्यकारः । अवचनाल्लोकविज्ञानात्सिद्धमिति । वचनं निरपेक्षा
लोके व्यवहारादेव व्यपदेशिवद्भावसिद्धेरादन्तवदिति व्यपदेशिवदिति चोभयमपि न सूत्रयितव्यमित्यर्थः । अस्ति च लोके निरूढोऽयं व्यवहारः ।
अयमेव मे ज्येष्ठः पुत्रोऽयमेव मे मध्यमोऽयमेव मे कनिष्ठ इति । तथा अस्तु तायामसोऽप्यमाणयां च प्रथमगर्भे लेहते इति व्यवहरंति ।
तथा पूर्वमनागतोऽनिअनाजिगामिषुरप्याह इदं मे प्रथममागमनमिति । ननु सर्वेऽपि मे गौणव्यवहाराः । तत्कथं मुख्ये चरिता
र्थं शास्त्रं गौणे प्रवर्तेतेति चेन्न । निरूढतरतया गौणस्यापि अस्य मुख्यसमकक्षत्वात् ज्ञापकाच्च । यदयं इट् दीर्घो इति सि
चोऽजो यं ग्रहणं स्ति तज्ज्ञापयति व्यपदेशिवदेकस्मिन्निति । तथाऽन्यथा सिच इट् इत्युच्यते । वस्तु रूपत्वे पि वलादित्वविरहात् । तथादि
र्घ इटः किंतीत्यादावप्यपिठ्ठापकानि । नहि व्यपदेशिवद्भावं विनाइणोऽप्रयोगोऽन्यत इति दिक् । कैयटेन अर्थवता व्यपदेशिवद्भावाद पत्नु ९

30 कृते इत्यादौ तशब्दाकारस्यानर्थकत्वेन तत्र दीर्घसिद्धये आदिवद्भावो वचनेनैव साधनीय इति । अत्रेदं वक्तव्यं । अर्थवत्ताव्यपदेशिवद्भावद्वति
वचनावलोपपरिभाषा । तस्याविधेयत्वात् । व्यपदेशिवद्भावस्तु लौकिकव्युत्पत्त्या तं प्रति अंगत्वायोगात् । किंतु शास्त्रे व्यपदेशिवद्भाव
योजनायथार्थसमुदायमाश्रित्य तस्य लब्धदेशः अव्यवद् इति व्युत्पादयितुमर्थवत्तापेक्षितेति परं तस्याशयः । अत एव पक्षे निर्मोचना
दर्शका व्युत्पत्तेः व्युत्पादनावसरे भाष्यकृदुपरयो दनर्थकेनापि व्यपदेशिवद्भावः स्वीकृतः । लोके इव शास्त्रेपि अनर्थकस्य व्यपदेशि
वद्भावसंभवात् । तस्मादर्थवतेति प्रायोवादमात्रं । सूत्रप्रत्याख्यानं तु सम्यग्जेवेति स्थितं ॥ तरप्तमपौ घः ॥ तत्तो घसंज्ञौ
स्तः । कुमारितरा । कुमारितमा । घरूपेति ह्रस्वः । नद्यास्तरो नदीतर इत्यत्र न भवति । तमपा साहचर्येण प्रत्ययस्यैव तरपो ग्रहणा
त् । यद्वा । तरबिति रूपं संज्ञासमवतावाश्रितं । तदपरिनिष्ठिते प्रयोगे क्वापि नास्तीति औपदेशिकं गृह्यते । न चात्र तरप्प्रत्ययस्यैवा
स्ति । अपि च प्रतिपदोक्तत्वमपीह स्फुटमं । तेनावयववृत्तेर्व्युत्पत्तिर्नदीतरेनातिप्रसंगः । किंच । समानाधिकरणे स्त्रीलिंगे
पदे ह्रस्वत्वं विधीयते । अन्यथा महिषीवद्रूपं महिषीरूपमित्यत्रापि स्यात् । सुप्सुपेति समासः । महिषीवेषं आकृतिरित्यर्थः । सा
मानाधिकरण्ये स्त्रीत्वेवस्याविशेषणत्वात् । आतिशायनिकस्यवत्तः न तु नदीतरे । अतो नोक्तदोषः । न चातिशायनिके प्रकरण एव
तादीप् इति चिनोपद्वतिवा क्रियतां लाघवादिति चेन्न । प्रकरणोत्कर्षे लोकेह संज्ञाकरणस्यान्योपि तरबसौ तिङ्ज्ञापनार्थत्वात् । स
चानिर्दिष्टार्थत्वात् स्वार्थे भवति । तेनाप्याचतरं लोपचंवकवनरदइत्यादि सिद्धं । केचित्तु सामान्यापेक्षं ज्ञापकमाश्रित्य सर्ईपस्तु

नोपिस्वार्थिकतामाहुः। तेन अहो महीयस्तव स्वाहास्विनस्य मित्यादि प्रयोगाः समर्थिता भवंति ॥ बहुगणवतुडति संख्या ॥ एते संख्या संज्ञाः
स्युः। बहुकृत्वः। संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्। बहुधा। संख्याया विधार्थे धा। बहुभिः क्रीतो बहुकः। संख्याया अ
तिशदंतायाः कन्। बहुशः। बह्वल्पार्थाच्छस्कारकादन्यतरस्यामनुव र्तमाने संख्यैकवचनाच्च वीप्सायामिति शस्। गणकृत्वः। गण
धा। गणकः। गणशः। तावत्कृत्वः। तावद्धा। तावत्कः। तावच्छः। यत्तदेतेभ्यः परिमाणे वतुप्। आ सर्वनाम्नः। शेषं प्राग्वत्। कति
कृत्वः। कतिधा। कतिकः। कतिशः। किमः संख्यापरिमाणे डति च। शेषं प्राग्वत्। स्यादेतत्। वैपुल्येपि बहुशब्दो वर्तते। बहुर्हि
भवानिति। संघे च गणशब्दः। भिक्षुकगणो गच्छतीति। समवायश्चयो गण इत्यमरः। तथा च संघवैपुल्यवाचिनोरप्यनयोः सं
ख्यासंज्ञा स्यादिति चेन्न। संख्यायतेऽनयेत्यन्वर्थसंज्ञाविज्ञानात्। तस्मात्संख्यावाचिनोरेव बहुगणशब्दयोरिह ग्रहणं।
तच्च नियमार्थं। अनियतबहुत्ववाचिनां मध्ये अनयोरेव संख्यासंज्ञा न तु भूर्यादीनामिति। तेनाबहुविषययोर्द्व्येकयोर्निय
तबहुत्ववाचिनां त्र्यादीनां च न व्यावृत्तिः। ननु नियमार्थत्वे सिद्धे सजातीयापेक्षत्वान्नियमस्य लघुत्वमवस्यासिध्येत्। निय
मार्थत्वमेव तु दुरुपपादं। विध्यर्थतायां एवोचितत्वात्। तथा हि। अस्ति तावत्कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्यय इति। यदि
भाषा सा चेन्न्याय्यमत्र। संज्ञासूत्रेषु संज्ञिविशेषे नियम्यमानो हि संज्ञाशब्दः कथं तदितरं बोधयेत्। एवं स्थिते बहुगणयोरि
ह ग्रहणाभावे संख्याप्रदेशेषु ग्रहणमेव न स्यात्। अकृत्रिमत्वात्। तस्मात्तत्संग्रहार्थमेव बहुगणग्रहणं न तु भूर्यादिनिवृ

31 त्वर्थमिति । अत आह । संज्ञिविशेषे क्रियमाणे संज्ञानियमो यदि स्यात् सामान्यापेक्षस्तदा युक्ता अकृत्रिमस्य व्यावृत्तिः । विशेषपरत्वे तु सत्यतीयं
कृत्रिमं । न तु स्वमेव नियमेन व्यावर्त्यते न त्वकृत्रिममपि । तदेतदुच्यते उभयगतिरिह शास्त्रे भवतीति । कृत्रिमाकृत्रिमयोरुभयोरपि ग्र
हणमित्यर्थः । अस्ति च संख्याप्रदेशे भूयस्य ग्रहणे लिंगं । संख्याया अतिशदन्ताया इति सूत्रे शदन्तपर्युदासः । न हि कृत्रिमा संख्या श
दन्तास्तीति दिक् । तेन पंचकृत्व इत्यादि सिद्धं भवतीति । यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति तथापि वतुडत्योः केवल
योः संज्ञाप्रयोजनाभावात् सामर्थ्यात् तदन्तग्रहणं । तद्धितविधौ हि ङ्याप्प्रातिपदिकादित्यधिकृतं । न च केवलस्य प्रातिपदिकत्व
मस्तीति बोध्यं । एतत्सूत्रं भाष्ये प्रत्याख्यातं । बहुपूगगणसंघस्य तिथुक् । वतोरिड्वा । षट्कतिकतिपयचतुरां थुक् इति सूत्रैः
इडिति पदे आगमविधौ यस्मात् बहुप्रभृतीनां इटो निर्वाहकं संख्यासंज्ञां ज्ञापयतीति किमनेन सूत्रेण । ननु बहुपूगगणसंघेभ्या
दौ विशेषाश्रवणात् संघवैपुल्यवाचिनोरपि बहुगणशब्दयोः संख्याकार्यं स्यादिति चेन्न । अनियतसंख्यावाचिनोरेवे
तयोः संख्याकार्यं भवतीत्येतावन्मात्रज्ञापनेन चरितार्थत्वे सति सर्वथा संख्यामप्रतिपादयतोरपि संख्याकार्ये कल्पनस्य
गौरवपराहतत्वात् । पर्यादीनां तु अनियतसंख्यावाचिनां ग्रहणं न भवति । नियतसंख्यावाचिनां पंचादीनामेव लोके संख्या
शब्दत्वेन प्रसिद्धत्वात् । प्रसिद्धाप्रसिद्धयोः प्रसिद्धग्रहणस्य न्याय्यत्वात् । न चैवमपि बहुगणयोरिव पूगसंघादीनामवि
धाशब्दत्वसुजादि संख्याकार्यप्रसंगः । न च बहुगणयोः सामान्यापेक्षं ज्ञापकं पूगादीनां तु ऽदूविषयकमिति वाच्यं । अनुप

पत्नेः समानत्वेन लक्षणत्वोपादानं तेन च वैषम्येऽपि आभावादिति भैमैवं । लक्ष्यानुरोधेन क्वचित् सामान्यापेक्षं क्वचिच्च विशेषापेक्षं लक्षणं । मित्रा
अथ लाभत् । तदनुरोधेन वैरूप्यस्य स्फोटव्यत्वादिति दिक् । इकोऽकृतस्थित्समासहमानेनेन सूत्रकृता स्वप्रयोगे न मिति तु परमार्थः । अत्र
वार्त्तिककारः । अध्यर्द्धग्रहणं च समासकन्विध्यर्थं । अर्द्धेनाधिकमध्यर्द्धं । एकदेशवाचिनोऽयमर्द्धशब्दः । तस्याधिशब्देन समासो वृत्ते
योगिरत्यर्थः प्रतीयते । ननु संख्येति वार्त्तिकारंभः । अध्यर्द्धेन शूर्पेण क्रीतं अध्यर्द्धशूर्पं । दिक्संख्ये इत्यनुवर्तमाने च तद्धितार्थेति स
मासः । ततः शूर्पादञन्यतरस्यामिति अञ् ठञ् वा अध्यर्द्धपूर्वेति लुक् । अध्यर्द्धेन क्रीतं अध्यर्द्धकं । संख्याया अतिशदंताया कनिति
कन् । इह समासविध्यर्थमिति संबंधसामान्ये षष्ठी । समासे विधीयमाने समासनिमित्ते वा अन्यस्मिन् कार्ये विधीयमाने इत्य
र्थः । तेन द्विगुनिमित्तो लुगपि लभ्यते । तथा चाध्यर्द्धपूर्वेति सूत्रे अध्यर्थपूर्वग्रहणं न कर्तव्यं भवति । तद्धितेऽनुवृत्ते आग्रहण
मिति । अर्द्धपूर्वपदश्च पूरणप्रत्ययांतः । संख्येत्यनुवर्तते । पूरणप्रत्ययांतादुत्तरस्य पूरणप्रत्ययांतोत्तरपदद्वयार्थः । समासक
न्विध्यर्थमित्येव । अर्द्धपंचमं येषामिति बहुव्रीहिः । अर्द्धपंचमैः शूर्पैः क्रीतं अर्ध पंचमशूर्पं । पूर्ववदञ
ठञोर्वा लुक् । अर्धपंचमेन क्रीतं अर्द्धपंचमकं । अधिकग्रहणं चालुकि समासोत्तरपदवृद्ध्यर्थं । अधिकया षष्ट्या क्रीतः अ
धिकषाष्टिकः । अधिकसाप्ततिकः । तद्धितार्थेति समासः । प्राग्वतेष्ठञ् । अलुगिति वचनात् लुक् कर्तव्ये संख्यासंज्ञा नास्ती
ति द्विगुत्वमपि न । तेनाध्यर्धपूर्वेति लुङ् न । ततः संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिः । न त्वलुक्करणमित्यर्थः । उत्त

३२ रपदस्थध्वर्थमिति वचनादेवानुगमाभावस्याक्षेप्तुं शक्यत्वादिति चेन्न । अर्हत्सुधर्मा स्तरेष्वर्थेषु येऽस्य यास्तेषां लुगागमः स्यात्तस्यैनो नरपदस्थछेदः सार्व
काशत्वात् ।। ष्णान्ता षट् ।। षान्ता नान्ता च संख्या षट्संज्ञा स्यात् । षट् । तिष्ठन्ति । षट् पञ्च । पञ्च सप्तैत्यादि । संख्येति किं । विप्रुषः । पामानः ।
ननु शतानि सहस्राणि सन्निकृष्टेषु लेतत्स्य पूर्वमकृत यानान्ता संख्येति षट्संज्ञा स्यादिति चेत् । अत्र । नन्वेवं षड्भ्यो लुगिति लुक् स्यादिति चे संज्ञा२
यं । सर्वनामस्थान संज्ञि पातेन कृतस्य नुमस्तद्विधानत्वात् । न चैवमपि अष्टानामिति न सिध्यति । तथा हि । अष्टन् आमिति स्थिते
परत्वान्नित्यत्वाच्च अष्टन आ विभक्ताविति आत्वे कृते अनां नत्वात्संज्ञायामसत्यां षट्चतुर्भ्यश्चेति नुडागमो नेति चेन्न । यथोद्देशप
क्षे आत्वात्प्रागेव षट्संज्ञा । अंतरंगत्वात् । ततः कृते पात्वे एकदेशविकृतस्यानन्यत्वात् षट्संज्ञकत्वेन नुटः सिद्धत्वात् । कार्यकालप
क्षे तर्हि उक्तदोष स्तदवस्थ एव । किंच यथोद्देशे पदं विधित्वादतिदेशे दुर्लभः । अत एव वृत्तौ सत्र अचः परस्मिन्निति सस्य फलमिति के
यद् इति चेन्न । अष्टनो दीर्घादिति दीर्घग्रहणे नकृतात्वस्यापि षट्संज्ञाज्ञापनात् । तथा हि । न संख्यायाः इत्यानुदात्तत्वं वा विहि
यत्तादि पाठादंतोदात्तोष्टन् शब्दः सा विहितः । तस्याद्विभिरष्टाभिरिति रूपं । तत्रात्वाभावे मध्योदात्तं । आत्वपक्षे त्वंतोदात्तत्वे
मिति सिद्धांतः । तत्र षट्त्रिचतुर्भ्यो हलादिरिति सूत्रे ... षट्संज्ञापक्षे [illegible] द्विभिः स्यादविव विभक्तेरुदात्तत्वं प्राप्तं तद्बाधितं भूतपूर्वोपोनमभि
ति प्राप्ते षट्त्रिचतुर्भ्यो याऽजलादि विभक्तिस्तदंते पदे उपोत्तमम् उदात्तं भवतीति हितस्यार्थः । तद्बाधनायाष्टनो दीर्घादिस्यारंभ
ते । दीर्घान्तादष्टनः परा असर्वनामस्थानविभक्तिरुदात्ता भवतीति सूत्रार्थः । तत्र यद्यात्वपक्षे षट्संज्ञा न स्यात्तर्हि सावकाशोऽष्ट

नः स्वरः परत्वात्तथा आत्वपक्षे सत्यपि तन्मध्यपतितषट्स्वरेण बाध्यत इति किं दीर्घग्रहणेन । कृतात्वस्यापि षट्संज्ञायां सत्यां तु षट्स्वरस्यापि न
स्वरोपवादः संपद्यते । न चाष्टनः स्वरः श्रुतिस्थानेकाच इति वाच्यं । तथैकादेशे उदात्तेनोदात्त इति स्वरे तैरुपगतार्थत्वात् । अष्टन् शब्दे तो
दात्त इति समन्तद्विवेकत्वात् । तेन दीर्घपक्षेऽपि तदभावपक्षे विभक्तेरुदात्तता स्यादिति तेष्वात्वस्यार्थं क्रियमाणे दीर्घग्रहणं सार्थ
कमेव । तस्माद्दीर्घग्रहणेन आत्वपक्षेऽपि षट्संज्ञा ज्ञाप्यत इति स्थितं । न चैवं दीर्घग्रहणस्य आत्वविकल्पज्ञापकत्वं न स्यादिति वाच्यं ।
उभयज्ञापकत्वसंभवात् । न ह्येकेन एकमेव ज्ञाप्यत इति नियमः । यावता विना अनुपपत्तिस्तावतो ज्ञाप्यत्वात् । तत्रैकमनेकं वेत्य
न्यदेतत् । प्रकृते चोभयं विना दीर्घग्रहणं वैयर्थ्यानुष्टुत्यादिति दिक् । यदि तु छात्राः पकारनकारयोः आकारान्तं तेषु स्याः सा छन्दसि तिष्ठ
न्तेसत्य एव आकारोऽपि प्रक्षिप्यते तदा ह्यभ्यामित्यत्र षट्त्रिचतुर्भ्यो हलादिरिति विभक्तेरुदात्तत्वं स्यात् । आद्युदात्तं हि भ्याम
द्यहीस्यादेआद्युदात्तमेव तु दृश्यामिति पदं पठ्यते । तस्मादिह आकारप्रश्लेषो न वर्णनीयः । किं तु नकारप्रकार एवा
दर्तव्य इति स्थितं । तथा सति सर्वे योगविभागं कृत्वा तत्र दूर्लेनापि दृष्टानामा पद्ये समाहितं । तथा हि पञ्चम्यास्तु जिश्च
श्च इति विभज्यते । अष्टाभ्य औशिति सूत्रादष्टाभ्य इत्यनुवर्तते । तेन षड्भ्योऽप्युक्तं कृताकारादष्टनोऽपि तस्यादि
तिसूत्रार्थः । न चैवं जश्शसोर्लुगप्यतिदिश्यते इति वाच्यं । औश्त्वविधिवैयर्थ्यापत्तेः । अथवा । अष्टन आ विभक्ताविति सूत्रा
दनंतरं [illegible] राय इति योगं वाभिमत्य हलोसुभयो योगयोः शेषो व्याख्येयः । तेनाष्टानामित्यत्र नुटः पश्चादेवात्वं
न तु प्राक् । न चैवं जश्शसोरात्वं न स्यादिति वाच्यं । हलाचवार्थमष्टभ्य इति निर्दिष्टत्वे अष्टाभ्य औशिति कृता

३३ त्वनिर्देशेन अष्टशब्दोऽविषये आत्वानुमानात् । पञ्चात्वं तत्रैवोपयुक्तं यथा स्यादित्येतदर्थं हि तत्र डापोर्भ्यासार्थं कृतमिति । स्यादेतत् । हल्ङीति
पञ्चमयोः शेषस्त्वह प्रियाष्टन्शब्दे औजस्शसौ दृश्याष्ट टाङेङसिङसोसाम्सु वैकल्पिकं तथेष्यमाणमात्वेन सिध्येत् ।
न च तत्रात्वं नेष्यत एवेति वाच्यं । इतः प्राचीनपक्षालम्मतिव्याप्तिप्रसंगात् । तेषु ह्यात्वं प्राप्यत एव । विभक्तिमात्रे तद्वि
धानात् । न च षड्भ्यो लुगित्यत्र षट्चतुर्भ्यश्चेति सूत्राभ्यां विधीयमानौ लुग्नुटौ यथा गौणतायां न स्तस्तथा आत्वमपि न
स्यादेवेति वाच्यं । वैषम्यात् । लुग्नुटौ विधौ हि षड्भ्य इति षट्चतुर्भ्य इति च बहुवचननिर्देशात् तत्पदार्थप्राधान्य एव तौ
भवतैते । आत्वविधौ तु अष्टन इत्येकवचननिर्देशात् गौणत्वेऽपि प्रियाष्टाभ्यामित्यादावात्वं प्रवर्तत एव । परं गाङ्गिका
देन स्यात् तदुत्तरपदस्य चेति वक्ष्यमाणत्वात् । न च अष्टाभ्य औशिति कृतात्वनिर्देशेनानुमीयमाने मात्वं बहु
वचने प्राधान्ये च अष्टौ परमाष्टौ इत्यत्र यथा भवत्येवं गौणत्वेऽपि प्रियाष्टौ इत्यत्रापि भवतीति तन्निर्देशेनानुपपत्तिरिति वाच्यं । औश्त्वं
हि लुग्नुडाविव गौणत्वे न भवति । अष्टाभ्य इति बहुवचननिर्देशात् । अन्यथा हि कृतात्वानुकरणेऽपि एकवचने
नैव निर्दिशेत् । अष्टा औशिति अष्ट इति वा । स्पष्टं चैतदिहैव सूत्रे भाष्यकैयटयोः । तथा च औश्त्वविधौ कृता
त्वनिर्देशबलेनानुमीयमानमात्वमपि प्राधान्य एव स्यान्न तु गौणतायामिति तन्निर्देशोऽप्यनुपपत्तिसाम्यात् ।
तस्माद्धलि सुप्युभयत्र षष्ठ्येव स्यादात्वं प्रियाष्टनः । टाङेङसिङसोसाम्सु तथैवौजस्शसोर्दृश्यते । प्रागुक्तेषु तु

पक्षेषु भवेदात्वमपि प्राप्तिः । फलभेदे महत्येवं वक्ष्यं पक्षविकल्पनं । अत्रोच्यते । प्रियाष्टन्शब्दस्य अजादौ कालमनिष्टमेव । हल्यपि तु भवेतः शे
षस्य भाष्य एव सिद्धमिति तल्लाभः । तथा औजसोः कृत्येण प्रियाष्टौ प्रियाष्टा नइत्येवरूपं स्यान्न तु प्रियाष्टौ प्रियाष्टाइत्यपि स्यात् शं
क्य यथालक्षणं भवपुत्रेइत्यभिहितं तल्लाभ्यं च । अत एव यथालक्षणमिति प्रतीकमुपादाय न भवत्येवात्वमित्यर्थइतिकैयटो
व्याख्यत् । एवं स्थिते प्राचीनाः पक्षा अपहितोपमतस्तालव । अत स्थिते विभाषयाऽनोणतायां प्रथमादिषु आत्वं न भवतीत्याश
येन वायोऽयाः । उदाहृतं भाष्य कैयटप्रामाण्यात् । तस्मात् प्रियाष्टनः सर्वेषु वचनेषु राजन्शब्द साधारणं रूपं हलादौ तु हल
ल शब्द साधारणमपरं रूपं । औ शस्तु वेस्तु भाष्ये विवक्षितौ नेति प्रामाणिकाः पथाः । अत एव सर्वनामस्थानानीति सूत्रे हर
दत्तेन भोगतो औ शस्तु न भवतीति स्पष्टमेवाभिहितं । अत एवा ष्टाभ्य औशितिसूत्रे तदंतग्रहणं मन्ये ष्यते । परमाष्टौ इत्यु
क्ता प्रियाष्टान इत्यत्र आत्वस्याभावादौ शश्च न भवतीति काशिका संगच्छते । अत एव च अष्टन आविभक्ताविति सूत्रे तदंत
विधिश्चाश्रेष्यते प्रियाष्टो अष्टौ यस्य प्रियाष्टाइत्यपि यथा स्यादिति काशिकाग्रंथोऽपि संगच्छते । हलादावात्वनिबंधनत्वात् ।
एतत्तस्तु अष्टाभ्य औशितिसूत्रे प्रियाष्टान इत्यत्रेति वृत्तिग्रंथमुपादाय यथा पुनर्गौणतायामात्वं न भवति तथा तद्वि
धावेव वक्ष्यते इति प्रतिज्ञाय अष्टन आविभक्ताविति सूत्रे एकवचन निर्देशात् स्वरूपस्य ग्रहणं नार्थस्य तेनोपसर्जनि
प्यष्टनि भवति । तत्रापि विकल्पितत्वात् प्रियाष्टा प्रियाष्टानौ प्रियाष्टान इत्यपि भवति । तत्राप्यात्वपक्षे भसंज्ञाविषये औ
तोऽल्लोपमिच्छंति । प्रियाष्टः पश्येत्यादि । आत्वाभावपक्षे प्यल्लोपेऽपि तुल्यं । प्रियाष्ट्न इति भवतीत्यनेन ग्रंथेन पूर्वं प्रतिज्ञाता

= वार्तिकं प्रत्याचक्षाण इति। उच्चिच्छिषतीत्यत्रोपधीविवासइत्वस्यान्तरंगत्वाच्छे चेति तुक्प्रसिद्धिः पूर्वत्रासिद्धमिति चुत्वस्यासिद्धत्वात् तुक्विधिः। खिशब्दो हि दूष्यत इति तुक्त्वः शेषे प्राप्ते छकारश्रवणे वाधं वार्तिकं प्रत्या =
= चक्षाण इत्यर्थः। न कर्तव्यमिति। उच्चिच्छिषतीत्यत्र तुक्छो पेधकारश्रवणेपि तस्याभ्यासीयस्य चर्त्वं प्रसिद्धमिति पुनस्तुक्प्रसंगेन भवति तु छिसत्राभ्यासीयस्य सिद्धत्वादादेशादिलोपादन तर्के दसे =
= त्येच प्राप्ते सिद्धकांडे पठितव्योऽभ्यासजश्त्वचर्त्वमेतत् तुक्छे इति वार्तिके एत्वतु गहणेन कर्तव्यमित्यर्थः =

३५ र्वविधपरीतं भाष्यवदस्यादि विरुद्धं न च कथमपि हितवाक्षितितस्याशयं स एव प्रष्टव्यः। अल्लोपे पूर्वत्वमित्यपि तद्युक्तिश्चिंत्यैव। पूर्वस्मादपि
विधौ अल्लोपस्य स्थानिवद्भावेन पूर्वत्वायोगात्। न च पूर्वत्रासिद्धीयेन स्थानिवदिति निषेधः। तस्य दोषः संयोगादिलोपलत्वणत्वे
ष्विति सावर्णवाद्यत्वात्। ननु द्वयोः भ्यां नो णः इति प्रतिपदोक्तं णत्वं तत्र गृह्यते। ननु ष्टुत्वविधिर्विल्वमपि विलंब्य प्रतीति कृत्वादि
ति चेन्न। अपदांतस्य मूर्धन्य इति सूत्रं सं पूर्वं षाभ्यामिति सूत्रेनुवर्त्य तत्रत्यस्य णत्वग्रहणस्य पदांतस्येति निषेधसूत्रस्य च
भाष्ये प्रत्याख्यातत्वात्। पचोतरं मुनीनां प्रामाण्यात्। न च मूर्धन्यश्रवणेन पूर्वश्रवणेन वा निर्वर्त्यमानेन णकारेणैव षष्ठ्यमस्ति।
सूत्रकारशीलावृथं चितत्वं भवनत्र पिव्याया पोत्र भाष्यानुरोधात् तत्स्यागस्यएव। तथा चशर्पूर्वाः खय इति सूत्रे खयपूर्वग्रहणं
कर्तव्यमिति वार्तिकं प्रत्याचक्षाणो भगवान्नाह अभ्यासजश्त्वचर्त्वं सिद्धमिति खय एत्वतु ग्रहणं न कर्तव्यमिति। तथा
चहलादिः शेषे कर्तव्येपि तु कृप्रभुत्वेन निष्पन्नस्य चकारस्यापि चर्त्वेन सिद्धतया उच्चिच्छिषतीति रूपं सिद्धमिति तदाश
यः कैयटेन वर्णितः। [redacted] तदेवं प्रियापूद्दस्यायेन रूपमुचितं। न चैवं पूर्वसिद्धस्यादानपि नकारएव पठ्येतेति वाच्यं। तत्रा
दृकुप्वाङ् इति सूत्रे णत्वप्रवृत्तेरिति दिक्॥ डति च॥ ष्णांता संख्या षट् संज्ञा स्यात्॥ कृति संति। कस्य ड्याश्वीः। षट्
त्वोऽप्रशस्तोऽर्द्धकं। संख्येति किं। पात्वेई ति। पतयः। नन्वाद्यस्य संख्यासंज्ञापि स्यादिति वाच्यं। ननु साहचर्येण तत्र त
डितस्यैव ग्रहणात्। इदं प्रत्याख्यातं भाष्ये। बहुगणवतु संख्या। डति। संख्येत्यनुवर्तते। ततः ष्णांता षट्। संख्या डतीसुभ
यमनुवर्तते। पूर्वसूत्रे अन्वर्थसंज्ञाविज्ञानात् संख्याप्रश्नविषयस्यैव डतेर्ग्रहणं न तु गणादिकस्येति॥ क्तक्तवतू निष्ठा॥

एतौ निष्ठासंज्ञौ स्तः। क्तः। क्तवान्। ननु विहितयोः प्रत्यययोरनेन संज्ञा संज्ञया च विधानं। वक्ष्यति हि क्तक्तवतू निष्ठेति। तथा चान्योन्या
श्रय इति चेन्न। स्वरूपग्रहणादववद्धविसंज्ञाविज्ञानात्। तौ क्तक्तवतू भवतः प्रत्ययौ विहितयोर्निष्ठेत्येषा संज्ञा भविष्यतीति। स्यादेत
त्। अनुबंधाः कार्यार्थमुपादीयंते न तु श्रवणार्थं। तेषां लोपविधानात्। तथा च लुप्तानुबंधस्य परिनिष्ठितस्य प्रत्ययस्य सारूप्यं तत्र
धानुबंधकार्यं भवतु धकाने तितुनिश्चेतुमशक्यं। न च ककारादिवदुपलक्षणस्यापि व्यावर्तकता भविष्यतीति वाच्यं। ककारा
दिनापि हि वेदिकापुंडरीकादिकं स्थिरं किं नियामिवारयते। तदुक्तं अग्रडीने पिकाकेव्यवहारो न संवादीयते। न चेह परिच्छेदांत
रमुपलभ्यते। न च प्रत्ययान्तप्रत्यययोः ककारादिवल्लोहितककारनकारौ तद्रूपगमे संपद्येते तद्वत्सत्र परिच्छेदमस्य परस्परव्यावर्त
स्य दुर्वचत्वादिति। अत्राहुः। ककारनकारविशेषणयोर्थोऽत्र वेदिकापुंडरीकादिस्थानापन्नाः तद्दर्शनात् अनुबंधस्मृतौ
सत्यां तत्तत्प्रयुक्तकार्यं समाधुतयाज्ञायते तथा क्तः शानितितिदेवत् प्रयुक्ते लक्षणत्वेन कर्मणि तत्कालवत्त्वात्
प्रत्ययोपमितिति निर्लोपयते। क्तोतमालम्भेतेति प्रयुक्ते मेघकाचीकोतशब्दस्तन् प्रत्ययांतः प्रयुक्त इति निर्लोपयते। हसि
मसिनिरवाभिदमिल्लू क्व विम्य स्त्वनिस्युणादिसूत्रात्। क्तोतः स्यादश्रुचिहयोरिति तु पंचपादीव्रतौ स्थितं। तथा प्रा
भितपदं देवदत्त इति प्रयोगे वर्तेवत्ता पवगमा क्लुरुं तस्यापि प्रयोगो न तु निष्ठांतस्येति निर्लोपयते। स्यादेतत्। अं
जिघ्र सिभ्यः क्त इति क्त प्रत्यये अक्तं घृतं सितमिति व्युत्पादितं तत्रापि निष्ठासंज्ञा स्यात्। ततश्च निष्ठा च द्व्यजनादि
ति स्वरः स्यात्। निष्ठांतं द्व्यच् संज्ञायामाद्युदात्तं स्यात् स चेष्टादित्याकारो नेति सूत्रार्थः। न चेष्टापत्तिः। घृतं मिमिक्षुद्
त्यादावंतोदात्तस्यैव पठ्यमानत्वादिति। अत्राहुः। अतः क्रकमीति सूत्रे च मिश्रहलो नैव सिद्धं संसहलो नव्राधितं उणादयः

५ विद्यते· पत्तुव ति वास्य योर्विशेषे स्य संपन्न ये चित्रा लंगावामयमित्यादि विग्रह वर्तनं भीमांसा कार्य देकं तं तत्तु न मुनि वचसानुकूलं । अस्य प्रथमा वि भक्त्यर्थे बहुव्रीहि ५

३५ कृचित् वस्तु स्यत्तिकार्यं न लक्ष्मं तद्दृति । अतो नात्र निष्ठा संसेति । यद्वा । प्रतादानां वेति विग्रह सूत्रे ला सिद्धं ॥ इति शब्द कौस्तुभे प्रथमाध्याय
स्य प्रथमे पादे पंचम माह्निकं समाप्तं ॥ श्रीः ॥ सर्वादानि सर्वनामानि ॥ एतानि सर्वनाम संज्ञानि स्युः । तदन्त संविज्ञानो यं बहु
व्रीहिः । तस्यान्यपदार्थस्य गुणानां वर्तिपदार्थरूपाणां विशेषणानां कार्यान्वयित या संविज्ञानं यत्र स तद्गुण संविज्ञानः । त
त्र सर्व आदिर्येषां तानीति विग्रहः । तच्छब्द प्रयोगेणान्यपदार्थ प्राधान्यं लभ्यते । एवं चित्रागावो यस्य स इत्यादावपि । अन्य
था हि यस्य गावश्चित्रा इति गोशब्दार्थ प्राधान्यं स्यात् । न चैवं त्रिपदे बहुव्रीहिरिति वार्तिक कृता वक्ष्यमाणत्वात् भाष्यकृ
ता च शेषो बहुव्रीहिरिति सूत्रे त्रिकतः शेष माश्रित्य सूत्रारंभे दोषो न स्यादर्थस्य साधितत्वात् । द्वितीया श्रिता तीतादि
भिः तृतीया तत्कृतार्थेनेत्यादि क्रमेण हि यर्लं त्रिकाणां समासयुक्तः तदपेक्षया शेषः प्रथमारूपा विवक्षितः तस्यैव बहु
व्रीहि संज्ञेति वक्ष्ये देवे गतद्द्वादे शिवचित्रागावामयमित्यस्यापि हृतपादास्ते बहुव्रीहित्वं । किं च मत्वर्थे बहुव्रीहिरिति वक्ष्यमा
णत्व वचनात्कथं चित्रागावाम्स्यत्र तत्प्रसक्तिः । ननु दंडिस्यादभ पिंड स्यायमिति विग्रहा सुपगमाद स्मद्रूपा अयमे
व मत्वर्थ इति चेन्न हि सुतरां मुनिवचन विरोधः । तदस्यास्त्यस्मिन्निति सूत्रे ल प्रथमांतादस्त्युपाधिका लंबंधि निमतुव
विधानात् । समर्थानां प्रथमा इति सूत्रे ल प्रथममनिर्दिष्टस्यैव प्रकृतित्वावधारणात् । न चैतान्यपि सूत्रवार्तिकभा
ष्य वचांसि कथं चिद्व्याख्येयानीति वाच्यं समर्थः पदविधिरित्यादानि श्रीहिमिर्य जे ते स्याद् द्विपुपदविधि मिन्ने धपि
यो न यिला सामर्थ्यं व भाष्यादि संमता द्विपरीतमेन वर्णयन्न भवाद्दृशोनिरंकुशाः किं किं न कुर्वन्तु । किं तु व्यावहारलाघि

करतो सिद्धमिति तं व्याकरणप्रामाण्येन कथं त्वेष व्याख्याकुलयसीति परं पर्य्यनुयोजे स्म साधारणं विभावय । तस्माच्छि-त्रांशावोपस्थे स्वे वविग्न
हः सर्वत्र शिष्टसंप्रदायसिद्धमुनित्रयवचसामनुकूल्ये(?)ति दिक् ॥ आदिशब्दस्यानवयववाचित्वादिदं तावदयमवभेदः समुदायः
समासार्थः तस्य च समुदायस्य पूगपक्षस्य प्रयोगाभावादानर्थक्याभावादं जेष्विति न्यायेन तदवयवेषु प्रवर्त्तमाना सर्वनामसं
ज्ञा अविशेषात् सर्वशब्दादि प्रवर्त्तत इति युक्तं तद्गुणसंविज्ञानत्वं । हलि सर्वेषामित्यादिनिर्देशाच्चेह लिङ्गं । अस्मिन्समादयः पदि
तिसंचयेन लक्ष्यइति योगविभागश्चाद्वेः संज्ञाविधानसामर्थ्यादिव इदमादयः तद्गुणसंविज्ञानो बहुव्रीहिः । एतेन हृतं तेभ्यः
कृत्वादिष्वइत्सु समवयवं विशिष्टे कुलशब्दे समन्वतार्थं यथा तत्पुरुषबहुव्रीह्योर्वेदकशेष इति चतुर्थे वक्ष्यते तथेहापि च पुंसक्षमन
पुंसकेनेति वा स्वरभिन्नानां यस्यैकनरः स्वरविधिः सन्धिश्चेत इति वा तत्पुरुषबहुव्रीह्योः सहविवक्षायां बहुव्रीहेः शेष इति प
रास्ते । तद्गुणसंविज्ञानो बहुव्रीहिरित्येव सर्वशब्दस्यापि सेन्द्रहे सिद्धं लक्षशेषा अपलस्य गोरवपत्तह तलोत् । महासंज्ञाकर
णमन्वर्थसंज्ञाविज्ञानार्थं । सर्वेषां नामानीति । तत्सामर्थ्याच्च सर्वाभिधानसामर्थ्ये विशिष्टानामेव संज्ञेत्यनुमीयते ।
तथा च तथाभूतानां गणे पाठस्यानर्थक्यं तथा प्रकारान्तरं नरसुपांच पाठेऽप्यालग्नभावादेव विशिष्टेष्वेव स्थितानां संज्ञानामनुप
सर्जनानां च सर्वादित्वमेव नास्ति । तेन तेषां गणलक्षणकार्यं संज्ञाप्रयुक्तकार्यं चेत्सु भयमपि न भवति । गणलक्षणकार्यं यथा । त्वत्तदिनामः ।
तद्नामकृत्वित् । अतिक्रान्तस्त्वं भवितेति त्वत् । तथा अहुनत्यादिभ्यः । अन्यमतिक्रान्तः अत्यन्यः । अतिकतरं । संज्ञाप्रयुक्तं यथा ।
सर्वनाम्नः स्मै । अतिसर्वाय । तदेतदभिप्रेत्योक्तं वार्त्तिककृता संज्ञोपसर्जनप्रतिषेधः पाठात्सर्वादिसः पठितानां संज्ञाकर

36 ण्णमिति। तस्मात्सर्वादिष्वेन प्रवृत्तिरिति भिन्ने नञ्समुत्कृदूतं प्रत्ययस्यानुपसर्जनीभूतत्वेऽपहलंस्तीति सिद्धितं। ननु स्वरूपमात्रग्रहणे कुर्यां न तु गणपाठं सं
ज्ञां वाऽपेक्षते यथा युष्मदस्मद्भ्यां ङसोऽशित्यादि। तदुपसर्जनत्वेपि भवत्येवेत्याशये यं। न चैवं युष्मद्युपपदे इत्यादावपि स्वमादिप्र
संगः। लोकप्रसिद्धार्थपरतया मेवतस्थत्वनेः। प्रसिद्धश्च पदार्थो येऽइति न्याया... त्। तदंतस्यापि लाभ भवेत्वोऽयं। द्वंद्वे चेति ज्ञाप
कात्। तच्चतत्रैव वक्ष्यते। प्रयोजनं सर्वनाम्ना ख्यय संज्ञायामिति वार्तिकं च दनाम्ना। तेन परमसर्वतः परमसर्वे परमसर्वस्मै
इत्यत्र समस्तात्तेषिद्धं तत्तु प्रकृत्य सिध्यति। न च तल्लिंगादिविधौ प्रातिपदिकादिस्यानुवृत्तेः सर्वनाम्नाय न तु द्वि भेषलोनतदं
तविधिर्भविष्यतीति वाच्यं। समासप्रत्ययविधौ न तदंतविधिरिति निषेधात्। न चैवमपि सर्वादेस्तादावपि प्रसंगः। उप
सर्जनपर्युदासस्य कलात्। अत एव परमसर्वस्मादित्यादौ स्यायादयो भवं स्येव। स्यादेतत्। असः अतस्मिन् अनेन्वदित्यादावपि अ
तेऽस्मिन्नादीत्तिनस्युः। अति सर्व इत्यत्रैव उपसर्जनत्वात्। तथा च अयायस्ते इत्यादि आहवला मिनत्यादि क्रमेण पूर्वप
दार्थप्राधान्येनावियरलं कुर्वंति। सत्यं। ऐषाक्षरलमतेन ... सिद्धमासमस्युत्तरपदार्थप्राधान्यमेव। नञ्सूत्रे भाष्यका
रेण तथैवाभिहितत्वात्। तथाहि। आरोपितत्वं नञर्थः। तथा च ब्राह्मणो मनुष्यः स्मार्यमाणः क्षत्रियादिः... रूपत आह
लादिशब्दे स्यादेवमारोपितो मिथ्याभूतो यं ब्राह्मणादइत्येवं शाब्दबोधपर्यवसाने ब्राह्मणभिन्न इत्यादिकमार्थिकार्थविवर
णं न तु शाब्दोयमर्थः। अत एव तत्तत्रादौ रितिसूत्रे नञ्समासइति सार्थकं। अत एव च औत्सर्गिकी नञ्युक्तपद्योत्तरपदार्थ
प्रधानताधिर्निर्वहतीति दिक्। ननु पदाद्यन्तदंतविधिरिष्यते हि भाष्यविरोधः तन्नहि संज्ञोपसर्जनप्रतिषेधइति वार्तिकस्य

प्रत्याख्यानमुपक्रम्यार्थग्रहणं विभक्तिविशेषणत्वमाश्रित्य तिप्रसंगाद्युक्तः । सर्वनामार्थसमवेतसंख्याकारकाद्यभिधायिनो ङेः स्मैस्यादित्या
दिना । युष्मच्छब्दात्तदंताद्विधेः सत्त्वेऽपि तु प्रतिसर्वाद्येसाद्देर्यप्युत्पत्तिस्सर्वनामतया अर्थग्रहणविभक्तियोगात् श्रयत्वेऽपि स्मायादिप्रसंगः स्यादत्र स्याद
वस्यादिति चेत्सत्यं । अत एवापरितोषात् ज्ञापकं प्रत्ययानामुत्पत्तिपक्षे ज्ञाप्यत इति पक्षांतरमुपन्यस्तमिति मन्तव्यं । ननु यदि यत्नार्थसंज्ञा नहि प्र
वैपदात्वं ज्ञायामगादिति त्वं स्यादिति चेत्सत्यं । अत एव निपातनात्वं गामवः । सत्यं तु रूपमसाध्वेव । निपातनेनैव त्वलक्षणस्य बाधि
तत्वात् । अत एव प्राग्भवत्वं ईश्वरस्यापि असाध्वेव । येषां च विशेषः प्राग्भवानिष्ट इति निपातनेन नद्यसुमुखानादिस्य स्यबाधितत्वात् । नन्वे
वमपवर्गः त्रिपासातत्स्यादिति निपातनेन संततशब्दो बाध्येतेति चेन्न । तत्र सातत्यस्य नैवं प्रत्ययानुमतिः प्रत्युपेदवश्यमः कृत्स्नेद
ति पूर्वाचार्यपठितस्य श्लोकस्यैव ज्ञापनात् । नन्वेवमपि पुनरागमो नेषु आङ्गलात्वं त्येष्वितिपुनरत्वं न पुरातनशब्दस्य बाधः प्राप्नोति । स
त्यं । पृषोदरादिषु पुरातनशब्दस्य पाठो बोध्यः । आगमशास्त्रस्यानित्यत्वे ज्ञापकस्य चानित्यता मात्रं पुरातनेति निर्देशेन ज्ञाप्यत इति
तत्त्वं । तदेवं बाधकान्येव निपातनानीति भाष्ये स्थितं । यत्तु नेदं संज्ञासूत्रं किंतु गणसूत्रशुद्धिमात्रफलकं । यानि सर्वनामानि तान्येव
सर्वादौ निपातितानीति व्याख्यानात् । यथाति उभौ गोत्रादि त्रिकुत्सनाभीक्ष्णययोरिति सूत्रे कुत्सनाभीक्ष्ण्ययोरिति योगविभ
ज्य गोत्रादीनि सनुवर्त्यतत्तयोरर्थयोः पर्यवसितेति नाविगोत्रादीनीति गणशुद्धिपरतया व्याख्यास्यते । तेन च न चिदिवगोत्रादि
तद्धिताम्रेडितेष्व गते : कुत्सने च सुप्यगोत्रादौ इति सूत्रयोरपि विशिष्टार्थनामत्वे न गोत्रादीनां ग्रहणं तद्वेहापि । नन्वतद्दीसास
दादीनामग्रहसागंतर्गणकार्यं सिध्यतु । सर्वनाम्नः स्मायिस्यादिवं तु कृत्स्नसकलादिषु तिथ्या संख्यादिति चेन्न । गणपाठसाम

३७ र्थान्तरअपठितानामेव महत्त्वात् । तन्नावानेव हि भेदो यत्सर्वो न पक्षे संज्ञाविधेया न त्वगुरुद्धिस्त्वार्थवती । अस्मिंस्तु पक्षे न लघुवृद्धिः शाब्दी कृत्वा
दिव्यावृत्तिस्तु अर्थादिति । अथवोभयमनेन क्रियते । पाठवृद्धिः संज्ञा च । तंत्रावृत्त्येकशेषाणामन्यतमाश्रयणात् । तत्र सहविव॰ वक्षां
विनापि वाचनिकत्वेकशेषः । आकृतिपक्षे हि प्रत्याख्यातं सरूपसूत्रमिको गुणवृद्धी इत्यादिवत् भाग्यमक्रियार्थं तत्सहविवक्षां विना
पिल्वेकशेषं विधत्ते । तदित्थं पंचापि पक्षाः स्थिताः । संज्ञाभूतानां व्यावृत्तिस्तु गौणमुख्यन्यायेनापि सिद्ध्यति । नन्वासौ पदन्कार्येषु
तिवार्थं । विशिष्टरूपोपादाने च सर्वत्र तत्प्रवर्तेति सुपपादितमेतत्सूत्रे । वार्तिककृता त्वेवं संज्ञाधिकारे सर्वनामसंज्ञानंतरमेवहृ
ष्वति वेशिनीसंज्ञेति संज्ञासंज्ञया सर्वनामसंज्ञा वाध्यते इत्यपि समाधानांतरं बोध्यं । पद्म पूर्वपदादि तिगल सूत्रे असंज्ञायामिति
योगविभज्य पूर्वोत्तरयोः श्रेयो व्याख्येयः । उक्ताः सर्वादयः वक्ष्यमाणाः स्वादयश्च संज्ञाग्रामिति । तस्मादुपसर्जनव्यावृत्तिरेवान्व
र्थसंज्ञाश्रयणस्य मुख्यं फलं । नन्वनुपसर्जनादिति योगं प्रकृतं तदेव व्याख्यायत इत्युक्ते नैवान्तर्गणकार्यं वाधितं भाष्ये । तद्यथा । अनु
पसर्जनेति लुप्तषष्ठीकं पदं अ आदिति च्छेदः । अश्च आच्च तयोः समाहारः आत् । अकारान्तस्य वै अ अत् इत्यादेशौ पचक्रि
येते तत्र अनुपसर्जनस्य ग्रहणमिति पठितभाषार्थः । तेन यदा यत्वं अद्डुतरादिभ्य इत्यद्भावस्य गौणतायां न भवति । अकारा
न्तस्यत्वेन विशेषणं किं । पंचम्यां अत् । मुख्मानतिक्रान्तेभ्योऽति मुख्मत् । एकवचनेस्य च । मुख्मानतिक्रांतात् अति मुख्म
त् । नत्ययमकारान्तस्य सेविधीयत इति । तथा चोपसर्जनव्यावृत्तेरपि अन्यथासिद्धेः किं महासंज्ञयेति चेन्न । अति सर्वा
येस्यादिवारणस्य नदेकदेशाप्यत्वात् । नहीदं अनुपसर्जनादिसनेन साधयितुं शक्यते । तन्तदपदितो पादेव हि भाष्ये प

क्षांतस्याश्रयत्वमिति दिक्। एवं चानुपसर्जनादिति सूत्रं परिभाषात्वेनापि नोपयुज्यते तदुक्तसामर्थ्यात् प्रत्याख्यानमेव भवतीत्यवधेयं। स्यादेतत्। कौं
भकारेयस्सिद्धये सूत्रमारंभणीयं। तत्र हि कुंभकारीशब्दादेव ढगुत्सर्गो विधेयः। अन्यथा कुंभेत्युपपदस्य वृद्धिर्नस्यात्। तथा च विशिष्टस्य स्त्री
प्रत्ययांतताप्येष्टव्या। सा च तदेव निर्वहति। यदिदं कूलमिति सूत्रे प्रत्ययग्रहणे परिभाषया अनिष्टेन नालंतग्रहणं तेन च प्रातिपदि
क विशेषणात्तदंतं तत्संप्रत्ययः स्यात्। तच्च समासप्रत्ययविधौ प्रतिषेध इति ग्रहणवता प्रातिपदिकेन तदंतविधिर्नेति प्रतिषेधाद्दुर्लं
भं। अनुपसर्जनादिति उपसर्जननिषेधात्तु सामर्थ्यात्तु प्रधाने न तदंतविधौ ज्ञापिते कौंभकारेयः सिध्यतीति स्पष्टमेव। न च बहुकुरुचरीहेले
गतिकारकोपपदात्कृत्स्वाप्नीति परिभाषया कुंभकारशब्दादेव स्त्रीप्रत्ययोत्पत्तिरिति वाच्यं। अलितीति हि तद्धितोपि गृह्यते। औपगवीति यथा।
कं प्रति लक्ष्यमिति परिभाषा तु कुंभकारशब्दादनहलोपि वर्तते न तु कुरुचरहलोपि लमन्नर्थमेवेदं सूत्रमिति भाष्यकृता चतुर्थे स्थापयिष्यते।
तत्कथमिहोक्तमनुपसर्जनादित्ययं योगः प्रत्याख्यायत इति। उच्यते। चतुर्थे सूत्रस्थानस्याभिप्रायवर्णनमात्रं करिष्यते। निष्कर्षे तु इ
यमाले सूत्रे वैयर्थ्यमेवायातीत्याशयेनेह भगवतोक्तं प्रत्याख्यायत इति। तथा हि। कारशब्दात् ङीब्बुत्पत्त्यापि कौंभकारेयः सिध्य
त्येव। षष्ठ्यः संप्रसारणमित्यत्र भाष्यकृता परिष्यमाण [redacted] पावाचेति व्या स्त्रीप्रत्यये चानुपसर्जने इति परिभाषया अनुपसर्जने
स्त्रीप्रत्यये तदादिनियमनिषेधेन कुंभकारीशब्दात्तु ढगुत्सर्गः। अत एव हि परमकारीषगंधीपुत्र इत्यत्र ष्यङः तस्योपमानं संप्र
सारणं परमकारीषगंध्याशब्दस्यापि भवत्येव। न चैवं मतिकारीषगंध्यशब्दस्यापि भवतीति प्रसंगः। अनुपसर्जन इत्युक्ते तेन उपसर्जने
तदादिनियमसत्वात्। न चैवं मध्यपि प्याप्नीत्यादौ हठ्यादिः पो न स्यादिति वाच्यं। हठ्यादिसूत्रे दार्ष्टानहलमासामर्थ्येन तदनोप
सर्जनेपि तदादिनियमो नास्तीति ज्ञापितत्वात्। एवं तु तत्सुनिष्ठेशंव्यादेः समुदायस्याश्रावंतत्वे अवयवस्य भन्नकन्नक्स्या वंगत

३८ यातनः परस्परसेलोऽपि समासे नैव तत्पुरुषः । अर्थविशेषस्याव्यवधानस्य स्वत्वं तथैव निर्वाहः । नच विहित विशेषण लोपाय कुंभस्य । यासेसा तत्र व्या
सेः । न च तत्र महत्त्वं तादृशि हि नत्वे नामनिर्वाहः । कर्तृ हि तत्स्यात् वलोपायते । यः सद्स्यादेलोपायते । यद्वा सुमि समीति प्रत्यये । प्रकृतिरा क्षिप्यते ।
हलंत्यस्य अंते यदुक्तं स निर्वाहित यदि वरलोत वै व वर्णनात् । एवं च तत्पुरुषे मुख्य । एकदेशस्या प्रकृतित्वात् । अन तत्व एव चमस सप्रासौ गोस्त्रियो
रुपसर्जनस्येति सूत्रे चकारे पदेनस्या पक्ष पक्ष एवोभ्यः । नेन स्य यथा विभाजा हृस्वः स्यादेः समुदायात् अंतेत्वेय पुंवद्भावः सुः स्यात् ततद्वेदपद्येद
स्यर्थयोसापत्तिः । एवं वाक्य तथा विधि इति पक्षे पि प चति कल्पस्य प्रसंगादि सिद्धये एव च न च न मुख्यत्वाद्वृस्य स्या न श्या अय लोप स्यो द्विती वे
भे । अस्या वृः महलस्यान्यार्थं तथा यथा वक्ष्यं चिकृष्यातिपदिक स्वहलेलिंग विशिष्ट स्वहलेनस्या वेतलोत् सुपुत्वे तेश्च वक्ष्य मालत्वा
त् । इह च समुदाय स्याप्राति पदिकत्वात् । अर्थवत्समुदाया नां समासात्वहणं नियमार्थमिति हि स्या स्यति । न वैव मपि कदाचित् कारी
शब्दात ठक् स्यादेवेतिवाच्यं । तदा च हित्वं चतन्याये न समुदायादेवोत्पत्तेः । कुंभेने कार्थी भूतस्यति सूत्र अपत्येन योगात् तिथकुम
शब्दस्य व । किंच सत्र म मात्र भमाल स्याप्येवगतिः । औपगवी स्यादा विवक्षेवन्या तकार रक्षाद्वाद् विवक्षा विभक्ती पुंप्रसंगेन चैव भवा
देयपाक्षिकत्वे पस्यत्व स्वपक्षे चितुल्यत्वात् । स्यादेतत् । अक्षिपमाले स्मिन्नस्य जे कुंभकारी स्यात्मंडी वेवन स्यात् । कुंभेनेकार्थीभूतस्या
लंतस्य स्त्रीत्वेनायोगात् । पश्य चस्त्री त्वेन योगे विशिष्ट स्यनतदंतं । तस्मात् महत्त्व ष्टांदितिनिषेधे नशाप्यमानस्तदंतविधिरू
नरत्वाप्यनुपगंतव्यः । सच यथापूर्वं औपसर्जने नापि भवति । नपद् स्व स्यादिभ्यः । त्रिपदं चाद्रोपदी । वनोरच । अतिधीवरीति ।
तथादि हदावपि स्यात् । ततश्च बहुकुरूचरेस्यादवति प्रसंगाः । अतो निषेधस्य अनिदं सार्थकं । ननु पूर्वं ओपाते न दंते च सिद्ध पाधि
स्वेन विशेष्यते । हिंसा लगतिस्यादेतु पातं हि तादि कमेव । तेन बहुकुरूचरे स्यादौ दे हितादे र स्त्रीत्वान्नाभिप्र । कुंभकारी स्यादेत्वलं

२५

तस्य क्रियायां वृत्तेस्तत्वं तावदपि ङीप् भविष्यतीति चेन्न । एतद्धि सप्तमि आगमस्य दुष्कृतया तद्वृत्तानार्थमेव समाधारं भस्योचितत्वादिति । नैतदेवं ॥ आरम्भे
प्यस्मिन् तस्य ऐव्या सत्या नस्यैव शरत्ली च तेष्वात्तात् । अन्यथा पंचासीस्मात्ङा नाम कल्पी ते पि तदंतस्य क्रियायां वर्त्तमानात्ङीप् प्रसंगात् । अतो
विशेषणविशेषभावं यति क्तान्तमचारद् आप तत्रा विस्य अदि दुत्काल मित्यादे लोपानं स्त्री ते न विशेष्यते । वनोर च आदैतत्वात्तदंत
वेति मतं लेपक्रिते ङः सत्वं यथार्थमेव । स्यादेतत् । तदंतविधिश्चार्थं तार्थमेवेदं समधारं भत्ति यं । न आमहत्सूत्रे वैश्वनेनैव तत्सिद्धिरिति वाच्यं ।
तस्य ल्यापदत्वात्याया गात् । पंचाशी स्वादिद्विपथ्य थे अजादिभिः ङस्त्री तं विशेष्यतत्प्रति हि वक्ष्यते । तथा च महत्युक्तं द्विसप्तम सुपदयस्य क्रि
यां विशेष्यत्वेपि भवत्यवश्यात तथात्वेन सत्स्वपितदं तविधौ टाप् नञा प्रोक्तीति कथं तदं तविधिं प्राप्य लाभिवेधः पर्यवस्येत् । मैवं ।
इतरेषामादिभिः स्त्रीत्वविशेषत्वे पि रूढ ड शब्दे तदं ते नापि विशेषणत्वात् । एवं च स्वपृष्ठे मेवडापकपर्यवसानं । न चैवं कल्पसूद्रीय
प्राति प्रसंगः । जातिविशेषणेन भवसूड स्वाविशेषणत्वात् । स्यादेतत् । पूर्वसत्वनिर्देशो वा पि शब्दमधीतङ्मीति कृत्वाय मोक्ष रसस्य
चे सार्थकं । तथा हि । अप्रधानमुपसर्जनं । तथैव पूर्वं कार्यसत्वेष्वपि च अव्यवहारात् । नतस्यापि शक्तिनाप्नो कः । इ न च चे सत्ये । ततो
ऽेभ्यो तदधातदुत्वलं । तस्य प्रोक्तात्दुक्तुं दुतिनुकं । आपिशल्याभ्यासलोऽ । अग्रप्रोक्तार्थ स्यालो ऽप्रधानत्वात् संदेहान्तङीपः । भव
त्यो अ । प्रधानमिति विशेषणत्वात् । न चैवमपायोध्यामुस्य न स्या लोनुपसर्जन तथा तदुत्पत्तो ङीप् स्यादेवेति वाच्यं । तस्य लक्ष्मतत्वा
त् । न च समस्यपदलक्षणं गृहं तं । वक्षे अन्येन निषेधात् । द्विगुत्वल मित्स्व उत्तङ्ग स्यनुवर्तते । अण च अव्यको विशेष्यते । अल्य कोक
रङ्कृते । न तस्य विपरीतो विशेषणविशेष्यभावः । वर्णस्या प्राधान्येप्यपदलक्षणत्वपत्तेः । अतल्लोङिस्यद्भव तल्लेहङ्सूक्ष्मतत् । ननु क्रिया

मित्वेनेनातो विशेषणामौ न्दोषइति चेन्न॰ नाश्रयसिद्धि नामो कामीनां स्वकाश्रयस्ती तामधीनेकाश्रयकत्वमात्रमस्ति । अतएव तामेव प्रोक्तामुपजि
तिन्तु विसृष्टथमो पपदस्थित्वयामेयो सन्नइति नदन्तात् प्रातिपदिकत्वेन तस्मिन्नान्तरी प्रसंगात् । तस्मात्प्रधाभात् पथास्यात् अयं प्रान्नामा मत् दि त्येत
दर्थमाहेभत्तीयं सूत्रमिति ॥ अतो नमते ॥ अत्रैवमाममभिधेयायामत्यर्द्धरादेतो भवितव्यं । यत्र ओहं चेस्यामतत्र उसनने: सर्व तत्र व यत्र
श्रयते तस्मादीकारस्य नोन्नुतरओतिपुनर्न भवति । सकृतं प्रवृत्तस्योक्तस्य च रितार्थत्वात् । तस्मादनुप सर्जनादित्र पंयोगः सत्या
यनइति भगवदुक्तिर्निर्थोधेवेति दिक् ॥ सर्वादिय श्चपं चविंशतत् ॥ सर्व॰ विश्व॰ उभ॰ उभय॰ डतर॰ डतम॰ अन्य॰ अन्यतर॰ इतर॰ त्वत्॰ त्व॰
नेम॰ सम॰ सिम॰ पूर्वपरावरदक्षिणोत्तरापराधराणि । स्वमज्ञातिधनाख्यायां॰ अन्तरं बहिर्योगोपसंव्यानयोः॰
त्यद्॰ तद्॰ यद्॰ एतद्॰ इदम्॰ अदस्॰ एक॰ द्वि॰ युष्मद्॰ अस्मद्॰ भवतु॰ किम्॰ इति । तत्र सर्वविश्वशब्दौ कृत्स्नपर्यायौ॰ सर्वशब्दस्य सांग
श्रितात्सिस्याघुनदत्ते वैश्वान् तोदत्तवत्त्वैरालेनिपात्यते॰ नेनम॰ उभं विधारद्धस्वआनुदात्तादेरन्तसिद्धः । सहस्रे तुदत्तादिप्रकृतिका
द्वित्वीयनइति द्याप्रकृत्ये भाष्येस्थितं । प्रयोगे तु सर्वस्य सुपीत्याघुदात्तत्वं । उभयशब्दो द्वित्वविशिष्टस्वार्थवचनः अनतएवनित्यं द्विवच
नांतः । यद्येवं तर्हि किमर्थं प्रवृत्तौ सर्वादिरुपपद्यते । न त्यत्रसुपादयः संभवंति । कावचोसन्तु नास्तिस्वप्ये स्वरेवाविशेषः । अवगाहसुये
प्रत्ययेपिपदत्वादेर्नाप्रियते । विमइप्रताराज्ञवाइदत्यवेदत्वादेतवेबानिर्लोपितत्वात् । न च उभाभ्यां हि तुभ्याम उभयोर्हत्वे द्विवचनस
र्वनाम्नस्तत्ता यामेतिचाप्लिवदत्तत्ती या प्लिष्यर्थइहपाठइतिवाच्यं । निमित्तत्वात्कारला हेतुषु सर्वासां प्रायदर्शनमितिवार्तिकेन गतार्थ
त्वात् । अत्रवदन्तिकृत्सर्वनाम्नस्तृतीयाचेतितत्रेपठितत्वादिदं वार्तिकमपि सर्वनामसंज्ञासापेक्षमेवेति वाच्यं । भाष्येहेतावि ३८

निस्त्रैतस्यपठितत्वात्। अत एवान्नेमकारलोन्वसतिअन्नस्यअकारलस्येसुत्त। तं हरदत्तेन उभशब्दस्तावत् द्विवचनमात्रविषयः। एतौ तु द्वि
वचने पानास्तो प्रयुज्यते। उभाभ्यां पक्षाभ्यां विनीत निष्ट इति विग्रहे उभयपक्षेत्यादि प्रयोगदर्शनात्। कथं तर्हि उभस्थाने उभयशब्दस्तिष्ठति
येत्। इत्थं उभाभ्युदात्तो नित्यमित्यत्र उभादित्ति योगो विभज्यते। अत एव नवृत्तेः संख्यावाचिन उभशब्दादयपविन्यर्थे अयच् स्यात्। उभयोमतिः।
ततो नित्यं। उभशब्दादुत्तिविषये नित्यमयच् स्यात्। अतिदिष्टार्थता स्वार्थे। तदेतदुक्तं वार्तिककृता। उभयोन्यत्रेति। एवं स्थिते उभयत्रेत्यादा उभयतः ४
५ विवक्षप्रत्ययेषु उभयप्रत्ययप्राप्तः अद्यापितुउभकाविल्यादि सिध्यति। न चेह प्युभयग्रहणे स्यादेवेति वाच्यं। अवचनस्य सर्वादिषु पाठेन अय
चो बाधात्। अन्यथा पाठवैयर्थ्यापत्तेरितिदिक्। संगाशिदामदे तानामित्याप्युदात्तार्थं पाठ इति तु नयुक्तं। गणपाठे एवौ तोदात्तस्याति
पाद्यमानत्वात्। अन्यथा उभे भद्रे जोषयेते। उभा उ नूनं। उभाभ्यां देव सवितः। सप्तत्यन्तउभयोर्न्मा मयो द्विसादौ आपुद्रानयसंगात्।
उभयशब्दस्तु अवयवद्वयात्मके अवयविनि वर्तते। उभयो मणिरिति यथा। श्यामलोहिताभ्यामवयवाभ्यामारब्धस्य उपर्थः। तिरो
हितावयवभेदत्वादेकवचनं। उभयमेव वदंति मनीषिण इत्यादौ तु समुदायि द्वयघटितः समुदायोर्थः। तिरोहितावयवभेदत्वं तु
ल्यमेव। यदा तु वर्गद्वयारब्धे महासमुदाये वर्तते तदावयवभिन्नेन सहाभेदविवक्षया द्वितावयवभेदत्वात् बहुवचनं। एवं उभये दे वर्गद्वये न॰
वमनुष्याः। न ह्यत्र भिन्नात्यभिन्नास्ते पेचये चो भयेन्द्र पा इति यथा। यदा तु प्रागुक्तरीत्या उभयोमणिरितिवत् यावद्घटितादृशायेवमणिर्द्व
यं सह विवक्ष्यते तदा लक्ष्यैकदेशे लोद्विवचनं प्राप्नोति। अनभिधानात्तु न भवति। तथा च तद्धितश्चासर्वविभक्तिरिति सूत्रे कृत
द्धितानां ग्रहणं च पाठे इति भाष्यप्रवृत्तोस्यनरकैयटआह। उभयशब्दस्य द्विवचनाभावात् सर्वविभक्तित्वं नेति। हरदत्तस्तु त
स्मिन्नेव सूत्रे उभयशब्दात् द्विवचनमंगीकृत्य पाठाश्रयणं तु प॰ चतिकल्पं पचतिरूपमित्यादावतिप्रसंगं वारयितुमित्याह। इदम्

५० यजादेशस्य स्थानिवद्भावेन तयप्प्रत्ययान्ततया प्रथमचरमेति सूत्रेण जसि विभाषा प्राप्नोति । व्यवस्थितविभाषया पूर्वविप्रतिषेधेन वा नित्यमेव जसि
सर्वनामतेति केचित् । विभक्तिनिरपेक्षत्वेनान्तरङ्गतया नित्यसंज्ञया बहिरङ्गा वैकल्पिकी बाध्यत इति तु सिद्धान्तः । न वेति विभाषेति सूत्रे भा
ष्यकारस्त्वाह अयच्प्रत्ययान्तरमेव न त्वसौ तयपः स्थानादेशः । उभादुदात्तो नित्यमिति सूत्रे तयपो ऽननुवृत्तेः । अयच एव चानुवृत्तेः । न चैवं उभयीद्
स्यादि ढाणञिति सूत्रेण तयबन्तत्वप्रयुक्तो ङीप् न स्यादिति वाच्यं । तत्र मात्रजिति मात्रशब्दात्प्रभृति अयच्च अकारेण प्रत्याहारग्र
हणेन तु । एवं च तयप्प्रत्याहारेणापि तत्र न कार्यं । यद्वा द्वयसजिति प्रत्याहारः । तथा दघ्नच्मात्रचोरपि प्रत्याहारेण ग्रहणं न तु तद्व्युत्पत्तिमिति भट्टदेव
जापवं । वस्तुतस्तु प्रमाणे मात्रच् द्वयसच् दघ्नच् इति पाठे ... मिति भाष्याशयः । तथा च ततो ऽपि न दोषः । न चैवं वक्ति स्त्रियां यद्
त्यत्रातिप्रसङ्गः अत इत्यननुवृत्तेः । न षट्स्वस्रादिभ्य इति निषेधात् । न चैवं तैलमात्रेत्यादावतिप्रसङ्गः सदृशस्याप्यस्य प्रत्याहारे असंनिवि
ष्टत्वादिति ॥ अत्र कश्चित् । उभयेत्यर्थपरो निर्देशः । तेन यथा द्वयेषामपि भेदिनीभूतामिति माघप्रयोगः समर्थितो भवतीत्याह तन्न । अ
र्थपरतायां चतिकारादयनिमुन्न च नानुपलम्भात् । महाकविप्रयोगबलादेवेदं कल्प्यत इति चेन्न । महाकविभिरेव तद्रूपस्य
बहुशः प्रयोगात् । तथा च माघः । गुरू द्वयाय गुरुणोरिति । कालिदासोऽपि । अस्मिन् द्वये रूपविधानयत्न इति । श्रीहर्षश्च । अये
मयोदास्तिमेव जिह्वया द्वयेऽपि तस्मिन्ननतिप्रयोजन इति । तस्माद्द्वयं द्वैधं इयति गच्छतीति द्वयेषः । तेषां द्वयेषामिति द्वेषः धिवं
तस्य रूपं बोध्यं । यत्तु कश्चिदाह । चान्द्रवर्णव्याकरणे द्वयशब्दस्यापि सर्वनामताभ्युपगमात्तदाश्रयं प्रयोग इति । तदपि नामु
नित्रयमतेनैकत्तनी साध्वसाधुविभागः । तस्यैवेदं नीलनत्रिषिद्धैर्वेदाङ्गतया परिगृहीतत्वात् । दृश्यन्ते हि निपतत्काकाः स्मृतयः । यथा

रुलौ पाराशरस्य तिरिस्मारीति । शतात्र ठन्यता वषात दति स्यैसर्वै दुवाक्यतयाप्तिर्जुंतितत्वात् । डतरडतमौ प्रत्ययौ । यद्यपि संज्ञाविधौ प्रत्ययग्रह
णे तदंतग्रहणं नास्ति तथापीह प्रयोजनं सर्वनामाव्ययसंज्ञा प्राप्तिर्निवृत्तिश्च निवृत्तं दंतविधिः । केवलयोः संज्ञायां प्रयोजनाभावात् । अन्यो भिन्नः
अन्यतर अन्यतमशब्दाव्युत्पन्नौ स्वभावात् द्विबहुविषये निर्धारणे वर्तेते इति पस्पशायां कैयटः । तत्रान्यतमशब्दस्य गणे पाठाभावान्न सर्व
नामकार्यं । नाप्यडुतरादिष्वन्यतमशब्दस्य गणितत्वात् कार्यं । तथा च प्रयुज्यते । न तावत्तावन्मात्यादिषु अन्यतमं तमदिति । शाकटायनस्तु न अन्यतरान्य
तमौ डतर डतमांतौ व्युत्पादितवान् । तन्मते प्यन्यतरशब्दपाठस्य नियमार्थत्वादन्यतमशब्दे तत्कार्यं सर्वनामसंज्ञा कार्यं च न लभत
ख्य इति तत्र्यौतारः । इतर स्वन्यनीचयोरिति सप्तमः । त्वत्व इति द्वावप्यदंतौ अन्यपर्यायौ । तत्रैकः उदात्तः अपरोनुदात्तः । तत्र त्वं समेदश इत्यत्र अनुदात्तपि
त्वपुदात्तस्य प्रयोगः । उत त्वः पश्यन्नित्यादिषु अनुदात्तस्येति विवेकः । केचित्तु त्वदिति तान्तमेकमेव पठंति । तथा च जयदेवः प्रायुंक्त । त्वदधरमधु
रमधूनि पिबंतमिति । त्यतः अन्यस्याः अधर इति षष्ठीतत्पुरुषः । ननु तवाधरस्त्वदधर इति । पश्यतीति दिशि दिशि रहसि भवंतमिति पूर्ववा
क्येन सह अनन्वयापत्तेः । अनुदात्तत्वमार्षं । त्वत्व समसिमेस्यनुच्चानीति फिट्सूत्रात् । तथा च प्रयुज्यते । स्त्रीकृत्य त्वद्वनितिसूत उत्वदिति । सर्वना
मसुपठितो नुदात्तो यमन्यपर्याय इति तत्त्वार्थस्याधापं वेदभाष्यकाराः । इह हि प्रायशः केऽपि उदात्तानुदात्तयोरकारांतयोरनुदात्तस्य तकारांत
स्य चैषा मा लिप्कत्वं निर्दिशात्मेव । गणपाठे परं विप्रतिपत्तिः । तत्राप्यनुदात्तस्य अकारांतस्य गणपाठे न संशयः । उतो त्वस्मै तन्वं विसस्त्रे इत्यादि
प्र[redacted]योगात् । अवशिष्टयोर्मध्ये एकतरस्य गणे पाठ इति तु संशयः । उदाहृतप्रयोगालोचनया त्वौदासीन्यात् । तस्मान्तांतस्य अकारादिकमुदा
त्तस्य वास्मात्यादिकं धत्र । विद्याख्यायांसप्रयुज्यते नवेति विभाज्यतत्त्वं निर्णेयं बहुश्रुतैरिति दिक् । वस्तुतस्तु नीते आपस्तांत छेददत्तवपुः ।

अन्यथा तेभ्यः आकृष्टशब्दस्य सर्वनाम्ना एकश्रुत्यो भयसंग्रहः संभवात्त्वशब्दे नैवनेवापादिष्टं स्यादिति ज्ञेयं। तेयस्कृति· तेशायः इत्यादयस्तु शेषस्य
पं तस्य युष्मदः प्रयोगाः न तु त्वशब्दस्य· पदकारैः प्राग्दृष्टत्वप्रयुक्तस्य इति शब्दस्य प्रयोगादिति स्थितं वेदभाष्ये। नमइत्सर्थे· प्रयोगश्च· प्रने
मस्मिंश्च इति शेषो मइति· समः सर्वपर्यायः। नमता मन्यके समे। मा नोष्टकायवर्ण्ये समस्मै· उरूण्या लोके अचायतः समस्मात्· उतो समस्मिन्
तुल्यपर्यायस्य तु समशब्दस्य न सर्वनामता· यथासंख्यमनुदेशः समानामिति ज्ञापकात्· कन्ने अंतइति सूत्रेलते दोषाः समाश्च यां सोव
तिभाष्यकारप्रयोगाश्च· एतेन समे यजेतेति प्रयोगो व्याख्यातः। सिमः कृत्स्ने चभाले नस्या मर्यादावचनइयोदितिनिर्णयं इः। आद्रात्री बास
स्तनुते सिमस्मै· उरुक्रमत्कमज नेक्षिमस्मात्· यद्यपीह त्वत्वसम सिमेत्वनु आनीति प्रातं तथापि सिमस्यार्थवत्त्वं तंउदा मइत्सुदानला·
अथर्वशिरस्यपि दृष्टमंत्रे कस्वदादिगते पीति भनियुक्तैर्व्याख्यातत्वादित्यवधेयं। पूर्वपरावरदक्षिणोत्तरापराधराः पंच दिक्कालयोस्तदवच्छिन्ने च·पू
र्वस्यां दिशि· पूर्वस्मिन् काले· पूर्वस्यां वाच्यां· पूर्वस्मिन् गुरावित्यादि· दक्षिणाधरशब्दौ दिशि तदवच्छिन्ने च· अर्थनियमश्चाये· व्यवस्था
याभिमुख्ये गम्यते। स्वाभिधेयेनापेक्ष्यमाणस्यावधेर्नियमो हि व्यवस्था। पूर्वादिशब्दानामुक्तार्थो हि नियमेनकंचिदवधिमपेक्षते। स्थागा
पापचौ भावे इति क्तिन्निपातः। अत एव निपातनादङ्। व्यवस्थायां किं। दक्षिणा गाथकाः। प्रवीणा इत्यर्थः। अधरे तांबूलरागः। उत्तरे प्रत्युत्तरे वाग्रा
काः। कथं तर्हि तथापरेषां युधि चेति कालिदासः। अपरे प्रस्थवतिष्ठंत इत्यादि च। असंज्ञायां। देशवाचित्तया व्यवस्थाविषययोरेव परापरशब्दयो
रुपयापश्च औत्तराहदिति च प्रयोगः। न चैवमुपसर्जनता। न हि लाक्षणिकत्वमुपसर्जनत्वं। किंतु स्वार्थविशिष्टार्थांतरसंक्रमः स तु न वर्तिप
विष्टस्यापि प्रधानस्य· न वा लाक्षणिकस्यापि वृत्तिमप्रविष्टस्य। अत एव तस्मा इहि मानिस्यादौ लक्षणापक्षेपि सर्वनामकार्यं। तथोहं

प्रति

[illegible]

सोमौ यो मौ सोऽहमित्यत्र भागस्यागलक्षणयामपि सर्वनामकार्यप्रवृत्तिरिति भवादिमतं चेत्तन्नाऽप्यपीतित्वं नस्प्रतिपाद्यानि वस्तूनी स्वर्थ्यदूतिवैयट
चैवं वस्तुतस्तु अत्र शत्रुत्वादि प्रकारकबोधोनेश्वरादिशब्देभ्यो भिन्नत्वादेवाधिकः। शब्दस्तु देशांतरनिष्ठत्वादि प्रकारकत्वेनेति तत्त्वं। अस्मिन्नर्थे यांगिकं।
उत्तराः कुरवः। सुमेरुमवधिमपेक्ष्य कुरूणां तच्छब्देन तत्र इत्यस्तीह व्यवस्था। प्रसिद्धत्वात्तु नावधेः प्रयोगः। मेघो वर्षति सप्तजलस्य यथा। ए
वं दिशः सपत्नी भव दक्षिणस्याः सा स्ववपिव मस्तुतोऽप्यवस्थास्तीति सर्वनामकार्यं सर्वमेवेव। न च संज्ञायां निषेधः। आधुनिकसंकेतो हि संज्ञा।
न च दिक्षु सा स्तीति पंचमेऽस्माति प्रकरणे वैयाकरणादयः। अत्र दिक्षु चिरंतनः। कुरुषु आधुनिकः संकेतः इत्यस्य व्यास्वात्तु वचनमेव प्रमाणं।
स्वशब्दस्य च त्यागोऽर्था आत्मात्मीयौ ज्ञाति धनं चेति। स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने इत्यमरः। यद्यपि स्वाभिन्नेऽर्थे इति सूत्रे
ईश्वरत्वेनाऽप्यपि स्वशब्दः स्वीकृतस्तथाप्यसौ मत्वर्थीयामिनिच्प्रत्ययमात्रविषयो न तु केवलप्रयोगार्हः। तत्र ज्ञातिधनयोर्निषेधाद् आत्मात्मी
ययोरेव संज्ञा। भाष्ये त्वाहृतं च स्वं। आत्मीयत्वं पुरस्कृत्य ज्ञातिधनयोरपि प्रवृत्तौ सर्वनामतापद्यास्यात्। आत्मात्मीययोरित्येतत्तु वक्तुमुचितं।
स्वस्मै इत्यादि। जसि विभाषा विधायके तु अष्टाध्यायीस्थे सूत्रे चैवं। यत्तु स्वमात्मीये इत्येव वक्तुमुचितं आत्मवाचिनो नपुंसकत्वं या जसि विभा
षाया अनुपयोगाभावादिति कैचित्। तच्चिंत्यं। तत्र सामर्थ्याद् आत्मन्यपि पुंस्त्वाभावात्। अत एवामरकोशेऽपि। आत्मनीति पूर्वोन्वयि स्वमिति तु
तेनान्वयि। तथा च हेमचंद्रः। यौः स्वर्गनभसोः स्वो ज्ञातावात्मनः स्वं त्रिष्वात्मीये धने इति। मेदिनीकारोऽपि। स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये धनेऽस्त्रि
यां धन इति। वस्तुतस्तु पूर्वपरेत्यादित्रिसूत्र्यां मर्थनिर्देशः पाठविशेषणं। तेनैतदेषां पाठादेव पर्युदासः। तथा च विभाषा जसीति प्रकरणे पू
र्वादीनि नवैसेनलाघवात्कर्तव्यं। त्रिसूत्रीतु न पठनीयेति निष्कर्षः। अथ वा तत्र गणपाठ एव पूर्वादिवैनेकपाठानंतरं विभाषा जसीति कर्त

५२

यं। पूर्वादीनि च अर्थविशिष्टान्यनुवर्तनीयानि। न च सर्वादीनामप्यनुवृत्तिः शंक्या। नेमस्य जसि विभाषारंभात्। यत्तु। अस्तु ङसिङ्योर्नां शिस्मात्स्मिनः
पूर्वादिभ्यो नवभ्यो वा· औङ आपः ७।१ नपुंसकाच्चेति समर्थे न्यासः कर्तव्यः। परमार्थतस्तु समर्थे यथान्यासमेवास्तु· पूर्वादिभ्यो नवभ्यो वेत्येतत्तु
जसः शी ७।१ इत्यत्रानुवर्त्य वाक्यभेदेन संबध्यते। वा छंदसीत्येतदपि पूर्वसूत्रे न यथा· तथा चेयं त्रिसूत्री अष्टाध्याय्यां नपाठ्येति स्थितं· असंज्ञा
यामिति तु न कार्यं· अन्वर्थसंज्ञया अभिव्यक्तपदार्था ये इति न्यायेन वा संज्ञायां व्युदस्तत्वात्· अंतरशब्दस्तु नानार्थः। तथा चामरः। अंत
रमवकाशावधिपरिधानांतर्द्धिभेदतादर्थ्ये। छिद्रात्मीयविनाबहिरवसरमध्येंतरात्मनि चेति। न च बहिर्योगोपसंख्यानयोस्तादर्थ्ययोः
संज्ञा। बहिरित्यनावृतो देशो बाह्यं चोच्यते। तथा चेतेंऽतरे अंतरा वा गृहाः। नगरबाह्याश्चांडालादिगृहा इत्यर्थः। द्वितीये नगरस्यांतर
गृहा इत्यर्थः। उपसंख्यानशब्दोपि करणव्युत्पत्त्यांतरीयपरः। कर्मव्युत्पत्त्यांतरीयपरः। उभयथापि बहिर्योगे गतार्थत्वात् उपसं
ख्यानग्रहणं न कर्तव्यमिति भाष्ये स्थितं। केचित्तु शाटकानां त्रये शरीरसंयुक्तस्य तृतीयस्य चतुष्टये तु चतुर्थस्य तत्संयुक्तस्य च तृतीयस्य
बहिर्योगाभावादुपसंख्यानग्रहणं कर्तव्यं शाटकयुगार्थमिति वदंतो वार्त्तिककारस्यापायमेवाशयमादिशंति क्लेशं गदर्वगम्यते। भा
ष्यमते तु बहिर्योगग्रहणं स्वर्यते। तेन शीतो वान्त्याकादिशोलासादय विवर्गो ग्रहणं स्वरं पराबाह्यसंवृत्यापि भविष्यति स्पृहः।
मस्यापि बहिर्योगे पुरि विषयतायां न सर्वनामता। अपुरीति च वक्तव्यमिति वार्तिकात्। तद्ग्रहणं सूत्रस्य प्रयोजनं तु जसि विभा
षाविधायकस्य· अतद्गुणसंविज्ञानसमासः ७।१ विधानात् दृष्टान्तस्याभावात्· अंतरायां पुरि· प्राकारबाह्यायां नदंतर्वर्तिन्यां वे
त्यर्थः। लिंगविशिष्टपरिभाषया एकादेशस्य पूर्वान्तग्रहणेन ग्रहणात् प्राप्तिर्बोध्या· स्यट्· तत्र तेनो पूर्वोक्तपरामर्शः· तत्राद्य

च्छंदसः। एतस्य भानुदितिगणरत्नकारः। तन्न। तथा सति स्यच्छंदसि बहुलमिति सूत्रे छंदोग्रहणवैयर्थ्यापत्तेः। यद् उद्देश्यसमर्पकः। एतदिदमो
न्वादेशोपस्थिते। अद सूत्र्यवहिते। एको न्यार्थे प्रधाने च प्रथमे केवले तथा। साधारणे समाने चाल्पे संख्यायां च प्रयुज्यते। द्विशब्दो द्वित्ववि
शिष्टे। अलिंगः संबोधने त्वं विषयश्च युष्मदर्थः। अस्मदः वक्तृ आत्मविषयोऽर्थः। सलिंगः संबोधनव्यभिचारी च भवदर्थः। भातेर्डवतुरिति व्यु
त्पादितोयं। यद्यप्यस्य स्मादयो न संभवंति। सर्वनाम्नस्तृतीया चेति तु निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति सनैनैन गतार्थं। तथा
पि भिन्नक्रमयत्नः पूर्वनिपातलक्षणः सो तथा। आत्वशेषष्यमिविरहा भवद्भ्यां भवतः फलं। पि भ्रू भावतायानिः। त्यदादित्वेन त्वद्यादुदी
चांवद्वादिति पिंम्। अद्भि। भवंतमंचति भवद्धङ्। विश्वग्देवयोश्चेति चकारेण सर्वनाम्नो नुकर्षणात् द्यादेशः। भवद्। भवन्मयः। नित्यं क्व
दृशादिष्विदृतिमयट्। भवन्मित्रः। सर्वनामसंख्ययोरिति प्राङ्निपातः। भावत्कः। भवदीयः। भवतष्ठक्छसाविति सत्रेहि शत्रंतु निव्व
तयेव दृगादिष्वनुवर्तते। आत्वं। भवादृक्। आ सर्वनाम्न इत्यात्वं। देवदत्तश्च भवांश्च भवंतौ। त्यदादीनि सर्वैर्नित्यमिति शेषः। भवतो भावो भव
त्वमत्र सर्वनामसंज्ञया गुणवचनसंज्ञाबाधनात् ष्यञ्विरहेऽपि फलं। अन्यथा भावत्कमिति स्यात्। भवकान्। सर्वनाम्नो वृत्तिमात्रे
इति पुंवद्भावोऽपि फलं। भवत्साः पुत्रो भवत्पुत्रः। किंशब्दः प्रश्ने आक्षेपे चेति दिक्। त्वत्। सर्वादिगणे त्वतः समानार्थयोर्थः। यदि द्वावन्यौ अव
मस्यां पृथिव्यां मध्यमस्यां परमस्यां मुक्तस्य इत्यत्र तु अवममध्यमपरमशब्देषु छंदसि सिद्धेः विधिव्यत्ययात्स्याडागमः। नत्वेतदनु
रोधेन सर्वादिगणकृतिगणत्वमिति मंतव्यं। अत एव छंदस्यपि सर्वनामकार्यमेषां न नियतं। ये मध्यमाः पितरः। विष्णोः पदे परमे इत्यादौ त
दभावात्। त्वहानु भीमाखितरेतरस्मात्। अन्योन्येषां पुष्करेणामिश्रं तदित्यादि तु द्विः प्रयोगो द्विर्वचनमिति पक्षे तदंतविधिना सिद्धं। स्था
ने द्विर्वचनपक्षे तु स्थानिवद्भावेनैव बोध्यं। ननु वक्तृन साक्षाद्विनप्रकृतिप्रत्ययविभागस्य संमोहात्स्थानिवद्भावेनापि पदत्वमात्रं स्यात् न तु

५७ सर्वनामता । सुब्विधिशिष्टस्थानिनिमित्तद्विरूपहानिरिति चेन्न । संनियोगशिष्टत्वेनांतरंगत्वमसिद्धत्वं बाधित्वा समासवत्प्रकृतमिति समासवज्जावप्रयुक्तस्य लुकः प्रथमं
प्रवृत्तेः । अंतरंगानपि विधीन् बहिरंगो लुग्बाधत इति वक्ष्यमाणत्वात् । ततः प्रत्ययलक्षणेन पदत्वमाश्रित्य द्वित्वप्रवृत्तेः · एतेन तत्र नाम नम
तमीतयद्रूह्यादि व्याख्यातं । न च समासकरी स्याद्वितरेतरस्मादित्यस्य सिद्धिः । अन्योन्येषामिति तु कथं । न ह्यत्र समासवत्त्वोस्तीति चेत् · तत्रैव प्रथ
मैकवचनांतत्वं पूर्वपदस्य द्वितीयादयस्सुप्परपद इति वचनबलेनैव प्रत्ययविभागस्य सिद्धेरिति दिक् । वन्येतराजानपक्षे पदद्वमिद्रिति तु वन्याइ
तरेयेष्व इति बहुव्रीहिलक्षणसमाधेयं । तपर इति ज्ञापकात्सर्वनाम्नः पूर्वनिपातोऽनित्यः । पुत्रादेकास्यराज्ये य इति तु प्राधान्यादिना आख्यातादि
स्यर्थे आख्यातं तिजंतात् प अर्थे कप्रत्यये लाक्षणिकस्य सर्वनामताविरहस्समाधेयं ॥ विभाषा दिक्समासे बहुव्रीहौ ॥ अत्र सर्वनाम
संज्ञा वा स्यात् । उत्तरपूर्वस्यै उत्तरपूर्वायै · दिङ्नामान्यंतराल इति प्रतिपदोक्तो दिक्समासोऽत्र गृह्यते । तेनेह न । या पूर्वस्यै वोत्तरा यस्य
स्यांतस्य तस्मै पूर्वोत्तराय । एवं च बहुव्रीहिग्रहणं न कर्तव्यं । दक्षिणोत्तरपूर्वाणामिति द्वंद्वस्य लक्षणप्रतिपदोक्तपरिभाषयैव वारणा
त् । न हीतरार्थेन तत् । तथा हि । एवं बहुव्रीहिवत् आबाधे चेति द्विर्भावे एकैकस्मै देहि दक्षिणदक्षिणस्यै इत्यादाष्यते । तत्रोत्तरसूत्रे
णान्निषेधो मा भूत् । बहुव्रीहिरेव यो बहुव्रीहिर्नत्वतिदिष्टबहुव्रीहिस्तत्रैव यथा स्यादिति । नैवं । समासग्रहणानुवृत्त्यापि तदर्थलाभात् ·
उत्तरसूत्रस्य प्रत्याख्यानाच्च ॥ न बहुव्रीहौ ॥ बहुव्रीहौ कर्तव्ये सर्वनामसंज्ञा न स्यात् । त्वकं पिता यस्य सः त्वकत्पितृकः · अहकं पिता यस्य
मत्कपितृकः । द्वकौ पुत्रौ यस्य द्विकपुत्रः । इह हि समासवृत्तेः प्राक् अंतरंगत्वात् प्रागकच् प्रवर्तेत तत्र च समासेऽप्यपि श्रूयेत · अतिक्रांतो भव
कंतं अतिभवकानिति वत् । न हि वृत्तेः प्रागपि उपसर्जनतास्ति · ननु यदि वृत्तेः प्रागेव प्राप्नुवन् अकच् निवर्त्यते तर्हि त्वकंपितेत्यादि कथं विग

घटते त्वकः । पितेत्यादिकप्रत्ययप्रदर्शनो पि स्यात् इति चेत् । आन्तो सि । नह्यस्मिन्नकि पावाक्ये उत्प्रेक्ष्यमाने गोचरे बहुव्रीहिसंज्ञाप्रवृत्त्या सर्वनामसंज्ञा च
निषिद्धा न संयुज्यते अपरिनिष्ठितत्वात् । किं तु तस्त्र दर्शां बहुव्रीहिसंज्ञार्थ न्यं वाक्यं तदर्मेव । यदाह कैयटः । अप्रयोगसमवायि यत्राकि पावाक्यं तत्राय
निषेधो न तु लौकिके तस्य पृथगेव प्रयोगानादर्थाभावादिति । अत एव दृष्टाः सर्वे ये ते येव विग्रहः न तु सर्वा इति । प्राज्ञाः पुरुष इत्यादि विग्रहे पि एषैव
गतिः अलौकिके वाक्ये ऽकृलोपो नद्यादेरप्रवर्तनेऽन्तरंगानपि विधीनिति सिद्धान्तात् । अत एव गोमत्प्रियः इत्यादौ सोऽनु गेव न तु हृस्व इत्यादि लोपः । ते न नु मुद्दि
घादेचो न प्रवर्तते । भाष्ये तु चकदीति तर्कं इत्याद्येव रूपं स्वरस्तु कं त्यदादं सर्वं प्रत्याख्यातं । यदाह कैयटः स्वरे तु कृते त्येव प्रत्ययं गं मुक्त्वे सेशया । विसंगप्र
तीतिप्रत्ययं गमनकारान्तेषु तु त्वकेति त्वकौ हृद्धि पुत्र इत्यादि प्रकेच् विभ्रप्रिय इत्यादि प्रदं तेषु तु स्वोगशिष्टमन्दं ता नाम्नि त्युदाहृतेति विषयावि
वेको बोध्य इत्यर्थे पि पुनरस्मुनी नाम्प्राप्ता त्याज्यो तत्रैव व्यवस्थेत्यवधेयं ॥ तृतीयासमासे ॥ अत्र सर्वनामता न स्यात् । मासपूर्वाय ए
क्षणप्रतिपदोक्तस्य हि भाष्यादर्थवसदृशेति तृतीयासमासो गृह्यते न तु कर्तृकरणे कृता इत्यादि पि तेन त्वयका कृतं त्वकत्कृतं नाम इत्यादौ निषे
धो न । समास इत्यनुवर्तमाने पुनः समासग्रहणं गौणार्थस्यापि संग्रहार्थं । तेन समासार्थवाक्ये पि निषेधः । मासेन पूर्वाय । अयं च लौकि
के वाक्ये निषेधो न तु बहुव्रीहाविति वद् लौकिके । अकारान्ते कार्यं चोर विशेषेण अनकारान्तानां प्रतिपदोक्त तृतीयासमासविग्रहेण चालौ
किके निषेधवैयर्थ्यापत्तेः । हुं हे च । इहोक्त संज्ञा न स्यात् । एवमपि साधु राजन् । समुदायस्यायं निषेधो न त्ववयवानां । तथा हि त्यदादीनां ताव
त् हुं हूत्वेन नास्ति । त्यदादीनि सर्वैर्नित्यमित्येकशेषेण बाधितत्वात् । न च हुं हे कृते एकशेष इति भ्रमितव्यं । एवं बहुव्रीहि स्वरसमासां
त प्रसंगेन हुं हूपवाद त्यपक्षस्येवैसंपापविषयमाणत्वात् । अन्यथा तेषामित्यादावपि हुं हे चेति निषेधापत्तेश्च । त्यदादिभ्यः प्राचीनां सर्वाद

ताः तत्रकाकयोरविशेषः। सर्वनाम्नोऽद्यानि मात्रे इति पुंवद्भावस्त्विष्यत एव। दक्षिणोत्तरपूर्वाणामिति। किं च। सर्वनामसंज्ञानिषेधे नाप्यसोऽदुर्वारः।
तत्र हि मात्रे ग्रहणं धकचित्सर्वनाम्नोऽनेन हृष्टानां संप्रत्ययः सर्वनामत्वेऽपि पुंवद्भावार्थं। अत एव दक्षिणपूर्वस्यै इत्यत्र संज्ञाभावेऽपि पुंवद्भावः। न च व्यवयवे
संज्ञा चेन्न निषिद्धा तर्हि अंगाधिकारेऽतस्य च तदुत्तरपदस्य चेति वचनाद् दक्षिणोत्तरपूर्वाणामित्यादौ सु~~ट् सर्वनाम्नो विहितस्यामो ङे ङसि ङ्योः सिन्~~
ङाममादिप्रसंगः। न च निषेधसामर्थ्याद् अंगस्य तदेव प्रवृत्त्या चारितार्थत्वादिति चेन्न। अंगकार्येषु सर्वनाम्नो विहितस्य आमः ङे ङि सिङ्यो रि
त्यादिक्रमेण व्याख्यानात्। विहितविशेषणत्वाश्रयणे प्रमाणं तु दक्षिणोत्तरपूर्वाणामिति भाष्यप्रयोग एव। तस्मात्समुदायस्यैवो
पप्रतिषेधो नावयवानामिति स्थितं। अत एव सर्वनामसंज्ञायां तदंतविधिज्ञापनार्थं द्वे द्वे चेति ज्ञापकमित्युक्तं। विभाषा जसीति काप्यपे नसि।
क्षयाधिकरणसप्तमी। जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्तव्ये द्वंद्वे उक्ता संज्ञा वा स्यात्। वर्णाश्रमेतरे। वर्णाश्रमेतराः। शीभावं प्र
त्येवेयं विभाषेति व्याख्यातं। तेनाकच् न भवति। तस्मिन्कर्तव्ये द्वंद्वे चेति नित्यं निषेधात्। अतस्तत्र कच् प्रत्यय एव भवति। वर्णाश्रमे
तरकाः। केचित्तु व्यवधानान्नेह शीभावः। अकचि कृते तु तन्मध्यपातिना येन शीभावः स्यादेव। प्रथमचरमतयाल्पार्धकतिपय
नेमाश्च। एते जसः कार्यं प्रति सर्वनामसंज्ञा वा स्युः। प्रथमे प्रथमाः इत्यादि शेषं रामवत्। नेमे नेमाः शेषं सर्ववत्। इहापि प्राग्व
त्शीभावं प्रत्येव संज्ञाविकल्पः। तेन प्रथमकाः इत्यादावकच् अन्यथा प्रथमके इति स्यात्। उभयशब्दस्य तु नेयं विभाषा किंतु नित्यासंज्ञेति गणे
व्याख्याप्रसंगेनोपपादितं। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां।। स्वमज्ञातिधनाख्यायां।। अंतरं बहिर्योगोप

नं २

९६६२ शब्दकौस्तुभ

परिसंख्यानयोः। एषां त्रिसूत्री गणमध्ये पिपठ्यते। साध्वाख्यातान्तेयायस्मिन्नेवोपाधौ नित्या संज्ञा प्राप्ता तत्रैव ज्ञसि विभाषया न
त्वा विधीयते। पूर्वे पूर्वा इत्यादि। स्वेस्वाः आत्मीया इत्यर्थः। आत्मनत इति वा इह त्रिसूत्र्यां यदुक्तं तत्सर्वं गणव्याख्यावसरे एवो
क्तं। विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानं। द्वितीयस्मै द्वितीयायेत्यादि। एकादेशस्य पूर्वान्तग्रहणेन ग्रहणात् ह्रिंग वि
१४ शिष्टपरिभाषया वा द्वितीयस्मै द्वितीयायै त्याप विसिद्धं॥ एवं च विभाषा द्वितीयातृतीयाभ्यामिति सूत्रं न कर्तव्यं भवति। अर्थ
वत्वात् अति परोक्षत्वाच्च द्वितीयः त्रेः संप्रसारणं चेत्यप्यमेव शृण्वते। ते नेह न। प्रकारवचने ज्ञातीयर। पटुजातीयाय जा
त्यंतात् छबंधुनि॥ ब्राह्मणराजातीयायमुखपार्श्वशतान्तपसन्ताभ्यां गहादिभ्यश्चेति छः मुखतीयाय। पार्श्वतीयायां तथा
सि द्वितीयाय भागायेत्यत्रापि न भवति। पूरणाद्भागे तीयादन्निति अनिकृते यस्मै ति चेत्यकारलोपे च सति तीयस्य लाक्षणिकत्वादि
ति दिक्॥ इति सर्वनामसंज्ञाप्रकरणं॥ स्वरादिनिपातमव्ययं। स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः। प्राग्रीश्वरान्निपाता इत्यादि अधि
धिरीश्वरे इत्यतत्पर्यंतं ये वक्ष्यंते ते निपाताः॥ नन्वेवं चादिष्वेव स्वरादयोपि पठ्यंतां प्रकृतसूत्रं च त्यज्यतां। अव्ययप्रदेशेषु निपात
शब्देनैव व्यवह्रियतामिति चेन्न। चादीनां ह्यसत्ववाचिनामेव निपातसंज्ञा। यथा लोहितं यंति पशुमन्यमानात् इत्यत्र सम
गर्थस्य पशुशब्दस्य। न तु सत्ववाचिनां। यथा पशून् अश्चक्रे चायव्यानितपादौ। स्वरादीनां तु सत्ववचनानामप्यव्ययसंज्ञेष्यते। स्व
स्ति वाचयति स्वः पश्येति यथा। अथ प्राग्रीश्वरान्निपाताः स्वरादीनि चादयोऽसत्वे इति कृते न सत्वे तमिति चेन्न। एवं हि सति नि
पात एकाजनाङिति प्रगृह्यसंज्ञा स्वरादीनामप्येकाचां प्रसज्येत। तस्माद्धि स्वरादिषु किमोदक्षिणादाच् इत्येकाचो न हि तौ॥ के

ता ३

५

श॰कौ॰

न्यमत यस्तु कृत एकाचो यदि तु चादिरेकाजन्तादिति क्रियेत तदा चादीनामसत्त्ववचनत्वं विशेषणं न लभ्येत। ततश्चाः स्यापत्यं इङ् मद
नस्तस्य संबोधनं ए अ वेत्यत्र प्रगृह्यत्वं स्यात्। ननु चादयोऽसत्त्व इत्यत्रासत्त्व इति पाठविशेषणं। तथा हि चादय इति योगो विभज्य
ते। चादयो निपातसंज्ञाः स्युः ततः असत्त्वे इह शास्त्रे चादयोऽसत्त्वे ज्ञेयाः ततश्च चादीनां सत्त्ववाचिनां प्रयोगस्त्वपर्युदासः। तेन
एवेत्यादौ न दोषः॥ एवं च उभे संज्ञे न कर्तव्ये। अव्ययं निपाता इति किं तु प्राग्रीश्वरान्निपाता इति वा व्ययानीति वा सूत्र्यतां।
ततः स्वरादीनि तद्धितश्चासर्वविभक्तिः। इत्यादि अव्ययीभावश्चेत्यंतं सूत्र्यतां। ततश्चादयोऽसत्त्वे इत्यारभ्य यावदधिरीश्वरे वि
भाषा कृञीति। तत्र यस्मिन्प्रदेशे निपातग्रहणं तत्र चादिग्रहणमस्तु। अव्ययप्रदेशेऽव्ययग्रहणं निपातग्रहणं चेति॥ उ
च्यते। अव्ययसंज्ञाविरहेऽन्वर्थसंज्ञाबललभ्यं वक्ष्यमाणप्रयोजनं न सिध्येत्। निपातसंज्ञाविरहे तु शान्तनवाचार्यप्र
णीतस्य निपाता आद्युदात्ता इति फिट्सूत्रस्य विषयविभागो न लभ्येत। अथ फिट्शास्त्रे हूणावादिशब्दानामिव निपातशब्द
स्याप्यन्यत एवार्थोऽध्यवसायः। तर्हि अव्ययसंज्ञामात्रेणानिर्वाहः सुकर एवेत्यवधेयं। महासंज्ञाकरणं अन्वर्थसंज्ञाविज्ञा
नार्थं न व्येति विविधं विकारं न गच्छति सत्त्वधर्मान् लिंगसंख्याकारकादीन्न गृह्णातीति यावत्। तेनोपसर्जनप्रतिषेधः सि
द्धः। अत्युच्चैसौ अत्युच्चैस इति। अतिक्रान्तप्रधानत्वेन सत्त्वधर्मपरिग्रहान्नेहाव्ययसंज्ञा न तु स्वरादिसूत्रे शब्दः पठ्य
ते तत्र कथं तदंतप्रसंग इति चेन्न। अन्वर्थसंज्ञैव तदंतविधेरपि ज्ञापनात्। अन्यथाऽनुपसर्जने प्रसंगाभावेन तन्निवृत्त्यर्थो

राम॰

यास्तस्याः वैयर्थ्यापत्तेरस्ति न परमस्वः। परमोऽत्रेरित्यादौ स्वरादिपाठात्वेऽव्ययत्वसिद्धं। अव्ययसंज्ञायाः अन्वर्थत्वं आथर्वणो
प्रणवविद्यायां श्रुतिरपि दर्शयति सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्ययमिति॥ एतेषु प
न्न व्येति किं तु सदृशमेकप्रकारं तदव्ययमिति योजना यद्वा यस्मान्न व्येति तस्मादव्ययमिति। त्रिषु लिंगेषु सदृशं लिंगविशेषप्र
तिपादने सामर्थ्याभावादिति भावः। विभक्तिषु कारकेषु एकत्वादिसंख्यासु। अव्ययीभावस्य यद्यपि लिंगकारकसंख्यायोगोऽस्ति
तथापि वचनादव्ययत्वं। अथ स्वराव्ययं। स्वरिति स्वर्गपरलोकयोः स्वर्गे स्वर्यायेव यास्वर्जेत्लधेत्लेषु। परलोके। स्वर्यातस्य पि
पुत्रस्येति। अंतरिति मध्ये। अंतर्बाष्पश्चिरमनुचरः॥ प्रातरिति प्रत्यूषे प्रातः संध्यामुपासीत। एते त्रयोऽन्तोदात्ता इति का
शिका॥ तत्र स्वरित्यस्य शतृसंस्वरितत्वात्तथा च फिट्सूत्रं स्वरौ स्वरितौ विति प्रयोगश्च। अंतरिक्षमप्पोस्वः। यत्तु प्रातः
शब्दः आद्युदात्त इति कश्चित्। तन्न। प्रातरग्निं प्रातरिंद्रं हवामहे इत्यादावंतोदात्तस्यैव प्रसिद्धतरत्वात्। पुनरित्यादि छंदांतः।
अप्रथमे विशेषे च। अप्रथमे पुनरुक्तं। विशेषे किं पुनर्ब्राह्मणाः पुण्याः। सनुतरित्यंतर्धाने। सनुतश्चोरो गच्छति। उच्चै
रिति महति। नीचैरित्यल्पे। शनैरिति क्रियामान्द्ये। ऋधगिति सत्ये वियोग शीघ्र सामीप्य लाघवेष्वित्यन्ये ऋत इति ज्ञे
ने। युगपदित्येककाले। आरात् दूरसमीपयोः॥ पृथगिति भिन्ने। एते सनुतर प्रभृतयो नवांतोदात्ताः इति काशिका। प्रा
ने श्चिघन्तो अद्रिवः ऋधगित्या समर्त्यः इत्यत्र तु शाने ऋधक् शब्दौ आद्युदात्तौ प्रयुज्येते॥ ह्यस्त इति अतीतेऽह्नि श्वो ना

गते ह्नि दिवेति दिवसे। रात्रा विति निशि। सायमिति निशामुखे। चिरमिति बहुकाले। मनागिति ईषदर्थे। ईषदित्यल्पे। जोषमिति सुख
मौनयोः। तूष्णीमिति मौने। बहिरिति। अवस्तादित्येतौ वाह्ये। समयेति समीपे मध्ये च। आ अंसमया निकषेत्यन्तिके च। अलं अलं कानि
कषा ह निष्पति। स्वयमित्यात्मनीत्यर्थे। स्वयं कृतं। वृथेति व्यर्थे। नक्तमिति रात्रौ॥ नञिति निषेधे हेताविति निमित्तार्थे। इद्धेति
प्राकाश्ये। प्रेत्यद्धेति स्फुटावधारणयोः। तत्वातिशययोरित्येके। सामीत्यर्द्धे जुगुप्सितयोः॥ एते ह्यस्मप्रभृतयः साम्प्रताह्यावि श्रु
तिरंतोदात्ता इति काशिका। दिवा चिंतमाक्र रावति॥ वृथा स्वजात्यथिमि॥ नक्तं दस्ले कुह चिद्दिवे युः इत्यादौ त्वाद्युदात्ताः
प्रयुज्यंते। वत्। वत्प्रत्ययांतमव्ययसंज्ञं स्यात्। ब्राह्मणवत्। तेन तुल्यमित्यादिभिर्विहितो वतिरिह गृह्यते। न तूपसर्गाद्धात्वर्थे इ
ति विहितः सत्वार्थकत्वात्। यदुद्वतो निवतो यासि वप्सत्। सनेति नित्ये। सनाज्जातमद्दृद्रा। सनातनः॥ सनत्। इदम
पि नित्ये। सनत्कुमारः। तिरसिति अंतर्द्धौ तिर्यगर्थे च। तिरोहितः। कार्ष्णकुरु। परिभूते तु लक्षणा तिरस्कृतोरिः इति यथा।
सनेत्यादयः तिरोन्ता आद्युदात्ताः इति काशिका। सनाच्च होता नमस्य सत्सितिरः पुरू चिदर्णवं इत्यादौ त्वंतोदात्ता प्रयु
ज्यते। अंतरेत्यंतोदात्तो मध्ये विनार्थे च। त्वां मां चांतरा कमंडलुः। त्वा मंतरा तामारमायत्ताक्षि। अंतरेणेति वर्जने। अंत
रेण हरिं न सुखो ज्योगिति कालभूयस्त्वे प्रश्ने शीघ्रार्थे संप्रत्यर्थे च। कमिति वारि मूर्द्धनि निन्दासुखेषु। वारिणि। कंजं
पद्मं। मूर्द्धि। कंजाः कचाः। निंदायां। कंदर्पः। सुखे कंसुः॥ शमिति सुखे। शंकरः। सहसेत्याकस्मिकाविमर्शयोर्दिवः

अस्तूनं सहसा पपात। सहसा विदधीत न क्रियाम्। स्वधेति पितृदाने। अलमिति। भूषणपर्याप्तिशक्तिवारणनिषेधेषु। भूष
णोऽलंकारः पर्याप्तौ। अलमस्य धनं। वह्नित्यर्थः। शक्तौ अलं मल्लो मल्लाय। शक्त इत्यर्थः। वारणे। अलमतिप्रसंगेन। नानि
षेधे। अलप्यालमिदं वभोर्यत्स दारानयाहरत्। न वक्तव्यमित्यर्थः। वषडिति हविर्दाने। विनेति। अस्तीति सत्तायां। अस्ति
परलोकमतिरस्यास्तिकः। उपांश्विति। अप्रकाशोच्चारणे रहस्ययोः॥ क्षमेति क्षांतौ। क्षमा करोतु भवान्। विहायसेति वि
यदर्थे। विहायसा रम्यमितो विभाति। दोषेति रात्रौ। मृषा मिथ्येत्येतौ वितथे। मुधेति व्यर्थे। अंतिकातो सुनुकस्तु नः॥ कृन्मकार
संध्यक्षरांतः॥ अव्ययीभावश्च॥ इदं गणसूत्रं तत्र यत्र प्रष्ठाध्यायीस्थत्रिसूत्रासमानार्थी वैयर्थ्यं तु उद्धरिष्यते। पुरेति अ
विरते चिरातीते भविष्यदासन्ने च। पुराधीतेऽविरतमपाठीदित्यर्थः। पुरिलुङ्चेति लट् चिरातीते। पुरापि नवं पुराणं। पु
रेदमूर्द्धं भवतीति वेधसा। समनंतरं भविष्यतीत्यर्थः। स्यात्प्रबंधे चिरातीते निकटागामिके पुरेत्यमरः॥ मिथोद्वति
रहः सहार्थयोः। मैत्रेयं ते मिथो मिथः। इत्यपि पूर्ववत्। प्रायसिति बाहुल्ये। मुहुरिति पुनरर्थे। प्रवाहुकमिति सम
काले ऊर्ध्वार्थे च। केचित्तु प्रवाहिकेति पठंति। आर्यहलमिति बलात्कारे। शाकटायनस्वाहा॥ आर्येति प्रतिबंधे
हलमि तिप्रतिषेधविवादयोरिति। अभीक्ष्णमिति पौनःपुन्ये। साकं सार्द्धमित्येतौ सहार्थे। नमसिति नतौ।
हिरुगिति वर्जने। धिगिति निंदाभर्त्सनयोः। तसिलादिस्तद्धितएधाच्पर्यंतः। शसूतसी। कृत्वसुच्। सुच्। आस्

व्या॰२

यालो। त्वमर्थो ऽथेति। तसिलादीत्यादिरयमर्थः। पंचम्यास्तसिलित्यारभ्य प्रधाङ्क्षेत्येतदन्तैः सूत्रैरुक्तो यस्तद्धितस्तदन्ताः स्वारादिषु बो
द्धव्याः। तथा चैव हूर्थी च्छस्त। प्रतियोगे पंचम्यास्तसिः। क्रियाभ्यावृत्तिगणने कृत्वसुच्। द्वित्रिचतुर्भ्यः सुच्। दूरणश्च आसिरित्युणादि
सूत्रेणाऽऽसिप्रत्ययो विहितः। अयाद्यत्युदाहरणं॥ पञ्चम्यर्थं पूर्व विभिन्नमाश्याल्कं दर्शिस पचकर्तरि स्थितः। विभाषासातिकात्स्न्ये दे
यत्रा च। एतदन्ता अपि ग्राह्याः॥ अमू इति। अमु च च्छन्दसीति विहितः आमित्यंगीकारे। आमू कूर्मः। किमेतित्ङ्व्यय घादाम्
कास्व प्रत्ययादाममं त्रेलिटीत्यपीति केचित्॥ प्रतामू इति शान्तो प्रशान्तिति समानार्थो प्रशीन देवदत्तो यज्ञदत्तेन। प्रतानि
ति विस्तारे। माङ्इति निषेधो मा भवतु मा भविष्यति। माङिति निषेधाशंकयोः माकाषीं अस्य पापं मा भूदिति। आकृतिगणश्चायं
तिनान्येति ग्राह्याः। तद्यथा। ओमिति ब्रह्म। अल चकाममिति स्वार्थे घोत्र काममित्यतिशये। भूयदिति पुनरर्थे। सांप्रतमि
तिन्याय्योपर मिति किंत्वर्थो गुणावान्नसि। परमहंकारि॥ साक्षादिति प्रत्यक्षे। साचीति तिर्यगर्थे। सत्यमित्यर्द्धांगीकारे। मं
क्ष्विति शीघ्रे। आश्विति चासंवत इति वर्षो अवश्यमिति निश्चये। सपदि शीघ्रे। बलवदित्यतिशयो बलवदपि शिक्षितानां
। प्रादुः आविः इति प्रकाशे। अनिशं नित्यं नित्यदा सदा अजस्रं संततमेते सातत्ये। उषेति रात्रौ उपातनो वापुः॥ रोद
सी द्यावापृथिव्यर्थे ओमिति ब्रह्मवाची। भूर्भुवरिति पृथिव्यंतरिक्षलोकयोः॥ भूर्लोको भुवर्लोकः। झटिति झगिति तरसा
शीघ्रे। स्नाकुद्रुतार्थे घ्रंक्षि प्रमितिचा। अतिचेत्यतिशये सु सु इति प्रशंसायां कु इति कुत्सिते च दर्थयोः। कापथः कवो
ष्णोऽत्रं जसेतितत्त्वशीघ्रार्थयोः। व इति बहिरर्थो। मिथुरिति द्वावित्यर्थे मिथुमन्त्रयेते॥ विष्वगिति समंततो भावे। साङ्ग

गिति श्री ग्रो। भाजकूपं चतिति। अन्वक्त्यानुकूल्ये चिरायचिररात्रायचिरस्याद्याश्चिरार्थकाः। आद्यशब्दाच्चिरं चिरेण चिरादिति गृह्य
ते। अस्तमिति विनाशे। आनुषगित्यानुपूर्व्ये आनुषक्प्रविशती त्याहवंधुता। अनु मानेनुषगिति शाकटायनः। आनुषगिति दाने
केचित्। आम्नास्तद्भूति शीघ्रंसा प्रतिकयोः। अम्बरेवेति रूफोवा। स्थाने इति युक्तार्थेवरमिति हि दुःखदुत्कर्षोद्भूनिक्त्वार्थो बलारि
तिह ठार्थो श्रुदृति पूजायां। सुनासीरः। क्षमेतिक्षान्तौ। अर्वागिति प्राचीनेवदिक्क्षपक्षेशुदि शुक्लपक्षो इति स्वरादिः तद्धितश्चासर्ववि
भक्तिः। तद्धितांतः शब्दोऽव्ययंस्यात्। यस्मात्सर्ववचनत्रयात्मिकाविभक्तिर्नोत्पद्यते। किं त्वेकमेव चनांततः तत्रात तद्धितइतिकिं।
एकः द्वौ बहवः। असर्ववेविभक्तिरिति किं। औपगवः। ननु गोदोवरणाः इत्यादावतिव्याप्तिः॥ नचलुप्तयोगाप्रख्यानाद्योगप्रमाणे
तदभावेदर्शनंस्यादिति परतः सूत्रकृतो मतेनैतेनतद्धितांता इति वाच्यं। एवमपि पचतिकल्पं। पचतिरूपमित्यादावतिव्याप्तेर्दु
वीरत्वादिति चेत्। अत्राह। वार्तिककारसिद्धमनुनामात्। तसिलादयः प्राक्त्वाशपः शस्प्रभृतयः प्राक् समासांतेभ्यो मांतः कृत्वोऽर्थाः॥
तसिवती। नानाञाविति। नचइवे प्रतिकृतावित्यधिकारे बलपूर्वे बिम्बेमास्यात् लूच्छंदसि॥ इति विधानात्तदंतस्यासंग्रहइति
वाच्यं। प्रकारवचने थालिति प्रकरणाएवप्रयत्नादिभ्यइवे थाल्छंदसि। प्रकारवचनेद्दमस्थ्युः इति पठितुं शक्यत्वात्। स्वरादि
गणे आस्थालाविति पाठेन सिद्धत्वाच्च। मांतइति। आमूत्रं चेत्यर्थे तसिप्रतियोगेपंचम्यास्तसिः तेने कदिकृतसिद्धतिहावपि
गृह्यते स्यादेतत्। सूत्रमतेकथं मुक्तिसंभवः। यावज्जाकर्मणि द्वितीयात्येकयोर्द्विवचनैकवचनेइत्यादीनांस्वादिवाक्येनए

कवाक्यतापक्षेऽव्ययेभ्यः स्वादीनां प्राप्तिरेव नास्ति। अव्ययादाप्सुप इति ज्ञापकेन तु सर्वा विभक्तयः। उच्यते। अव्ययेभ्यः सप्तानामपि
विभक्तीनां त्रीण्यपि वचनानि। तथा सप्तानामप्येकवचनत्वे वा। अथवा प्रथमाया एकवचनत्वं। यद्वा प्रथमादी एकवचनमेवेति
पक्षचतुष्टयं यद्यपि ग्रन्थे पुलभ्यते तथापि प्रथमैकवचनमात्रमेवेति चतुर्थपक्ष एव क्षोदक्षमः तमेव गृहीत्वा सूत्रस्याप्युक्तिसंभ
वः स्पष्टः॥ इतरत्तु पक्षत्रिकमभ्युच्चयमात्रमात्रेणोपन्यस्ते। ननु तत्त्विंकां तथा हि। यदि कर्मणि द्वितीयेवमभिहिते प्रथ
मेव। एका च एकवचनमेवेत्यादिरर्थो नियमः॥ यदि वा द्वितीया कर्मण्येवेत्यादिः उक्तेतार्थोपेक्षो विभक्तिनियमः॥ यदि वा।
एकवाक्यत्वे सामान्यापेक्षवचनविभक्तिनियमेऽपि वाऽव्ययादाप्सुप इति सामान्यापेक्षज्ञापकाद्विभक्तिसिद्धिस्तदाऽविशे
षात्सप्तानामपि विभक्तीनां त्रीण्यपि वचनानीति ४ पक्षो लभ्यते। यदा तु द्वित्वे द्विवचनमिति सूत्रयित्वा एकवचनमि
त्येवं पृथक् सूत्र्यते तदन्यथानुपपत्त्या च कर्मण्येव द्वितीया न करणादौ। द्वित्वबहुत्वयोरेव द्विवचनबहुवचने न त्वेकत्वा
दिकर्मणा सजातीयापेक्षो नियमः। ततश्चाव्ययेभ्यः सकलविभक्तिप्राप्तौ एकवचनमित्यनेन नियमः। क्रियते यत्रै
कवचनं चान्यत्र प्राप्नोति तत्रैकवचनमेवेति यदि वा सामान्यापेक्षनियमाश्रयणादव्ययादप्राप्तौ एकवचनमिति
सूत्रं क्रियते। तस्य च ङ्याप्प्रातिपदिकादित्यनेन एकवाक्यता। तथा च ङ्यावादिभ्यः कर्मादिषु एकवचनं सिद्धमेवे राम॰
ति एतत्सूत्रबलादव्ययेभ्य एव भवति। तिङन्तात्कृतं न भवति। एकवचनमित्यस्याप्राप्तप्रापणार्थत्वेपि ङ्याप्सूत्रे

णाऽएकवाक्यत्वात्। एवं देशांतरे पाणिनसामर्थ्यात्त्वाख्यातं त्वेणापि ङ्याप्सूत्रं विधायकमिति द्विविवे द्विवचनमित्यादेर्नियामकत्वं संगच्छ
ते। तदा त्र्यव्ययेभ्यः सर्वेभ्योपि कवचनानीति द्वितीयः पक्षो लभ्यते। यदा तु हि ती याकर्मेणापि वेत्यादिः सामान्यापेक्षः प्रत्ययनियम
मः त्र्यव्ययेभ्यस्तत्प्रथमैव। प्रथमा प्रातिपदिकार्थ एवेति नियमेन हि कर्माधिकास्थल एव सा निवार्यते। द्व्येकयोरिति तु यथान्या
समेव तत्र च एकत्व एवैकवचनं न संख्यांतरे इति त्वज्जातीयापेक्षप्रत्ययनियमपक्षः॥ तदा तिः संख्याभ्योव्ययेभ्यः प्रथमाया
वचनत्रयमपि भवतीति तृतीयः पक्षो लभ्यते। त्रिष्वथयीषु पक्षेषु पचतिकल्पं। पचतिरूपमित्यादौ दोषः। तत्र हि प्रथमैकवच
नमात्रमिष्यते। उक्तपक्षत्रये प्यधिकं प्राप्नोति। तस्माद्द्वितीयपक्षरीत्या सकलैकवचनानि प्राप्यप्य एकवचनमित्येकत्व
स्याविवक्षितत्वात्प्रथमातिक्रमे कारणाभावात्प्रथमैकवचनमेव कर्तव्यमिति सिद्धांतः एवं च सत्यपि सूत्रस्योक्तिसंभवे प
चतिरूपमित्यादावतिव्याप्तिभयात्परिगणनमेव कर्तव्यं सूत्रं तु न कर्तव्यमिति स्थितं। कृन्मेजंतः कृद्योमांत एजंतश्च तदं
तमव्ययसंज्ञं स्यात्। स्वादुंकारं भुंक्ते। वक्षेरायः। तुमर्थे सेडिति वचेः सेप्रत्यये रूपं। नन्वेवं कारयां चकारेत्याम्न्तस्य न प्रा
प्नोति। अत्रातिं वितयालिटः कृत्वेपि मांतत्वाभावात्। सत्यां स्वरादिषामिति पाठात्सिद्धं। यदि तु तत्र तद्धितस्येव ग्रहणं तर्हि
इह कृदंतत्वादुत्पन्नानामपि सुपांश्रामइति लुग्भविष्यति। तत्र हि लेरिति नानुवर्त्तते। न चैवं तरवादेरपि लुग्वर्त्तिः॥
अपरिसमाप्ताथैतपात एवाघुत्पत्तेरेवाभावात् अपरिसमाप्तार्थत्वं च संख्याकर्चादिविषयकोपस्थिताकांक्षत्वं। अतएव

5

का०कौ०

वानुप्रयोगः प्राप्नोति। आमंताथे गतप्रकर्थोऽपि प्रतीतिस्तु अनुप्रयोगादुत्पन्नेन तरबादिना भविष्यति। अत एव सूत्रितं। कृञ्चानु
प्रयुज्यत इति। अनुशब्दो हि व्यवहितस्य विपरीतस्य च प्रयोगनिवृत्त्यर्थ इति वक्ष्यते। यद्वा पूर्वसूत्रोक्तनिष्कर्षरीत्या आमंतात्सोरिवोत्प
न्नो हल्ङ्यादिलोपो भविष्यति॥ अस्तु वा कदंतं यत्नेऽजंतमिति वाक्यार्थः॥ आमन्तं हि प्रत्ययलक्षणेन कृदंतं॥ श्रूयते च मा तां।
न चैवं प्रतामौ प्रतामः। लवमाख्याणो लो रित्यादावतिव्याप्तिरिति वाच्यं। स्वरादिषु प्रशान्शब्दस्य पाठेन धातोः प्रत्ययलक्षणे
न कृदंतत्वमुपजीव्याव्ययसंज्ञा न भवतीति ज्ञापितत्वात्। न च मीनो धातोरिति नत्वे कृते नेते न्मांतमिति कथं ज्ञापकतेति वाच्यं
। नत्वस्यासिद्धत्वात् तेन च शान्ततेर्जनत्वस्यार्थत्वे रवृत्तिलिप्सान यतीत्यादिप्रयोगस्तिङ्घर्थे चुरादित्वस्वीकारेणानित्य
सन्नंतत्वाभावान्तस्यैवायं स्वरादिषु पाठ इति वाच्यं॥ अनभिधानान्तस्यात्क्विपोऽनुत्पत्तेः। अत्र च ज्ञापकत्वं वर्णापरं भाष्यमेव
प्रमाणं। अव्ययमित्यन्वर्थसंज्ञाबलादसत्वार्थस्य साम्यवाचिन एव प्रशाम्शब्दस्य तत्र ग्रहणं न तु शांतिमद्वाचकस्यापि
न प्रशामौ प्रशामद् इत्युदाहरणं न विरुध्यते। स्वस्यादीनां तु सत्ववाचिनामपि पाठसामर्थ्यादव्ययत्वमिति विशेषः। अं
तग्रहणसामर्थ्यान्नित्यं योगे बहुव्रीहिराश्रीयते। तेन श्रोपदेशिक एकजूग्रह्यते। नेह। श्राधये॥ चिकीर्षवे। कुंभ
कारेभ्यः। वस्तुतस्तु अंतग्रहणमनर्थं। लक्षणप्रतिपदोक्तपरिभाषयैवातिप्रसंगभंगात्। ननु वर्णग्रहणे इयं प
रिभाषा न प्रवर्त्तते। अन्यथा एचोपवायाव इत्यादावतिप्रसंगादिति चेन्न॥ एवमपि वद्विरंगपरिभाषया सन्निपा राम०

तल्लक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषया चेष्टसिद्धेः। अयमत्रार्थः। सन्निपातः संश्लेषः। तन्निमित्तो यो विधिः स
तद्विघातस्यानिमित्तं। तं सन्निपातं यो विहन्तीति स तद्विघातस्तस्येत्यर्थः। एवं च सत्युक्तं निपातलक्षणस्य घेर्ङितीति गुणस्य
बहुवचने जस्लोपे दित्येतस्य चाव्ययसंज्ञां प्रति निमित्त[illegible]ने त्ववधेयं। तथा परिभाषायाः प्रयोजनं तराणपि संजि। दिङ्मात्रे तू च्य
ते। श्रीयं कुलं। तस्मै श्रीयायेत्यत्र नो लोपो भवति। तथाऽतिजरं कुलं अतिजरं अतिजरेण। अतिजरैः अतिजरैः। अतिजरादित्यत्राऽम
तुन्नोन्से अमात इत्येते षकारमुपजीव्य कृतेषु सत्सु जरसादेशो न भवतीत्यादि। अनित्या चेयं परिभाषा कष्टाय क्रमणेन या
सयोरित्यादिज्ञापकात्। तेनाग्निमानित्यत्र ह्रस्वनुड्भ्यां मतुबित्यन्तोदात्तात्तस्मात्परस्य मतुप उदात्तत्वे कृते शेषनिघात्वे
न प्रकृतेरनुदात्तत्वं भवत्येवेति दिक्। गोस्त्रोनोरित्यत्र नेदं सूत्रं प्रवर्त्तते। उणादीनामव्युत्पन्नत्वात्। व्युत्पत्तिपक्षेपि
त्विरव्ययमित्युणादिसूत्रेण डौ डो प्रत्ययांतादर्थप्रत्ययांतादेवाव्ययमिति नियमस्य कृतत्वात्। क्त्वातोसुन्कसुनः। एतदन्तमव्य
यं स्यात्। कृत्वा। पुरा सूर्यस्योदेतोः। पुरा वत्सानामपाकर्तोः। भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्। पु
रा क्रूरस्य विसृपो विरप्शिन्। पुरा जतुभ्य आतृदः। सृपितृदोः कसुन्निति कसुन्। अव्ययीभावश्च। अयमव्य
यमव्ययसंज्ञः स्यात्। विषयपरिगणनं कर्त्तव्यं। लुकि। मुखस्वरोपचारयोर्निर्दिष्टत्वाच्चेति। पु उपाग्नि प्रत्यग्नि। अ
व्ययादाप्सुप इति सुपो लुक्। उपाग्नि मुखः। मुखं स्वांगमित्युत्तरपदान्तोदात्तत्वे प्राप्ते नाव्ययदिक्शब्दगोमह

तस्थूलमुक्तिपृथुवत्त्वेप्सदूति प्रतिषेधः। तथा च वहुव्रीहो प्रकृत्येति पूर्वपदप्रकृतिस्वर एव भवति। पूर्वपदं च समासस्वरे
णांतोदात्तं विसर्गस्थानिकस्य सकारस्योपचार इति प्राचां संज्ञा। तन्निवृत्तौ यथा। उपपयः कारः। उपपयः कामः॥ इहान्तः
कृकमीमिति प्राप्तं मत्वमनव्ययस्येति पर्युदस्यते। इह मुखस्वरनिवृत्तिरेव मुख्यं प्रयोजनं। लुक्तु तोऽव्ययीभावादिति इ
ति विशेषप्रतिषेधात्सिद्धः। उपचारनिवृत्तिरपि न प्रयोजनं। अतः कृकमीत्यत्रानुत्तरपदस्थस्येत्यनुवृत्त्यैव तत्सिद्धेः॥
परिगणनात् किं। उपाग्न्यधीयान॥ सुबामंत्रिते ति पराङ्गवद्भावेन षाष्ठमामंत्रितस्य चेत् घुदात्तत्वं यथा स्यात्। तत्र ह्यव्य
यानां प्रतिषेध उपसंख्यानं च। उच्चैरधीयाने पानेऽस्या द्यो माभूदिति। तथा। उपाग्निकमित्यादौ ऽव्ययसर्वनाम्नामिव
कच्प्राक्। उपकुंभंमन्यः स्वित्यनव्ययस्येति अनुवर्त्तमाने ऽरुर्द्विषेति मुम्प्रतिषेधो न। उपकुंभीभूतः। अस्य च्वावि
त्यस्य चौपसंख्यानिकः प्रतिषेधो न भवति। वस्तुतस्तु। इदं सूत्रं न कर्त्तव्यं। लुक उपचारनिवृत्तेश्चान्यथोपपत्तेरु
क्तत्वात्। मुखस्वरनिवृत्तिः परमवशिष्यते। तत्र केचिदाहुः। मुखस्वरो नेष्यत एवायघेनावत्प्रयोजनं स्यात्तत्रै
वायं ब्रूयान्नाव्ययादव्ययीभावाच्चेति भाष्यस्वरसादिति। अन्ये तु अनव्ययमव्ययं भवतीत्यर्थे संज्ञाविज्ञानादे
व मुखस्वरो नेष्यत एवायघेनावत्प्रयोजनं स्यात्तत्रैवायं ब्रूयान्नाव्ययादव्ययीभावाच्चेति भाष्यस्वरसादिति राम०
॥ अन्ये तु अनव्ययमव्ययं भवतीत्यन्वर्थसंज्ञाविज्ञानादेव मुखस्वरस्यापि निवृत्तिर्भविष्यतीति स्यादेतत्। स्वरा

द्वित्वे नैव सिद्धत्वात्तद्धितश्चेत्यादि चतुःसूत्री व्यर्थेति तत्र हि तसिलादिस्तद्धितः एधाच्पर्यन्त इत्यादिना ज्ञापितोऽयं श्चैत्यं तेन शस्ति
मो णादिकं च वर्जयित्वा तद्धितश्चासर्वविभक्तिरित्यस्यार्थः संगृह्यते। कृन्मकारसंध्यक्षरांतं इत्यनेन कृन्मेजंत इत्यस्यार्थः
संगृह्यते। न लोकाव्ययेत्यत्राव्ययप्रतिषेधे तोसुन्कसुनोः प्रतिषेध इति वक्ष्यमाणं च लभ्यते इति। वस्तुतः कृन्मका
रसंध्यक्षरांतं इत्यनेन कृन्मेजंत इत्यस्यार्थः संगृह्यते। क्त्वातोसुन्कसुनः अव्ययीभावश्चेति सूत्रद्वयं तु स्वरूपेणैव पश्च
तद्द इति। अत्राहुः॥ पुनर्वचनमनित्यत्वज्ञापनार्थं। तेन प्रागुक्तं लुङ्मुखस्वरोपचार इति परिगणनं लभ्यते। न लो
काव्ययेत्यत्राव्ययप्रतिषेधे तोसुन्कसुनोः प्रतिषेध इति वक्ष्यमाणं च लभ्यत इति। वस्तुतस्तु मास्तु चतुःसूत्री। अ
व्ययीभावश्चेति तु गणेऽपि मास्तु॥ उक्तरीत्याऽनुवर्त्य संज्ञयैव सिद्धेः। तोसुन्कसुनोः प्रतिषेध इत्येव लाघवात्पठ्य
तामिति युक्तः पंथाः॥ शि सर्वनामस्थानं। शि इत्येतत्सर्वनामस्थानसंज्ञं स्यात्। कारीषि। सर्वनामस्थाने चासंबु
द्धाविति दीर्घः॥ यदि तु पदं शेषवशो चेत्याद्युच्यते तर्हि सुटि न स्यात्। अथ यशि सुट् इति तु उच्येत तर्हि नपुंसकसुटा
पि ग्रहणं स्यात्॥ शिग्रहणं तु शसर्थं स्यात्। तस्मात्संज्ञा तावत्करणीया। महासंज्ञाकरणं तु पूर्वाचार्यानुरोधात्॥
सुडनपुंसकस्य। सुडिति प्रत्याहारः। नपुंसकभिन्नस्य स्वादिपंचवचनानि उक्तसंज्ञानि स्युः। राजा राजानौ

राज्ञान इत्यादि। प्राग्वद्दीर्घः॥ अनपुंसकस्येति किं। साममनी विभाषाङिश्योरित्यल्लोपाभावे दीर्घो न भवति। अनपुंसकस्येति पर्यु-
दासः। तेनास्य सूत्रस्य स्त्रीपुंसयोरेव प्रवृत्तिरिति नपुंसके न विधिर्नापि प्रतिषेधः॥ तेन वनानि संतीत्यत्र पूर्वसूत्रे प्राप्ता संज्ञा
भवत्येव। प्रसज्यप्रतिषेधे तु साविनि निषिध्येत। यद्यपि अनंतरस्य विधिर्वा भवति निषेधो वेति समाधातुं शक्यते तथापि अस्य समर्थ-
समासो वाक्यभेदश्चेति गौरवं स्यादेव। प्रत्यासत्त्या स्त्रीपुंसयोरिति वक्तव्ये अनपुंसकस्येति सूत्रपाठः प्रसज्यप्रतिषेध एव संमत
इति गौरवं च प्रामाणिकं॥ एतेन हि केचिन्नसमासमसामर्थ्येऽपि विभाषेत्यव इति ज्ञाप्यते तेनाश्राद्धभोजी ब्राह्मण इत्यादि सिद्धं भ-
वति॥ नवेत्यनुवादः। तथा विभाषोर्णोरित्यप्राप्तविभाषा प्रोर्णुचीत्यत्र परत्वात् सार्वधातुकमपिदिति विभाषा॥ इति शब्दः
काकाक्षिन्यायेनोभाभ्यां संबध्यते। स च पदार्थविपर्यासकृत्। तेनार्थ एवेह संज्ञी संज्ञा च। निषेधविकल्पयोर्विकल्पः सं-
ज्ञा स्यात्। स्वार्थाभावे तया न च तयोः पदार्थतया ऽनन्वयप्रसंगः॥ एतत्सूत्रारंभसामर्थ्याद्देव विधिवाक्येषु विकल्पवा-
चिपदस्य लाक्षणिकत्वात्। उभयत्र विभाषार्थे वेदं सूत्रं। प्राप्तविभाषायामप्राप्तविभाषायां च नास्य प्रयोगः। तथा हि
।विभाषोपपदेन प्रतीयमान इति प्राप्तविभाषा। तत्र स्वरितञित इत्यादिना नित्यमात्मनेपदे प्राप्ते विभाषायामप्राप्त राम॰
विभाषायां च नास्य प्रयोगः। तथा हि। विभाषोपपदेन प्रतीयमान इति प्राप्तविभाषा। तत्र स्वरितञित इत्यादिना
नित्यमात्मनेपदे प्राप्ते विभाषाश्रुत्या पक्षे तन्निवृत्तिमात्रं क्रियते। यक्षे भवतीति त्वनुवादः। तथा विभाषोर्णोरि

त्यप्राप्तविभाषायामोर्गुवीत्यत्र परत्वात्सार्वधातुकमपिदितिनित्यङित्वाभ्युपगमात्। तत्र कुणोवितेत्यादावभावांश स्यघ्यितत्वाद्वा
वाशामात्रपरता। विभाषाश्वेरित्युभयत्रविभाषायांच यदि विधिमुखेन प्रवृत्तिस्तर्हि पित्त्वेवविकल्पः स्यात्। कित्त्वे तु यजादित्वा
न्नित्यमेवस्यात्। अथप्रतिषेधमुखेन प्रवृत्तिस्तर्हि कित्त्वेवविकल्पः स्यान्नतु पित्त्वे॥ नच पित्त्वेविधिस्तुत्वे नकित्त्वे तु निषेध
मुखेनेत्युभयथापिप्रवृत्तिरस्त्विति वाच्यं वैरूप्यलक्षणवाक्यभेदापत्तेः॥ संज्ञाकरणे तु सति श्रुतिक्रमानुरोधेन नेतिनिषेधः
प्रथमं कित्त्वे प्रवर्त्तते॥ ततः किदकिद्रूपे सर्वस्मिन्लिटि ऐकरूप्यं प्रापिते सति पक्षेभवतीत्यैकरूप्येण विधिमुखेनैवविकल्प
: प्रवर्त्तते॥ आकृतौ पदार्थे समुदाये सवृत्तलक्षणं प्रवर्त्तत इति दर्शने इदं सूत्रमारभ्यते॥ पदातु प्रतिलक्ष्यं विभाषाश्वेरि
त्येतद्विघतेतदा क्वचिद्विधिमुखेन क्वचिन्निषेधमुखेनप्रवृत्तेः संभवान्नेदं सूत्रमारंभणीयं। तथाचवार्त्तिकं॥ अ
ङ्गिष्णाधाविदितत्वादिति॥ वस्तुतस्तु आकृतिपक्षेपि अदर्शनेषेवनवाश्वेरित्यादि पठित्वा इदं सूत्रं प्रत्याख्यातु
शक्यं। युक्तं चैतत्॥ अन्यथाऽन्यार्थमप्याईरधासंज्ञाविभाषेणोरित्यत्र सवर्ण्णेन॥ प्रतिषेधावलीयांसो भवंती
प्रोर्णोत्रीत्यत्रापिसार्वधातुकमपिदित्यस्यनिषेधस्ततो विकल्पश्च स्यात्। नन्वारंभमाणेसूत्रेनवेत्यखंड निपा
तस्यार्थोनिषेध एव संज्ञी किं न स्यादितिचेन्न। तथासति नबहुव्रीहावित्यनेनैवसिद्धो विभाषादिक्तमासद्वृत्त्यसवे
प्यर्थापत्तेः॥ इतीति किं। घुसंज्ञावत्त्वहृतपमितिवचनाच्छृतस्य संज्ञामाभूत्। तथाहि सति विभाषाश्वेरित्यस्य नवाश

द्वः श्वयतेरादेशाद्रूपार्थः स्यात् । इति शब्दे तु सति अर्थः संज्ञीति लभ्यते । तथा हि लोके बाह्यार्थप्रधानः शब्दः । गौरित्यत्र यथाहेत्यादौ तु शब्द
स्वरूपपरः संपद्यते । व्याकरणे तु स्वं रूपमिति परिभाषणात्स्वरूपपरत्वमौत्सर्गिकं इति शब्दस्य समभिहारे त्वर्थपरतेति विशेषः ॥ अर्थस्ये
व संज्ञात्वमपि न तु विभाषाशब्दस्येत्युक्तं । तेन इह क्रोष्ट्रत्पत्तरस्यामित्यादावपि वेहृष्यो ड्डुरोबोध्यः । एतत्प्रसंगेन त्रिविधा अपि विभाषाः
प्रायेण भाष्ये विवेचिताः । तत्रोप्राप्तविभाषा यथा ओ यङि अविभाषेति पठितं । अत्र वदंति ॥ अप्राप्तविभाषेयमिति सत्यं किन्तु त्रि
सुश्याद्युपक्रम्य प्राप्तेऽप्राप्ते उभयत्र विषये वैरूप्यकोटित्रयप्रकारकसंशयविषयीभूतानामेव व्युत्पाद्यमानत्वादत्रापि को
टित्रयस्योक्तिः संभवो वक्तव्यः । स च दुर्वचः तथा हि निजेगिल्यते इत्यत्र ओ यङीति नित्यं लत्वं विभाषायास्तु तत्र प्राप्तिरेव ना
स्ति गिलति गिरतीत्यादिरेव नास्ति तत्कुतः प्राप्तविभाषा पक्षः । अथोच्यतेऽपि विभाषेत्यत्र यङीत्यनुवर्त्य यङि मित्यस्य
रेफस्यापि अनंतरे वा लत्वमिति व्याख्यानात् त्रैत्ये चोक्तिः संभवद् इति । तन्न निजेगिल्यत्र चूडूति स्थिते हि ओ यङीति प्रा
प्नोति न च तस्याभवस्यायो विभाषायाः प्राप्तिरच्यरत्वाभावात् । अथ ब्रूयाः । विभाषारंभसामर्थ्याद्यङ्लुकः पूर्वं ओ यङीति न
भवतीति एवमप्युभयत्र विभाषात्वं दुर्लभमेव गिरति गिलतीत्यादौ विभाषायाश्चरितार्थत्वेन यङ्लुकः प्रागेव ओ यङीत्य
स्य प्रवृत्तेरुभयोरसमानकालीनत्वान्न चलत्वस्यासिद्धतया ततः प्रागेव लुगिति वाच्यं । अंत भूतयङपेक्षत्वेनांतरं
गलत्वं प्रति वहिर्भूतात्ययापेक्षत्वेन वहिरंगस्य लुकोऽसिद्धत्वात् । पूर्वाभावेन पूर्वत्रासिद्धमित्यस्याप्रवृत्तेरिति । अ

त्रोच्यते। प्राप्तविभाषात्वे तावत्समनन्तरं रीत्यैवोक्तिसंभवः उभयत्रविभाषात्वे त्वित्थमतरङ्गात्तपीति न्याये न लत्वात्पूर्वं लुक् न च लुङ्नि
मित्तमङ्गे वद्धुलोभः तस्यार्थापेक्षत्वेन बहिरङ्गत्वात्ऽसिद्धत्वात्पूर्वाभावे पूर्वत्रासिद्धमित्यस्याप्रवृत्तेः तथा चाचः पूर्वमेव लत्वं स्यादि
ति वाच्यं। क्वतिङ्जुविधिग्रहणेन बहिरङ्गपरिभाषायाश्च नित्यत्वज्ञापनात्। धर्मिग्राहकप्रमाणेन लुक इव तद्दुपतीव्यानां स
मासादीनामपि प्राबल्यसिद्धेश्च। ननुक्तेचित्तन्निमित्तेलु किंच सति निज्झिगिरश्चद्रुति स्थिते गिरो यङ्गीति न प्राप्नोति यङ्ग्य
रत्वाभावात्प्रत्ययलक्षणं तु न लुमतेति निषिद्धं। तत्र हि अङ्गस्येत्यनेनाङ्गाधिकारेण निर्दिश्यत इति वक्ष्यते न च स्थानिवद्भावे लु
काल्लुमतेन स्थानिवदिति निषेधात्। अक्रलादेशतास्वतथा च कथमुभयत्र विभाषेति चेन्न नधातुलोपसूत्रवृत्त्याख्यान
पक्षे हृथग्रहणोपाश्रयणेन स्थानिवद्भावसंभवात्। न च पूर्वत्रासिद्धे न स्थानिवदिति निषेधः तस्य द्वोषः संयोगादिलो
पलत्वणत्वेष्विति सापवादत्वात्। यद्यपि अत्रचिविभाषेत्यस्य पूर्वत्रासिद्धमिति गिरो यङ्गीतिप्रत्यसिद्धत्वाद्विप्रतिषेधासंभवः
ततश्च सत्यामपि यङ्गीत्यस्य निवृत्त्या उभयत्रविभाषात्वं न संभवति तथाप्यधुनेत्यादिवल्लाघवार्थममुनेत्यैव वक्तव्ये न सु
नङ्लुक्यर्यां गविभागार्थतया न योगे यो गोसिद्धः किंतु प्रकरणे प्रकरणमिति चाऽसिद्धत्वं न भविष्यतीत्याशयेन उभय
त्रविभाषात्वे उक्तिसंभवो बोध्यः सिद्धान्ते तु विभाषाया असिद्धत्वादेतन्नित्यलत्वं समुदायलोपवादिनां तु मतेऽन्तरपेक्ष
याऽन्तरङ्गत्वान्नित्यलत्वमिति व्यावस्थितविभाषेति चास्मिन्नर्थे यतितव्यं॥ इति सिद्धं ॥ प्र·प्रष॥ पत्रमिदमेकं त्रुटित

वर्णस्य तु कुर्यादिति चेत्. तं प्रत्यक्ष संप्रसारणसंज्ञानिमित्तमात्रयलोमार्थं दृष्टान्तमुपगम्यसूत्रे वेदि। अत्र च विधेयान्तराद्यसमर्थकत्वमन्तराज्यासूत्रेऽपि दृश्यते लिङ्गं। आहच। विभक्तिवि
शेषपदं दृश्यस्तु ध

॥ इति श्रीरुद्रकोसुमे प्रथमस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकम् ॥ १

मेवतद्बोद्धव्यं जिज्ञासित्राजित्ता पयिपि त्रावाप्रस्मदीय पुस्तकाथिनां॥ इग्यणः संप्रसारणं॥ यणः स्थाने इग्भवतीत्येवंरूपो वाक्या
र्थः यणः स्थाने कृदूरूपो वर्णश्चेत्युभयमपि संप्रसारणसंज्ञं स्यात्। तत्र ष्यङः संप्रसारणमित्यादि षु विधिप्रदेशेषु वाक्यार्थे
संग्रहणं संप्रसारणाच्चेत्यादावनुवादप्रदेशेषु वर्णस्येति विवेकः। पूर्वसूत्रादितिशब्दानुवृत्त्या वाक्यार्थस्य संज्ञित्वं लभ्यते। तत्प्रत्या
ख्याने पक्षे तु वाक्यमेव संज्ञि। न चैवं तदेव विधेयं स्यादिति वाच्यं। वाहऊठ संप्रसारणमिति सामानाधिकरण्यबलेन तदु
पस्थापितार्थस्यैव विधेयत्वनिर्णयात्। न चैवमपि ष्यङः संप्रसारणमित्यादौ दोषतादवस्थ्यं। सामान्यापेक्षज्ञापकाश्रयणा
त्। ननु तथापि वाक्यतदर्थयोरन्यतरस्य संज्ञित्वमस्तु ज्ञापकं उभयसंज्ञात्वे किमिति। उभयोः संज्ञेति षष्ठीतत्पुरुषः। मत्वेहरे
श्राह। संप्रसारणसंज्ञायां लिंगाभ्यां वर्णवाक्ययोः। अविभागस्तथा सूत्र एकस्मिन्नेव ज्ञायते। तथाहि द्विवचनेचीति तन्त्रे
पायादिलक्षणः। एकशेषेणानिर्देशो भाष्य एव समर्थितः इति। तत्र च शब्दतन्त्रमर्थतन्त्रं वेति मतभेदेन व्यवस्था बोद्धु
व्या। अर्थभेदाच्छब्दभेदे आद्यः पक्षः। शब्दैको द्वितीयः आद्येपि व्यंजकध्वनिमात्रभेदे व्यंग्यैकेत्रावृत्तिरेवेत्यादि बोध्यं
। एवं चर्तंत्रत्वमेकरूपेणाभवेत्तुल्योपकारत ः॥ उपकारान्यथात्वंतु भवेदावृत्तिलक्षणमिति मीमांसकमयोदानुरो
धावैयाकरणेनैकत्नेव्यः। तस्मा भाष्यादिसकलवैयाकरणग्रंथविरुद्धत्वात्। मूलयुक्तिशून्यतयादुरूपपादत्वाच्चे
ति दिक्॥ यद्वा। वाक्यार्थ एवसंज्ञी। अनुवादे तु तन्निवृत्तिर्नावर्णोलक्ष्यते॥ संप्रसारणाज्ञातः संप्रसारणमिति। अथ

वावर्णो एव संज्ञी॥ विधिप्रदेशेषु तु सत्र शाटकवद्भाविना संज्ञाश्रयणीयेति। सर्वैष्येते पक्षा भाष्ये स्थिताः॥ स्यादित्यत्र। अदुहितरामि
त्यत्र लकारस्य यणः स्थाने उत्तमपुरुषैकवचनमिट्। तस्य च संप्रसारणसंज्ञायां सत्यां हलङ इति दीर्घः स्यात्। न ह्ययं प्रतिलङं तस्यांग
त्वादिति। अत्राहुः। संख्याता नुदेशाद्यकारस्थानिकस्यैव इकारस्य संज्ञा। न तु लकारस्थानिकस्येति। अत्रेदमवधेयं। वाक्यार्थः
संज्ञीति पक्षे तु स्योद्देश्यविधेयसमर्पकपदयोः तत्र यथासंख्यपरिभाषोपस्थितौ यणः स्थाने इक् स्याद्यथासंख्यमित्यवान्तरवाक्या
र्थः सोयं संप्रसारणसंज्ञः स्यादिति महावाक्यार्थः। न चावान्तरवाक्यार्थं गृहीत्वा याति वाति इत्यादावतिव्याप्तिप्रसंगः। तस्य सं
ज्ञासंबंधमात्रफलत्वात्। अन्यथा ष्यङः संप्रसारणमित्यादेर्वैयर्थ्यापत्तेः। अनेनोक्तदोषः। अदुहीत्यादेस्तत्रत्वाभा
वाच्च उभयसंज्ञात्वपक्षेपि उपस्थितत्वाद्यथासंख्यप्रवृत्तेः एव वर्णः संज्ञीति। अतो अदुहितरामित्यत्र नातिप्रसंगः॥
इदं च कर्मकर्तृकं तु रेरूपमिति हरदत्तः॥ उपलक्षणं चैतत् केवलेकर्तर्यपि संभवात्। वर्णएव संज्ञीति पक्षे यथासंख्य
दुर्लभं। अनुवादे परिभाषाणामनुपस्थानस्योपपादितत्वात्। न चैवं स्थाने योगोप्यस्मिन्पक्षे न लभ्येतेति वाच्यं। षष्ठी स्था
नेयोगेत्यत्रानुवर्त्य एतत्सूत्रस्य व्याख्येयत्वात्। उक्तं हि इको गुणवृद्धी इति सूत्रे। सिद्धं तु षष्ठ्यधिकारे वचनादिति। इहैव
वा सिंहावलोकनन्यायेन स्थानग्रहणाकर्षोस्तु। यथासंख्यं तु दुर्लभं इत्युक्तं कथं तर्हि अदुहितरामित्यत्र नातिप्रसं
ग इति चेत्। तत्रावृत्या द्या अयणो न संप्रसारणमित्यत्र तद्भावितग्रहणात्। यद्वा। कार्यकालपक्षे यणः स्थानि संप्रसा

रणामिग्भवतीतिवाक्यार्थेऽनुवादेतेन नास्तीति तत्रच परिभाषोपस्थितौ सत्यां यथासंख्यप्रवृत्तेरेव संज्ञी स एवं संप्रसारणस्येत्यादौ उ
पतिष्ठते। अथवास्यानन्तरं संज्ञासंबंधो लौकिकन्यायसिद्धत्वादनुवादेपि सुलभः। यथासंख्यसूत्रं परं न प्रवर्त्ततामितिदिक्। ता घुभा
मित्यत्र हलइति दीर्घो नादिचउदितितपरकरणात्। अतएव घुलाकइत्यत्र संप्रसारणस्येति दीर्घो नान्वेवं भाव्यप्राप्युकारादेश
ःसवर्णानां ग्रहणातीत्यर्थे ज्ञापकतयाकथमसौ पन्यासइति चान्नास्य वाक्यार्थे संज्ञातिपक्षीणोक्तत्वात्। संप्रसारणस्येत्यत्र तद्भा
वितग्रहणाद्वा। पक्षांतरेतुक्तत उदिति ज्ञापकं वी द्व्यानन्वेव अक्षद्युवो अक्षद्युवइत्यादौ ऊठः संप्रसारणसंज्ञायां संप्रसारणाच्चे
ति पूर्वरूपं स्यादिति चेन्न। संप्रसारणपूर्वत्वे समानांगग्रहणस्य वार्त्तिककृता कृतत्वात्। तत्स्यात्वाख्यान पक्षे तु वार्णादांगं ब
लीय इत्येवद्भ भविष्यति। वाक्यार्थः संज्ञीत्यादिपक्षांतरे तु पूर्वरूपप्राप्तिरेव नास्ति हृतोज्ञीनइत्यादौ तु हलइति सूत्रारंभ
सामर्थ्यात्संप्रसारणान्निवृत्तस्यादेशेपि दीर्घप्रवृत्तिः वर्णसंज्ञापक्षेपि अल्विधौ स्थानिवद्भावासंभवेन हलइति सूत्रा
रंभसामर्थ्यात्संप्रसारणस्यादेशे कार्यप्रवृत्तेर्वाच्यत्वादितिदिक्॥ आद्यंतौटकितौ। टित्कितौ यस्योक्तौ तस्य क्रमादाद्यंता
वयवौ स्तः। भविता। स्थापयति। पुरस्तादपवादाइतिन्यायेन स्थाने योगत्वस्यायमपवादः। प्रत्ययः परश्चेत्यनेनतु परत्वा
द्बाध्यते तिना चरिष्टः गापोष्टक ब्रीहिशाल्योर्ढक् इत्यादयः परएव भवंति॥ परेणापरिभाषाप्रकरणेव साहचर्यात्परि
भाषेयं। भाष्येतु संज्ञापक्षोपिध्यावित ः। तथाहि। टकिनावितिकर्मधारयः। इत्संज्ञको टकारककारौ आद्यंतपोः सं

ज्ञेस्त ः। तथा च इडिति बहुव्रीहिः॥ इडूङादिर्यस्येति विग्रहः। तथा च स्थानेऽन्तरतमपरिभाषया तव्यस्य इत्वादेशे सिद्धं इङ् घं।
एवं याप यतीत्यत्र यातेः यपि पूर्वादेशः स्युव पस्येति व्याख्यानात्। न चैवं आ घंतो टकारान्तिये चास्त्विति वाच्यं॥ आल इनाट चोगस्य
कइत्याद्रावपि रकरा घंतयोरा घंतस्य संज्ञाप्रसंगात्। इत्संज्ञकत्वेन तु टंशा विशेषेत्लक्ष्यते। तिन इत्संज्ञकस्य योदेश स्तत्रा
वस्थितो टकोसंज्ञो न च आट च एकार इकादेशस्य ककारश्चतथेति तो क्रदोषः। नन्वस्मिन्पक्षे लुङ् लङ् लङ् क्ष्णुइत्या
दिना भूइत्यादेशः स्यात्सचोदात्तइत्यंतो दात्तः प्रसज्येत। नैष दोषः। अः ऊतुदात्तचयस्येति त्रिपद बहुव्रीह्याश्रयणात्।
।विशेषणस्याप्युदात्तस्य सौत्रः परनिपातः तेनोदात्तकारादिरादेश इति सिद्धं। न चैवमप्याङ्ज्ञादीनामित्यत्र दोषतादवस्थ्यं
अनुवृत्ते नो दात्तशब्देन सह श्रूयमाणस्य बहुव्रीह्यसंभवादिति वाच्यं। आङ्ज्ञादीनामिति सूत्रे स्य प्रत्याख्यास्यमानत्वा
त्। वक्ष्यति हि। अज्ञादीनामटा सिद्धमित्यादि॥ मिदचोऽन्त्यात्परः। संनिविष्टानां अचां मध्ये अन्त्यो योऽच् तस्मात्परो मित्स्या
त्स च पूर्वान्तः स्थानेयोगस्य परश्चेति परत्वस्य चापवादः॥ वनानि पयांसि। हरणाद्भ्यामनुपूर्वे योगवइयमपि पुरस्ताद
पवादन्यायेन स्थानेयोगमात्रस्यापवादोस्तु न तु प्रत्ययः परश्चेत्यस्यापीति चेन्न। बाध्यसामान्यचिंतामाश्रित्य विष
ये प्राप्तं सर्वं बाध्यत इतिह्यभ्युपगमात्। अन्यथा अभोमित्कारणं व्यर्थं स्यात्॥ न च श्रवणार्थ एव अभो मकार इति
वाच्यं। टराईहइतिनिर्देशात्। अय इति ज्ञात्वाभिप्राये लोकवचनं। तिद्धेरेणो षष्ठी। न च अत्यादित्यनेन सामाना

धिकरणपाचेदेँड्डतिपंचम्येवास्तामिति चाच्यं शिमुचारीनामित्यादौ अंत्यस्याचो संभवेनैतत्परिभाषाया अप्रवृत्तेर् अलोंत्यपरिभा
षाप्रसंगात्। तथा च मिक्करणावेपष्ठी पत्नेन पूर्वसूत्रे आद्यंतावितिसमासनिर्देशेपीह अंतग्रहणमात्रमनुवर्त्तते। एकदेशाय
वस्वरितत्वप्रतिज्ञानात्। जेतमित्यूर्वोतः॥ यदि तु अभक्तः स्यात्तदा तातापिंडानामित्यादौ नेऽस्भुदमिबद्दलमिति शेलोपेकृतेन
लोपोन स्यात्। प्रातिपदिकांतत्वाभावात्॥ तथा वहंलिहइत्यत्र वहाभ्रेलिहइति प्रयोगे अरुर्द्विषदजंतस्येति मुमि मो मु
स्वारइत्यनुस्वारेण स्यात्। अपदांतत्वात्। यदि तु आदिग्रहणाननुवर्त्य परादिः क्रियेत तदा वारिणोइत्यादौ घेर्ङितीति
गुणः स्यात्। वहलिहइत्यनुस्वारेण स्यात्॥ अतिशायिनः संख्याय यातात्यतिसायी निम्ना ह्लणाकुलानि इत्यत्र स्रस्युर
सं वुद्धाविति णित्वप्रत्युक्तावृद्धिः प्राप्नोति। सा हि णोणत्वेपीष्यते। आख्याघनड्डत्। एतच्च इहसूसूत्रेयेन विधिरिति सू
त्रे च भाष्यकैयटयो। स्फुटं। तस्मात्पूर्वोक्तपक्ष एव स्थितः। अत्र वार्त्तिकं। अंत्यात्पूर्वोमस्जेरनुषंगसंयोगादिलोपार्थं।
मगभवान्। ओदितश्चेति निष्ठानत्वं। तस्यातस्यासिद्धात्कुत्वं। मस्जिनशोर्झलीति नुम्। स च यद्यंतादचः परः स्यात्तर्हि
दाअनिदितामित्यनुषंगलोपोन स्यात्। उपधाभूतस्य नकारस्यानुषंगइति प्राचां संज्ञा। अथ स्कोरिति सलोपेकृते
नकारउपधात्वाल्लुप्यतामिति। चेन्नान्तलोपं प्रति स्कोरितिलोपस्यासिद्धत्वात्। बहूनां समुदायस्यैव संयोगसंज्ञेति
पक्षे सलोपस्याप्राप्तेश्च। तथा च मउक्तां मड्क्त्वं इत्याद्यपि प्रयोजनं बोध्यं। मज्जिमच्यौश्च। अंत्यात्पूर्वो मिदित्यनु

वर्त्तते। मृजी मार्जने। अस्मादौणादिके अचि कृते ऊमागमः॥ मरुज्जा मर्चे पृवृद्धियो चुरादिकः अस्मादचूडुरित्यौणादिक

उ प्रत्ययः ईमागमः। निपातनादिन्दुं मरुज्जागृवृद्धिं गुल्मादिषु पठ्यते। मरीचिशब्दो बाह्वादिषु। उणादिषु तु मृकणिभ्यामी

चिरिति इति प्रत्ययं कृत्वा मरीचिशब्दो व्युत्पादितः। तदुपायान्तरं बोध्यं॥ एच इग्घ्रस्वादेशे॥ आदिश्यमानेषु ह्रस्वेषु मध्ये एच

इगेव स्यात्। हे शब्दमतिक्रान्तं कुलं अतिहि कुलं। चित्रगुः अतिरिः अतिनु। पदत्रयं क्रमत्वंतदेव्वोऽङ सूत्रस्थ एवोक्तं॥ षष्ठी स्थानेयो

गा॥ अनेकसंबंधपरतया संभाव्यमाना षष्ठी स्थाने प्रयुक्तसंबंधपरेति बोध्यं। अस्तेर्भूः। अस्तेः समीपोऽनन्तरो वेति संशये तत

स्थाने उच्चारणीय इत्यर्थः॥ स्थानं च प्रसंगः दर्भाणां स्थाने शरैः प्रस्तरितव्यमितिवत्। तथा च इगुच्चारणे प्रसक्ते यण उच्चारणीय

इत्याद्यर्थपर्यवसाने सामीप्यादयः संबंधाः अर्थान्न्यावृत्ताः॥ योगः संबंधः। स बहुविधोऽस्यास्तीति योगा। अभ्रादित्वा

त्प्रत्ययः तमस्त्वर्थीयोऽत्रास्ति च भूम्नि। अन्यथा विशेषणवैयर्थ्यापत्तेः॥ तेनानेकसंबंधपर तयासंभाव्यमानेत्यर्थो लभ्यते। अयो

गेति वा छेदः अनिश्चितयोगविशेष इत्यर्थः। योगेत्ययोगेति वा किं॥ ऊदुपधाया गोहः॥ शास इदङ्हलोरित्यादौ गो

हः शास इत्यत्र माभूत्। सति हि तत्रापि स्थानेयोगत्वे गोहि शासेः स्थाने धातुमात्रस्योपधाया ऊदिति स्यात्। तन्निरदि

कृ। यद्वा स्थानेयोगा यस्यास्तीति बहुव्रीहिः अत एव निपातनात्सप्तम्या अलुक्। यद्वा स्थाने नयायोगोऽस्याः इति विग्रहः।

निपातनादेत्वं। न चानयोः पक्षयोर्गोहः शास इत्यादावति प्रसंगः। परिभाषाणामनियमे नियंतृत्वप्रवृत्तेः। युक्तं

चेत्तत्। आकांक्षापूर्वकत्वात्संबंधस्य इह चोपधासंनिधाने नावयवषष्ठीति निर्णीते आकांक्षाविच्छेदात्। लोके पि हि पंथानं पृष्टः तं प्रति
ष्ठते अमुष्मिन्नवकाशे दक्षिणो ग्रहीतव्यः। अमुष्मिन्नुत्तरइत्यादावुपदिष्टे सति यत्र मार्गद्वैधात्संशयस्तत्रैव तदुपतिष्ठते। न त्व
संदिग्धेत्रियेकू पथेपीतिदिक्॥ भाष्यकारास्त्वाहुः॥ अस्तेर्भूरित्यादौ अनेकसंबंधप्रसंगेपि लक्ष्यानुरोधादंतरंगत्वात्स्थानिवदा
देशइति ज्ञापकाच्च स्थानेयोगत्वं व्याख्यास्यते। तस्मान्न्यायमेतस्मात्सूत्रस्यार्थः॥ किंतु षष्ठ्यांतमुच्चार्यमाणमेव स्थानेन युज्यते
न तु प्रतीयमानमिति सूत्रार्थः तदेतदुच्यते निर्दिश्यमानस्यादेशा भवंतीति। तेन पादः पदित्यस्यायमर्थः। याकृत्वांतं यदंग
तदवयवस्य याकृतस्य सर्वस्य पदादेश इति। अलोंत्यस्यादेः परस्येति योगौ तु आरंभसामर्थ्यादिदस्य बाधकौ। अनेकाल
शित्सर्वस्येत्यनेन तु सह। अविरोधादस्य समुच्चये न प्रवृत्तिरिति। एवं स्थिते तल्लाघवाय यरोपनप्राग्युक्तोपि सूत्रार्थः
सुवचः॥ फलं तु स्फुरप्रतिपत्तिरिति दिक्॥ स्थानेंतरतमः॥ प्राप्यमाणानां मध्ये सदृशतम आदेशः॥ स्यात्। सादृश्यं च
चतुर्धा। स्थानतोऽर्थतो गुणतः प्रमाणतश्चेति। स्थानतो यथा सिद्ध्युपास्यः मध्वरिः॥ धात्रंशः लाकृतिः॥ यत्तु यथासं
ख्यसूत्रेणैवेहान्यथासिद्धिरित्युक्तं भाष्यादौ। तदभ्युच्चयमात्रं। अर्थतः साम्यविवक्षायां यथासंख्यालाभात्। इ
कोहि षट्षष्टिः यणस्तु सप्तेति वैषम्यात्। अथ इकशब्दा घणाशब्दाश्च प्रथमं चतुर्णां चतुर्णामुपस्थिते रस्त्येव सा
म्यमिति चेत्तर्हि सिद्ध्युपास्य इति दीर्घस्य कथं यणादेशः॥ इकारेणाग्रहणादिति चेत्तूतर्हि तृतीयेन तकारेण

चतुर्थेन लृकारेण परस्परस्य ग्रहणाल्लाकृतौ रेफप्रसंगः॥ धात्रे शेचलकारप्रसंगः पचोयस्मात् नासिकनिरनुना
सिकोनव्यचतिष्ठेपातामिति दिक्॥ दैत्यारिः श्रीशब्दस्याद्यपीहोदाहरणं॥ अर्थतो यथा। वार्तंड्ययुवतिः वर्तंडशब्दात्
डञ्चेत्यपत्येयञ्। तस्मात् लुकृस्त्रियामिति लुक्॥ शार्ङ्गरवादित्वाल्ङीन्। वर्तंडी चासौ युवतिश्चेति विग्रहे योठा युवत्या
दिना समासः॥ पुंवत्कर्मधारयेत्यतिदिश्यमानः पुंशब्दो वर्तंडापत्यवाचिनो ऽवर्तंडीशब्दस्य तदपत्यवाची वार्तंड्यशब्दो
भवति। गुणतो यथा॥ पाकस्त्यागः चण्डौः कुचिरापतौ हितिचकारस्याल्पप्राणस्याघोषस्य तादृश एव कारः। ङकारस्य
तु घोषस्याल्पप्राणस्य तादृवतस्थाने तादृग्गकारः॥ प्रमाणतो यथा। अमुं अमून्। अदसो सेरित्यनेन ह्रस्वस्य ह्र
स्वस्य ह्रस्वो दीर्घस्य दीर्घ उकारः॥ इह स्थान इत्यनुवर्तमाने पुनः स्थानग्रहणादन्योपि वाक्यार्थः संमतः॥ ता
ल्वादि रूपे स्थाने यो ऽन्तरतमः तत्प्रयुक्तां तयैवानितियावत्॥ सप्राप्यमाणानां मध्ये स्यादिति। तदुक्तं। यत्रानेकविधमान्त
र्यं तत्र स्थानत आन्तर्यं वलीय इति। तेन चेतासौ तेत्यादौ प्रमाणत आन्तर्ये चानपि अकारो न भवति॥ वाक्यभेदेच भयग्र
हणमेव लिंगं। एकस्मिन्नेव वाक्यार्थे संमते हि स्थानेंतर इत्येव ब्रूयात्। सिद्धांते तु वाभ्व रित्यादौ सोष्मणः सोष्मण
इति द्वितीयाः प्रसक्ताः। नादवतो नादवंत इति तृतीयायः सक्ताः। तम ग्रहणात्तु चतुर्थो भवंतीति हि सोष्माणो
नादवंतश्च। ऊष्मा ऊष्मत्वं वर्णधर्मः तत्सहिताः सोष्माणः। तथा च बह्वृचानां प्रातिशाख्यं। वर्गे वर्गे च प्रथमाव

श०कौ०

घोषो युग्मौ सोष्माणावनुनासिकोन्त्य इति। शादय ऊष्माणः सस्थानेन द्वितीया हकारेण चतुर्था इति शिक्षा। इह त्रीणि वाक्या
नि ऊष्मणां वृत्स्वधर्मिवचनः॥ शषसहा ऊष्माण इति प्रथमवाक्यार्थः। सस्थानेनेति। इत्थंभूतलक्षणे तृतीया। हशषसाः क्र
मेण खछठथानां। द्वितीयानां सस्थानाः। यथा हादय ऊष्माणस्तथैव खादयोपीत्यर्थः। यकारस्तु यद्यपि सस्थान ऊष्मा
नास्ति तथापि तस्य विशिष्टैव ऊष्मत्वं बोध्यं हकारेण चतुर्था इति। यथा हकार ऊष्मा एवं तेपीत्यर्थः। नन्वेवमिष्ट उमइत्यादौ
आंतर्यादर्धमात्रस्य यणः स्थाने अर्द्धमात्र इक्स्यात् दध्यत्रासिद्धवास्य इत्यादौ तु मात्रिकद्विमात्रिकयोरिकोस्तथाविध एव
यणस्यादिति चेन्न। अर्द्धमात्रस्यैकमात्रिकद्विमात्रिकत्वं तु न स्य च लोकवेदयोरत्र सिद्धत्वात्॥ योस्ति स एव भविष्य
ति॥ इह भाष्ये अंतरतमे इति स समस्येन पाठोप्युपन्यस्य दूषितः। तथा हि। अंतरतम उरण्रपर इति संहितया तावत्सूत्रक्र
पाठात् पदकारास्तु व्याख्यातारः। तत्र सप्तम्यंतमपि शक्यं छेत्तुं। षष्ठीति चानुवर्तते। अंतरतमे स्थानिनि षष्ठी तूपसं
हर्तव्येति सूत्रार्थः। एवं वाक् सवर्णे दीर्घ इति अत्र विधेयस्य दीर्घस्यांतरतमे स्थानिनि अक इति षष्ठ्या उपसंहारात्सि
द्धिरिष्टा। तथा वांतो यि प्रत्यय इत्यत्र एच इत्यनुवृत्ताया षष्ठ्या वांतादेशस्यांतरतमयोरोदौतोरुपसंहारात्सिद्धं। अन्यथा
एज्मात्रस्य वांतादेशः अत्रेदं दूषणं। इको यणचीति यणां ह्रस्वानामेव स्यान्न तु दीर्घाणां। अर्द्धमात्रस्य द्विमात्रिकः स्थां
निकृष्ट इति षष्ठ्या उपसंहारात्। तथा इको गुणवृद्धी अचश्चेति षष्ठ्या गुणवृद्धी अरंतरतमेन मत एवेद्रक्ष्वक्ष्वोप

राम०

संहितायां नेतालवितानायको लावक इत्यादावेव साङ्गत्वात्तोता चापकः स्तावक इत्यादौ तु न स्यादिति दिक्॥ तदेवं सम्प्र
तपक्षस्य दुष्टत्वात् प्रथमो न पक्ष एव युक्त इति स्थितं। स्यादेतत्। एवं सति एज्मात्रस्य वा तादेशः स्यादिति चेत्। अत्राहुः
पूर्वसूत्रे तावद्यथासंख्यं प्रवृत्तं अन्तरतमपरिभाषया। अयोधिकारश्चेह आश्रीयते। या दशो वान्तादेशः पूर्वे दृष्टः ओकारस्था
निको ऽर ओकारस्थानिकश्च आवृत्तादेशो ऽपि प्रत्यये भवतीति सूत्रार्थः॥ यद्वा। वान्त इति न करिष्यते। न चैवं चेयं नेयमित्या
दावतिप्रसंगः॥ क्षय्यजय्याविति योगविभज्य कंठतालव्ययोर्य्यस्य चेद्भवति क्षिज्योरेवेति नियमपरतया व्याख्यानात्। क्षि
ज्योः शक्यार्थ एवेति द्वितीयः सूत्रार्थः। तेनाहोघर्थे तपोरपि नेति बोध्यं। नन्वेवमपि शार्ङ्गरवादिगणपठिते नृनरयो
र्वृद्धिश्चेति सूत्रेण नरशब्दस्य नारीति रूपं न सिध्येत्॥ तथाहि। नरशब्दस्य ङीन्॥ संनियोगेन विधीयमाना वृद्धिरलोऽन्त्य
स्य स्यात्। तथा च यस्येति चेति लोपे न तस्या निवृत्तौ वृद्धिवचनं व्यर्थं स्यात्। न च नृशब्दार्थं तदिति वाच्यं। एवं हि सति तु वृ
द्धिश्चेत्येवं कुर्यात्। न च नरशब्दे ऽपि परत्वाद्यस्येति लोपे कृते वृद्धिर्भवतीत्यानर्थक्यमिति वाच्यं। प्रत्ययसंनियोगशिष्टत्वेन वृ
द्धेरन्तरंगत्वात्। ननु वचनसामर्थ्याद्बहिरंगलोपो बाध्यतां। आहोस्विदन्तरंगपरिभाषां बाधित्वा परत्वाद्यस्येति लोपे वृद्धिर्भवतु
। इति संशये परिभाषाबाध एव न्याय्यः तदुक्तं। अंगगुणविरोधे च तादर्थ्यादिति। किं च वाह ऊडित्यत्रत्या पितत्वेन
अनुमेयायाः परिभाषाया बाधेनोपपत्तौ साक्षाच्छ्रुतस्य यस्येति लोपस्य बाधो ऽनुचितः॥ तथा च लोपे कृते वृद्धिरिति

श०को०

सिद्धं रिति सिद्धं नारीति रूपमिति चेत् । सत्यं सिद्धं किंतु समप्तं तच्छेदपक्ष एव । तत्र हि प्रकृतित्वेनांतरतमनिवृत्तिरिति पूर्द्धांतरतमेस्थानि
निषेध्यात् उपसंहारादकारस्य वृद्धिर्भवति । प्रथमांतच्छेदपक्षे तु आदेशनांतरतमनिवृत्तिरिति ऋलोत्यसेतिवचनात् रेफस्य स्यात्
। तस्मात् सिद्धांते नारीति रूपं नरशब्दस्य रुः साधमिति पूर्वः पक्षः । अत्राहुः । नरशब्दपाठस्य प्रत्याख्यानमेव भाष्यकृतोभिप्रेतं
॥ समप्तंतपक्षनिराकरणाभाष्येणा तथैवानुमानात् ॥ न चैवं नरशब्दाज्जातिलक्षणेङीषि सति नरीति रूपेणादिवाच्यं इष्टा
पत्तेः । तथा च प्रयुज्यते । किं नरीणां नरीणामिति । यद्वा । नरशब्दस्मनि यतः पुलिंगत्वमेवास्मात् तथा च क्वातिप्रसंगः ॥ उक्त प्र
योगस्तु पुंयोगलक्षणेङीषि भविष्यति ॥ यथान्यासे पि तस्य दुर्वारत्वात् । अथ वा नृनरयोरित्यत्रात इतिवर्त्तते । अजाद्यतष्टावि
ति सूत्रात् । तस्यानुवृत्तिसामर्थ्यात् षष्ठ्यावि परिणतं नरशब्देन सह वैयधिकरण्येन संबध्यते । ननु नृशब्देन । असंभवात् । त
स्मात् सिद्धं नारीति । अत्रेदं वक्तव्यं वक्तव्यं । प्रत्याख्यायतां नाम नरशब्दः । नृनरयोरिति पठतः सूत्रकृतो मते तु कथमुक्ति
संभवः । न च नरीत्येवेष्टमिति वाच्यं ॥ वृद्धिविधायकसूत्रमध्ये नरशब्दपाठस्य वैफल्यापत्तेः । अत इत्यनुवृत्त्या सामर्थ्येन
मपि षष्ठ्या एकदेशानुवृत्तिविभक्तिविपरिणामाद्याश्रयणात् । किंच नृनरयोरिति गणपाठपक्षे तेन तत्वष्टाध्यायां गणे च अ
त इति न प्रकृतं । तथा च शार्ङ्गरवाद्यञो ङीनादि शब्देन गणसूत्रमपि हृदयमागमप्यत्र अत इत्यस्यान्वयो वाच्यः । स च क्लि राम०
ष्टतर इति स्पष्टमेव ॥ तस्मादित्थं समाधेयं । नरहृतिर्नतलुमाकारानुकरणांतस्य स्त्रः । नरः । नु स्त्रनसेति हूं दूः चाङ्गरा

पागद्वडीनूायद्दास्थानेंतरतमरेंड्रत्यत्रतंत्रेणाहुधा छेदः सूत्रकृतः संमतः भाष्योक्तरीत्या लौकिकन्यायाश्रयणेन सूत्र
प्रत्याख्यानपक्षेपिहि प्रकृतितस्स आदेशतश्चेत्युभयथाप्यंतरतमनिवृत्तिरस्त्येव। सूत्रकृतो वाचनिकी साभाष्यकृतस्तुन्या
यसिद्धेत्यन्यदेतत्। तथा चवांतोपि। न्तरयोरित्यादिसर्वमुख्यमेवा अतएव चतुर्थेस्थानितोंतरतमनिवृत्तिमाश्रित्यनारीतिरू
पंसाधयन्नइंरदन्नोपिनविरुध्यते। इकोयणाचीत्यादावतिप्रसंगः॥ वरमवशिष्यते। सचल्वादिभ्यः वादीनांदरुवः इत्यादि
ज्ञापकेनवाचनिकान्यायमूलिकयास्थानितोंतरतमनिवृत्तिरनित्यतामाश्रित्य परिहर्त्तव्य इति दिक्॥ सूत्रप्रत्याख्यानप्र
कारस्तूच्यते। समायामास्यतामित्युक्ते हि पंडिताः पंडितैः सहसमासते मूर्खाः मूर्खैः॥ कवयः कविभिः नतुसंकरेण॥ किंब
हुनागवांसंघंप्रतिगोधावति॥ अश्वोश्वानामित्यादिष्वप्येवस्यादितियक्ष्वपिदृश्यते। तस्मात्प्रथमवाक्यार्थस्यलौकिकत्वलाभा
न्ततदर्थंसूत्रारंभणीयं। एवंस्थानतआंतर्यंबलीयइत्यपिलोकतएवसिद्धं। तथाहि। भूयःसहचरितयोरश्वयोर्गवोर्वा
वीसजातीयांतरसंवलनेसत्यपिकृप्रात्वयाडुत्वादिगुणास्सह[illegible]पिहितास्थानसाम्यपुरस्कारेणैवपरस्परापेक्षादृ
श्यते। तदेवंलोकतःसिद्धेकिंवचनेनेति॥ उरण्रपरः॥ ऋवर्णस्यस्थानेयोऽण्सप्रसंगोच्चार्यमाणएवरपरइत्याह। रप
रः स्यात्। ऋकारेणसावर्ण्यात्त्रिंशतउपस्थानेसतिस्थानेंतरतमपरिभाषयानश्रुतिमतःस्थानेरपरोलश्रुतेस्तु
लपरइतिविवेक्तव्यं। कृष्णर्द्धिः तवल्कारः ऋलृस्थानीयोऽणितिग्रंथस्तुयथासंख्यसंभ्रममापादकः असंगतश्च।

प्रा० कौ०

ऋलृतः साम्येनाश्रितानि वोढा तस्माद्धि सूत्रे ऋलृद्वयमस्ति। अथ तस्मान्नतरां साम्यं। अथात्र नयथासंख्यमभिमतं तर्हि किं वृत्तिमध्ये
द्वयोरेव विशिष्योल्लेखेन०। आ चरलो क्रलोः स्यादिति विग्रहे उभयत्र लृ च ऋ लो रिति विग्रहे वा द्वन्द्वस्य दुर्लभत्वाग्वसहि विरू
पाणां अपि समानार्थानामिति एकशेषेणाबाध्यते। चित्रगुशकृस्य चित्रगवी परतायामिव सास्नाधुत्वनिर्वाहार्थं लक्षणामाश्रित्य
लक्षितलक्षणया शक्यार्थपर्यवसानमिति कथंचिन्निर्वाहस्तत्तद्ग्रन्थेभ्यो द्रष्टुलुभिरभ्यूह्यायेति दिक्॥ अत्र सूत्रे चतुष्टयं संभा
व्यते उः स्थाने रपरो णः स्यादिति रपरत्वविशिष्टो णः विधीयत इति प्रथमः पक्षः। उः स्थाने अणामनणां च प्रसंगे अण् एवेति नि
यमः स च रपर इति वाक्यभेदेन रपरत्वं विधीयत इति द्वितीयः पक्षः। उः स्थाने यः अण् इत्यनूद्य तस्य रपरत्वं विधीयत इ
ति तृतीयः। प्रसंगावस्थायामेव रपरत्वं विधीयत इति चतुर्थः॥ तत्राद्ये पक्षे नाप्तिसूदात्तादिषु विधीयमानो णस्तेनाबा
धकः स्यात्। तेरनवकाशस्य विषयस्यालाभात्। एवं तदावचनव्यक्तिः॥ षष्ठी निर्दिष्टमात्रस्य भवन्नादेशोंऽतरतमः स्या
त्। ऋवर्णस्य त्वणर इति तत्तच्छ्रुत उदात्तानुदात्तस्वरितानुनासिकेषु दोषः॥ तथा हि। कृतिरित्यत्र क्तिन्नित्यादिर्नित्यमि
ति प्राप्तमकारं बाधित्वाऽणार परो णः स्यात् तथा प्रकृतं प्रहृतमित्यत्र गतिरनंतर इति पूर्वपदप्रकृतिस्वरे कृते शेष
निघातं दृ उदात्तादनुदात्तस्येति स्वरितं च बाधित्वा तथा तृः चादिदृत्यत्र हृत्यइति तापकोत्पूर्वस्य वर्णाद्दीर्घसं   राम०
भवेपि अनुनासिकं बाधित्वाणार परः स्यात्। किंचाकर्त्तृकारक इत्यत्र गुणवृद्धी बाधित्वाणार भवन्नकार एवेति नि

यमाभावात्कदाचिदिकारउकारश्च स्यातामपि चायमीप्रत्तिपूर्वोक्ताद्भूत्वोत्वादयः ऋतद्भूद्भूतोरुदोषापर्वे सेतितिषुरपर
त्वं तस्मात् । द्वितीये तु गुणाद्वृद्धौ न दोषः । अगणनयोः प्रसक्तकरणे वेति नियमेन कर्त्तोकारकइत्यादिसिद्धेः । ननु ह्रस्वस्था-
निनि सर्वो वृद्धिरन्तरतमा । तारकइत्यादौ दीर्घे तु सर्वोपि प्रमाणतोन्तरतम इति । अविशेषादुभयत्रापि सकलवृद्धिप्रसंगे नि-
यमोक्तगुणः कर्त्तेत्यादौ मात्रिक एव प्राप्तः तरितेत्यादौ द्विमात्रस्य तु द्विमात्र एङेव प्राप्तः । तथा च अगणनयोः प्रसंगाभावे
न नियमाप्रवृत्तौ दीर्घे च एङेव स्यात् । ह्रस्वेषु तु अकारो भवन्नपि रपरेण स्यात् । यो हि प्रथमं वाक्येन गुणो वेति नियम्यते । तस्ये-
व द्वितीयेन परत्वं विधीयते । तथा च गुणो दोषास्त्येवेति चेन्न । न च जोः कुघिण्यतोरित्यादौ सावकाशायाः स्थानेन्तरपरिभाषाया
वृद्धिविधौ चरितार्थया पुरस्तात्प्रवृत्तया गुणप्रसंगे परत्वेन बाध्यत्वात् । तस्माद्द्वितीयपक्षे गुणाद्वृद्धौ न कश्चिद्दोष इति
स्थितं । उदात्तादिषु दोषस्तु स्यादेव । तथा प्रतिपदोक्ते क्षित्यादिष्वपि । तृतीये तु दात्तादिषु न दोषः । तत्त्वद्धि क्षिप्रिरन्तरमपरि-
भाषासंस्कृते ऋवर्णस्यैव विधानात् । किरतीत्यादावपि न दोषः । गुणाद्वृद्धौ तु दोष एव । तथा हि । आतपितो मात्रिकस्य मा-
त्रिके गुणे रपरत्वे च कर्त्तेत्यादि यद्यपि सिध्यति तथापि तरितेत्यादावेङेव स्यात् । तथा अविशेषाद्द्वित्रयेपि प्रवृत्ते आका-
रस्य गुणत्वाद्रपरत्वे कृते कारकस्तारकइत्यादि यद्यपि सिध्यति तथापि कायकास्तावकइत्यादावनिष्टमप्यापद्येत । यत्तु पू-
र्वसूत्रे भाष्यकारैरिमं पक्षमाश्रित्य समाहितं अनन्तरमेवैतयोरान्तर्यमिति । यच्चात्रैव वार्त्तिककारैरुक्तं । यं यं यो-

गोचानष्टाचरग्रहणस्य वदितित्तदुभयमपि पाक्षिकं वोध्यं तथा हि। यदा क्त्वज्जात्यावच्छिन्नस्यैकोंतरतमा इति परीक्ष्यते। अत्र त्वजात्य
वच्छिन्नस्यैकस्येति तदा अनुरूपप्रतिसंबंधिता हि त्वेनैव धर्मेण तयोरान्तर्यं। न हि अंतर्ये च तुर्थेति मुनित्रयोक्तिरस्ति प्रत्युत
सोष्माराइति भाष्यादिहृत्तेश्च अनियम एव लभ्यते। एवं च श्राद्यदृग्ग्रहणस्य यापि जात्यवच्छेदेन परीक्षायामेव। व्यक्तिपुरस्कारेण
णापरीक्षायां तत्कारीत्यादुष्टोऽयं पक्षः॥ स्वतंत्रः कर्त्तेति निर्देशान्नवितिमयोर्प्याय द्यविविभाषेत्यारंभाच्च नविकल्प इति
सतिसमर्थेनेपि प्रतिपत्तिगौरवं स्यादेवा तथा चान्त्यसूत्रे वार्त्तिकं॥ यणः स्थाने रणमपरपर इति चेद्धुरावृद्धौ रवर्णप्रतिपत्ति
रिति॥ किं चास्मिन्पक्षे एकरेफपरत्वं एकवालकारपरत्वमिति व्यवस्थापि दुरुपपादा स्यात्। स्वतंत्रः कर्त्तेति निर्देशान्नवि
तिमयोश्चोपदेशात्विभाषेत्यारंभाच्च नविकल्प इति समर्थनेपि प्रतिपत्तिगौरवं स्यादेव रेफस्य पूर्वोत्तं संसाधयितुं आघ
तोटकितां किति सूत्रात्समासेकदेशभूतमंतग्रहणमनुवर्त्यं तस्य परपदइत्यन्यपदार्थे विशेषणीभूतेरेणान्वयश्च वा
च्य इति महान्क्लेशः॥ चतुर्थपक्षे तु नैतदुपयुज्यत इति वक्ष्यामि तस्माच्चतुर्थ एव निर्दोषत्वादाश्रितः॥ स चेत्थमुपपाद
नीयः स्थानि शब्दद्वयमिहानुवर्त्तते तत्रैकमुः स्थाने योऽण् इत्यनुवादेपि स्थानसंबंधलाभाय॥ द्वितीयं तु प्रसंगावस्था
यामेव परो भवतीति कालविधानार्थं॥ स्थानेन्तरतम सूत्रे स्थानशब्दस्य तात्वादिपरत्वेपि शास्त्राधिकारात्प्रयणादिह प्रसं
गपरत्वं वोध्यं। एवं च गुणवृद्धी प्राप्नुवत्स्थायामेवाणोरपरः स्यान्नाइति प्रमाणातोंतरतमावेदेश्चो वाधितत्वास्यानेन्तोंत
रतमाणो वभवतीति न कश्चिद्दोषः। एवमुदात्तादिविधिष्वपि अंतरतमत्वात्कारोन अहहइ नूउहइत्यचक्षेय। नचैवंक

त्रैस्या द्वावनेकाल्त्वात्सर्वादेशप्रसंगः। आनुपूर्व्येणासिद्धत्वात्। तथाहि ऋस्थानित्वस्योपजीव्यप्रवृत्तं रपरत्वं सर्वादेशतां नापादय
ति। उपजीव्यविरोधात्। तथा पूर्वसूत्रे वार्त्तिकं। सर्वादेशप्रसंगस्त्वनेकाल्त्वात्। न वानेकाल्त्वस्य तदाश्रयत्वाद्वर्णादेशस्या
विघातइति। अत्र रग्रहणात्किं। रीङ् रिङ् दीनां रपरत्वमाभूत्। मात्रीयति। क्रियते तथा ढकि लोपो विरपरः स्यात्। एवं च सूत्र
वैयर्थ्यापत्तेः सामर्थ्यात् हलोन्त्यं विधिं वाधित्वा सर्वादेशः स्यात्। तथा होतापोता एवित्यत्र आनङोपि परत्वे संयोगान्तलोपे च कृते
न स्यासिद्धत्वान्नलोपो न स्यादिति दिक्॥ अथ योरीङादिष्वरासरपरा कुतो नेति चेन्न। अनादेशत्वात्। आदेशत्वं हि समु
दाये विश्रान्तं। न चैवं कृत्स्नद्वित्वं रित्यादेः रपरत्वं न स्यात्। पूर्वपरसमुदायस्य स्थानित्वादिति वाच्यं। पूर्वपरयोरिति द्विवच
ननिर्देशेन सहितयोरवयवयोरेव स्थानित्वावगमात्। अत एव द्वयोः स्थानिनोर्भिन्नत्वाद्विभुनत्ववद्भावादेशो माभूदि
ति तदेकग्रहणं कृतं। तस्मादृकारस्यापि स्थानित्वमस्त्येवेत्युक्तं। यो ह्युभयोः स्थाने भवति स लभतेन्यतरतोव्यप
देशमिति। तस्मादेदेशेपि रपरत्वं भवतीति स्थितं सिद्धान्ते॥ उक्तरीत्या ऋत उदित्युकारादेशस्यापि रपरत्वं स्यात्। तथा
च विभक्तिसकारस्य हत्वे कृते पूर्वस्य रो रीति लोपे द्रलोपे इति दीर्घे णमातुः पितुरिति प्राप्नोतीति चेत्। मैवं। तस्या
सिद्धत्वेन रात्सस्येति सकारलोपे रेफस्य विसर्गे णामातुः पितुरिति सिद्धेः॥ नन्वेवं मातुःकार्यमित्यत्र षत्वं स्यात् इदुदुपधस्य चाप्र
त्ययस्येति सूत्रात्। न चायं प्रत्ययविसर्जनीय एवेति वाच्यं। अकारस्य प्रत्ययसंज्ञा। सकारे लुप्ते तु अवशिष्ट

सेवप्रत्ययसंज्ञा। एकदेशविकृतस्योपसंख्यानात्। स्थानिवद्भावादेशग्रहणाद्वा। अत एव यञ्ञोपकारे तु से अकारस्य प्रत्य-
यसंज्ञेत्युक्तं। तथा चाप्रत्ययस्येति षत्वनिषेधः सिद्धः। न चैवं प्रत्ययावयवस्यानिकत्वेपि प्रत्ययस्यानिकत्वाभावात्षत्वं स्यादे-
वेति वाच्यं। अप्रत्ययस्येत्यनुवादे परिभाषानुपस्थाने तस्या नियोगस्य दुर्लभत्वात्। अवयवावयविभावस्य षष्ठ्यर्थत्वसं-
भवात्। नन्वप्रत्ययस्येति पर्युदासः। तथा च पूर्वोक्तत्वेनैकादेशग्रहणात्षत्वं स्यादेव। किंत्वप्रसज्यप्रतिषेधपक्षेपि संभ-
वति सामानाधिकरण्येवैय धिकरण्येनान्वयोपपत्त्वादप्रत्ययो यो विसर्गस्तस्य षत्वं स्यादिति वास्यार्थः। तथा चानिःकरो-
तीत्यादौ स्थानिवद्भावेन विसर्गस्य प्रत्ययत्वान्मास्तु षत्वं। मातुःकार्यमित्यादौ तु स्यादेवेति चेत्। इद्देदं तत्त्वं। कस्कादिषु भ्रा-
तुष्पुत्रशब्दस्य पाठो ज्ञापकः। एकादेशशास्त्रे तानिर्दिष्टत्वात्परस्य षत्वं न स्यादिति। यद्वा प्रसज्यप्रतिषेधवैयधिकरण्यान्वयवि-
वक्षायामेतोयत्तु भाष्ये लुप्यते तत्र प्रत्यययोरास्मस्येति। यत्त्वकैयटकर्त्तृव्याख्यातं। उत्वे कृते अवशिष्टः सकार एव प्रत्य-
यसंज्ञकः॥ स च लुप्त इति तदुभयं चिंत्यं। इह सिद्धं तु प्रसंगे रपरत्वादिति पक्षे यद्यप्यरादिष्टपेशाविधानाद्भक्तत्वा-
दिशंकैव नास्ति। तथापि संप्रयोगोवृत्तिपूर्वस्त्वोकारीत्यात्तृतीयपक्षमाश्रित्य भाष्ये पश्चात्त्रयं विंतितं। तत्र अभक्तत्व-
पक्षे परादित्वपक्षे च वव्रे इत्यादौ उरदत्वे रपरत्वे च कृते हलादिशेषेणा रेफो न निवर्त्तेत। अभ्यासावयवस्यानादेर्हलत्स्एव
तेन निवर्त्तनात्। तस्माद्दंतग्रहणमनुवर्त्य पूर्वोक्तपक्ष एवेह स्थापित इति संक्षेपः। अलोन्त्यस्य। स्थाने षष्ठी

निर्दिष्टस्य यदुच्यते तन्न दृष्टं तस्मात् लः स्थाने बोध्यं । त्यदादीनामः । सः । यः । स्थानषष्ठीति किं । आर्धधातुकस्येड्वलादेः । अत्र चकारात्पूर्वो मा
भूत् इदं च षष्ठीस्थानेयोगेति सूत्रस्यानुवृत्त्या लभ्यते । अलइति किं । पदस्येत्यधिकृत्य विधीयमानं वसुस्रंस्विति दत्वं परमानडु
द्भ्यामित्यादावंत्यस्य पदस्य माभूत् । एतेनालइति जसंतमाश्रित्य अलान्त्यकार्यादेशोऽन्त्यस्येति व्याचक्षाणाः परास्ताः । अं
त्यस्य पदस्यापि प्रसंगात् । किंचैवं लाघवार्थमलंत्यस्येत्येव सूत्रयेत् । अपि च अस्मिन्मते न चक्षुश्चेतोरहोरजसां लोपः पादश्
त्यस्य संख्यादेरिति लोपो ठकि लोपश्च सर्वादेशः स्यात् । ततश्च विरजीकरोतीत्यादि न सिध्येत् । यत्तु अलइति जसंतमिति पक्षे
अनेकाल्शित्सर्वस्येति सूत्रे अनेकाल्ग्रहणं न कर्तव्यमिति तल्लाघवोपवर्णनं तदपि न । षष्ठीपक्षेपि ङिच्चेत्यत्र ङिदे
वानेकालित्यस्य अस्यान्तु आङिदपीति नियमाश्रयणेनानेकाल्ग्रहणप्रत्याख्यानसंभवात् । वस्तुतस्तु पक्षद्वयेपि अने
काल्ग्रहणं कर्तव्यमेव । अन्यथा अतो भिस ऐसित्यादिषु पंचमीनिर्देशेऽप्यनेकालत्वादेशः परस्यादेः स्यात् । सति अने
काल्ग्रहणे परत्वात्सर्वादेशः । अत एव तस्मादित्युत्तरस्यादेरिति नास्य सूत्रं । तथा हि । अलोंत्यस्येत्यस्य द्वावपवादौ । आ
देः परस्य । अनेकाल्शित्सर्वस्येति । तत्र प्रथमस्यावकाशः । ईदासः । वहोलोप इति । आसीनः ॥ भूयान् ॥ द्वितीय
स्यावकाशः । अस्तेर्भूरित्यादिः । अतो भिस इत्यादेः परत्वात्सर्वादेशत्वे सिद्धे रामैरित्यादि । न चादेः परस्येत्यत्रालइति राम०
जसंतमनुवर्त्य रामैरित्यादिसाधनीयमिति वाच्यं तथा सति भूयान् भूमेत्याद्यसिध्यापत्तेः ॥ तदेवं कार्यस्यांत्येऽल्यतु

शा०कौ०

संहारो व्याख्यातः। ङित्त्वेऽपि घसिमसंभोनु गुणात् स्यात्। यद्वा पक्षान्तरे वायमनुसंहारः। यास्यानियोगपक्षीसां त्वस्य लोपो बोधे
ति। अत्र पक्षे किं ङित्त्वस्य प्रयमर्थः। यत्र ङिदादेशो विधीयते तत्र यापक्षीसाऽन्त्यस्य स्यात् इति। एवमग्रेऽपि ङित्त्व ङिदनेकालस्थान्य
स्य स्यात्। दधा। दधे। अनन्त्यार्थे ङित्त्वे घनङादिषु चरितार्थमिदं तात ङ्। परेणानेकाल्शित्सर्वस्येत्यनेन न बाध्यते। ननू
त्सर्गापवादयोरयुक्तो विप्रतिषेध इति चेत् सत्यं। सर्वादेशेऽपि तातङि गुणवृद्धिप्रतिषेधरूपं प्रयोजनं संभाव्यते। तावता
ता च किंचिद्धि लेभित प्रवृत्तिकोयमपवादोऽप्यस्मिन् विषये उत्सर्गेण समकक्षतामापन्न इति युक्तो विप्रतिषेधः। यद्
वा। एहि इत्यस्मान्नन्तरं तिह्यामादिति वक्तव्ये ङित्करणं गुणवृद्धिप्रतिषेधार्थमेवेति विप्रतिषेधोपपत्तिः। अस्तु वा विनापि
विप्रतिषेधं सर्वादेशः। प्रदर्शितस्य गुणवृद्धिप्रतिषेधार्थत्वस्य सर्वादेशतामन्तरेणानुपपत्तेः॥ आदेः परस्य। परस्य यद्वि
धीयते तदादेरलो बोध्यं। ईदासः। अत्र तस्मादित्युत्तरस्येत्युपतिष्ठते। तेनादेरीकारः। आसीनः। अनेकाल्शित्सर्वस्य।
अनेकालादेशः शिच्च सर्वस्य स्यात्। अस्तेर्भूः। भविता। इदम इश्। इतः। ङिच्चेति नियमात् सिद्धे अनेकाल्ग्रहणम
पवादविप्रतिषेधार्थमित्युक्तं। यत्तु वृत्तिकारैर्जनुशसोऽश्शरिति शित उदाहरणं दत्तं तच्चिन्त्यं। सर्वादेशतां विनापि त
त्र शित्वस्यैवालाभात्। सर्वादेशतायां आमुपूर्व्यादनेकाल्त्वेनैव णल्डादेशेष्विव सिद्धत्वात्। तथाहि णल्डा
शिप्रभृतयो यदा सर्वादेशास्तदाप्रत्ययसंज्ञा। ततः प्रत्ययादित्व प्रयुक्ताद्युत्संज्ञा। ततो लोपः। तत एकाल्त्वे सत्यपि

राम०

न सर्वादेशत्वक्षतिः॥ उपजीव्यविरोधापत्तेः॥ अत एव हिकन्नित्यादौ न सर्वादेशतेत्युक्तं। शकारेणानुबंधेन इडूत्रभृतीनां न
नेकाल्त्वादेव सिद्धे शिड्ग्रहणं नानुबंधकृतमनेकाल्त्वमिति ज्ञापनार्थमिति न दिव उत्। अर्वणस्तृ इत्यादेर्न सर्वादेशतेति बोध्यं
। न नुकर्थं ज्ञापकता। इमसोरिद्भाव न्यासलोपश्चेत्येतदर्थं तया शिड्ग्रहणस्य चरितार्थत्वात्। तत्र हि लोपश इति छिद्यते। संज्ञा
यां च कृतं शित्वं तत्रानुपयुक्तं सत्संज्ञिनि फलति। इ मुट् ष्ठिवव दिति सिद्धांत इति चेत्। सत्यं। अनेकांतास्त्वनुबंधा इति प
क्षे नानुबंधकृतमनेकाल्त्वमित्यस्य प्रयोजनाभावान्नेदमभिप्रायको लोपश्च इति श्चेद इति सिद्धांतः॥ एकांतत्वपक्षे तु उक्तरी
त्या ज्ञापकताश्रयणमावश्यकं। इमसोरित्यत्र तु लोप इत्येव वक्तव्ये दः। लोपो यीति प्रकृते पुनर्लोपग्रहणसामर्थ्यात्सर्वादेशः।
वार्त्तिकमते तु नानर्थके लोन्त्यविधिरित्येव सिद्धं। न चानभ्यासविकारेष्विति पर्युदासस्यायं विषयः॥ लोपस्य विकारत्वाभा
वात्। रूपांतरापत्तिर्हि विकारः॥ यथा मृत्तामित्र॥ अन्नेपि पद्योश्चेत्यादिः॥ अत एव पस्य शायालोपो विकारात्पृथगुपात्तः॥
लोपागमवर्णविकारज्ञो हि वेदं परिपालयिष्यतीति॥ उक्तं च इदमोरादीनीतिसूत्रे कैयटेन। द्वौ चापरौ वर्णविकारना
शाविति॥ वस्तुतस्तु उपदेशावस्थायामेवांतरंगत्वेन। अत एवोच्चरितप्रध्वंसिनोनुबंधाः स्मर्यमाणाः संत एव का
र्यं निर्वाहयंतीति सिद्धांतः॥ इदं चोत्तरसूत्रभाष्ये एव कैयटे स्फुटं॥ तथा च दिव औत्। अर्वणस्तृ इत्यादेरेकाल्त्वादेकांत
पक्षेपि न सर्वादेशता प्रसज्यते॥ एवं च नानुबंधकृतमनेकाल्त्वमि॥ ति सिद्धांतः॥ इदं चोत्तरसूत्रे एव कैयटे ज्ञापनं

श०कौ०

वर्थ्यं। शिड्ग्रहणं च स्फुटतरं॥ इदमिहेदमत्र शूर्दं किमोरीश्चकीदृतिद्रशीशोस्तशकारोच्चारणसामर्थ्योत्सर्वादेशं तायाः प्राङ्लोपः॥ यत्तु
कृतेऽपि सर्वादेशे प्रयोजनाभावाच्छकारस्येत्संज्ञा न स्यादिति हरदत्तेनोक्तं तन्न। लोपस्यैव प्रयोजनत्वात्। न चैवमुच्चारणवैय
र्थ्यं। सर्वादेशसंपादनेन कृतार्थत्वादिति दिक्॥ तस्मादिह सूत्रभाष्यकृतोरभिप्रायश्चिन्त्यः॥ इहनानेकाल्। शित्त पठित्वा अ
त्यस्यादेरिति चानुवर्त्य अनुसंहारद्वयनिबंधे सर्वस्येति शक्यमकर्तुं॥ ॥इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य प्रथमे पादे सप्तम
माह्निकं॥ ॥

शब्दकौस्तुभ
५२८

प्रथमपादे सप्तमाह्निकं

१ = तस्य स्थाने हि संज्ञा या सा प्राक् प्रयोगार्था वो धकत्वाद्धि धिकाबेधेकवाक्यता यां शास्त्रतात्पर्यविषयत्वाभावाच्च सुबादिसंज्ञा या अशास्त्रीयत्वात्तदतिदेशः प्रकृतः [illegible] नञ्श्व [illegible] तात्पर्यविषयीभूतो दार्ष्टिकेऽका
६ = आदेशः स्थानिवत्कार्यं लभते तद्दृष्टेनावनेव स कृते [illegible]

श्रीः स्थानिवदादेशोऽनल्विधौ ॥ आदेशः स्थानिवत्कार्यं लभते प्रवर्तयति च । तृतीयान्तात् इति ना स्थानिना तुल्यं वर्तते इति वाक्यार्थः कार्यात् । यद्
पर्वैकल्यादुपदेशग्रहणं तौ सत्यामतिदेशो न गृह्यते तत्रोद्दुपस्थान्यलो ऽसाधारणं न भवेत् । आगमविधिप्र । अग्रहे तेऽधीयमानस्यात्मनेप
दं अतिदेशाद्धेऽदपि भवति । आङ्गे यग्रहणं नड्स्त्र अहि अल्लनाश्रीयते । रामायेत्यादौ सुपि चेति दीर्घे कर्तव्ये यद्यपि यादेशविन्यला
श्रीयते तथापि न तत्र तद्ग्रहणं सह प्रयुक्तः सुपि चेत्यस्य स्यात्प्रवृत्तिः । यादेशस्य यञादित्वात् । सुप्त्वं वैकल्यात्तु उपदेशस्याप्रवृत्तिः । सु =सुपि चेत्यस्य=
त्वं चेह यद्यपि ल्यप् इस्मिन्नपि वर्तते तथापि मतदल्यो ऽसाधारणं । स्थानात्मे समुदायेऽपि श्रीयते । इदं च कार्यकालपक्षाश्रयेणोक्तं ।
यथोद्देशपक्षे तु सुप्संज्ञा या अविशिष्टायां यत्वात् सैवातिदिश्यते । तत उपदेशे नैव दीर्घ इति न किञ्चित्कष्टं । एतेन अकृदितां
अकृदित मित्याद्यविडागमोऽपि व्याख्यातः । तत्रापि सार्वधातुकसंज्ञातिदेशसंभवादिति दिक् । धात्वंगकृत्तद्धिताव्ययसुप्तिङ्
पदादेशाः प्रयोजनमिति वार्तिककृतः । उदाहरणादिकं च बोध्यं । ननु पत्निमिलेन मितिमित्यं । ग्नः सिजित्यादौ नाम संगृहीतानि । के
मेलोदाहरणानि । अस्तेर्भूः । आर्धधातुके विवक्षिते । अत एवाङ्गात् पृथक् धातूपादानं । धातुत्वाज्जनुप्रत्ययाः । भव्यं । केन । कार्य्यं ।
वैः । अङ्गत्वादिनादेशादीर्घैस्य भावाः । कृत् । प्रकृत्य । ह्रस्वान्तस्य पितीति तुक् । अघनत । तद्धितत्वान्तर्त्वम् पुंवत्प्रातिपदि
क संज्ञा । इदत्थः । स्थानिवद्भावेनाव्ययत्वाद् व्ययपूर्वपदप्रकृतिस्वर इत्याहुः । तच्चिन्त्यं । स्थानेन्तरतमपरिभाषया तात्पर्यत्वादर्थं अ
धो ऽधइति कृदाहरणं । आद्मिकद्वित्वस्य स्थाने द्विर्वचनरूपत्वात् संभाव्यते । किंतु तत्रापि पदं द्विर्वचनं । तस्मादधोऽधः काम इत्युदाह
र्यं । अतः कवमाति ग्रामस्य सत्वस्याव्ययत्वात् पर्युदासः । यत्तु वृत्तौ प्रस्तुत्ये सव्ययादेशोदाहरणं । तच्चिन्त्यं । स्थानमात्रस्यानव्ययत्वा

त्। तदेतद्विधेः सर्वैकवाक्यतया सिद्धमिति तत्त्वात्। न च तत्त्वार्थापत्तौ कृत्वाऽनर्थक्यात् सर्वे सर्वपदादेशाद्द्रव्यमिति प्रायेणोद्भिदिति वाच्यं। द्रव्य
स्यापि निरूक्तीतिगुणभावापत्तेरिति दिक्। सुप्। सामाय। तिङ्। अपचतां। तिङ्। तत्वात्त्यदत्वं। वः नः। पदं तत्वात्त्वादि। न त्वेवमधोधःद्रव्यस्या
पिपदादेशत्वादेव गतार्थतेति चेत्सत्यं। गोवत्सौ वदन्त्यायेनोपयच्छहणादिति दिक्। इह स्याभ्यामित्यादावादेशः कार्यो न भवति। केन दे
दिसादेरुपरस्य प्रवर्तयतीति विवेकः। ननु वल्क रणं मास्तु। स्यान्यादेशाद्द्योगात्तस्यापि अस्य योगाद्धि। किं दिसादाविव वस्य धर्मला
=अन्यस्मिन्=५ भात्। यदाहुः। परैश्च परशब्दः प्रयुज्यमानो विनापि वतिं वत्यर्थं गमयतीति। न च स्यानी आदेशं प्रतिपद्यते इत्येन वाक्यार्थः किं न स्या
दिति वाच्यं। तन्तदादेशविधायकादेव गतार्थत्वात्। न चादेशः स्यानिरूपमापद्यते। वचनद्द्रूपप्रामाण्यादविकल्पयद्द्रूति वाच्यं। वा
लिटीत्यादिभात्। न च क्लिङः स्यान् आदेशः स्यानीतिवचनद्रूपप्रामाण्यात्तु सर्वत्र विकल्पापत्तौ लि द्वेवेति नियमार्थं तत्स्यादि
ति वाच्यं। एवमपि विभाषा लुङ्लृङोरित्यादौ प्राप्तविभाषा सुवाग्रहणवैयर्थ्यापत्तेः। अस्ति भूभ्यां रूपद्वयसिद्धावस्तेर्भूरित्यस्य
वैयर्थ्यापत्तेश्च। अथाहुः। वत्करणाभावे स्यानी आदेशस्य संज्ञा स्यात्। प्रायेण तस्मिन्नू पादे संज्ञासूत्राण्येवारभ्यन्ते। तत्त्वा ऽऽयम
हनदुत्यात्मनेपदं वधेरेव स्यान्न तु हन्तेः। न च स्यानरूपमिति हन्तेरपि ग्रहणं। अशब्दसंज्ञेति निषेधात्। न च स्यानिनः संज्ञात्वे सिद्धरूप
=संज्ञायेन=२ मिति मित्सादित्याय बाधः। अनेकशक्तेः शब्दस्य शक्त्यवच्छेदेन संज्ञितिविधिनियोगइति पक्षे संज्ञायाश्चोदेशः प्रक्रोदिनि वेशनात्।
न चैवमाङो वधिय मद्रूसे वध्यादि तिवाच्यं। वधाहन्ता यामिति भोवादिवद्स्यापि ग्रहणापत्तेः। न चैवमाङो वधयमद्द्रूति पठ्य
तां। अकारस्याविवक्षितत्वात् न भोवादिवदेशतिप्रसंगइति वाच्यं। स च वहन्तादेशसंग्रहार्थमाङो यमहन इत्यस्यैव वाच्यत्वात्।

तथा चावयविभूतदीर्घरूपद्वयप्रत्यासत्त्यैकपदं सिद्धं । तथा हि हंते ऌदित्वसामान्यापेक्षत्वादंतरंगत्वात् तिबादिषु कृतेषु परत्वान्नित्यत्वाभ्यां शेषात्कर्
तरीति वा चित्वा लिङ्गिद्धातोरिति द्विः प्रयोगे अभ्यासस्य चुत्वे अभ्यासात्परस्य च त्वे एकदेशविकारासंभवेन समुदायस्य समुदायादेशत्वात् =श्चुत्वानि सत्त्वा =प्रसंगात् =
कृत्स्नादेशत्वं ततो नपि ना सह तुल्ययोगत्वे समतेति दिक् । अस्तु वा स्थानित्वेन आदेशाः संज्ञा तथाप्यनिष्टत्वं तुल्यमेव । तथा हि । अस्य वृत्ति
वर्तीत्यत्र स्थानिपदेन वृत्तिग्रहणं । कृत्रिमत्वात् । तथा च समवर्तिषीष्टेत्यत्राङ् स्यात् । अस्य मेतेत्र च न स्यात् । न चैवं च ङ्गि
इत्येव भूयात् । अनुबंधनिर्देशेनापि पङ्कजु ग्वारलसंभवादिति वाच्यं । एवमपि गाङ्कुटादिसूत्रे गाङ्न्दुङः गाङो ग्रहणापत्तेः । इ
ङित्वं वचनसामर्थ्यादुभयगतिः स्यात् । गाम्नेदिति पर्यस्यैव पदस्य चेदुक्तिरिङ्गामेव ग्रहणं स्यात् । तस्मात् तदर्तव्यमेव वक्त
रणं । नन्वेवं वर्तद्रणानामाधीनत्वाच्च वानुबंधात् संज्ञाप्रवर्तनरूपद्रव्यत्रैव स्थानिवद्भावप्रवर्तनं क्रियतामिति चेन्न । तथा सति आ
देशग्रहणं विनापि स्थानिवद्भावस्य अहि वकुचौर वाप्नेतेः । सिद्धं ते तु आदेशग्रहणमतिदिश्यमाने आनुमानिकस्येव ग्रहणं भवतीति
तद्भेदेनैकदेशविकृतस्योपसंख्यानमिति वार्तिकं प्रत्याख्यास्यते । अपि च । आ मम तिदिश्यतां वेति वक्ष्यमाणमपि व्यक्तरणं
पदमपीति दिक् । स्यादेतत् । यदि संज्ञाप्रवर्त्तकेव व्याकरणं विनाऽतिदेशानामसत्ताहिं चितत्ङिः तद्वृस्यादेकागतिरिति चेत् । उच्यते । ङ्गिद्
ति न संज्ञा । नत्वामोऽङित्सिद्धात् । न हि व्यक्तः विद्वसंज्ञा प्राप्ता यान्निषिध्येत । ननु मङ्गस्त्रदेति प्राप्ता सा निषिध्यतां । वचनसामर्थ्यस्या
यच विदन्यो स्त्रियति चेन्न । मृडे स्वत्रैव वाग्रहणस्य संभवात् । किं चैवं निष्ठा ङित्स्याद् व्यर्थं स्यात् । न हि शूद्रादिप्योनिष्ठायाः पेन
चित्संज्ञा प्राप्ता । एवं ङिदित्यपि अतिदेशः । किं तु माह वर्यात् । किं च ङिदिस्य स्य संज्ञात्वे गच्छि स्यादि सूत्रे स्यैव ग्रहणं स्यात् । कृत्रिमत्वा

र। तथा च नवश इति सूत्रं व्यर्थं स्यात्। आगमश्च यत इत्यत्र संप्रसारणप्राप्तेः। सिंच वृद्धिरिति चेत्यत्रास्याग्रहणं स्यात्। संज्ञा स्वरूपानुच्चारणात्। तथा च या
ऽनुपदिष्ट इत्यत्र कृदादिग्रहणं व्यर्थं स्यात्। बहुगणेत्यत्र तु संख्येत्यतिदेशः अन्यथा दिधुमादिवदेकाच्स्वराप्राप्त्वसंज्ञायाः कर्तव्यता
पत्तेः। विधिविधौ लिङ्चेत्यादि तु न संज्ञाप्रवर्तनं। नेनलिङ्गादित्यतिदेशो निबाध इति दिक्। अथादेशग्रहणं किमर्थं। स्थानिवदित्येतावतैव
संबंधिशब्दमहिम्ना तल्लाभात्। यथा पितृवदध्यापयितव्य इत्युक्ते पुत्र इति गम्यत इति चेत् सत्यं। द्विविध आदेशः। अन्तर्भूतरितो प्रत्य
क्षः। तेस्तु दिस्यादि आनुमानिकः। अत्र हि इकारेण इकारान्तः स्थान्यनुमीयते। उकारे ता चोकारान्त आदेशः तथा च नेत्नुरिति प्र
तितोर्थः। तयोर्मध्ये आदेशग्रहणे प्रत्यक्षस्यैव ग्रहणं स्यान्नानुमानिकस्य। आदेशग्रहणसामर्थ्यान्नूभयपरिग्रहः। तेन पचेत्यादौ
तिङः तान्तस्य पदसंज्ञा सिध्यति। ननु एकदित्यादि यथाश्रुतमस्तु। एकदेशविकृतस्यानन्यत्वाच्च पदसंज्ञा सिध्यतीति चेन्न। अर्थवत्ये
व स्थान्यादेशभावव्यवस्थितेर्वाच्यत्वात्। तस्यैव प्रसंगसंभवात्। तथाहि। षष्ठीस्थानेयोगेत्युक्तं। स्थानं च प्रसंगः। स चार्थवतः। अर्थप्र
त्यायनार्थं शब्दप्रयोगात्। यद्यपि लेः स्थिजादावसंभवीदं तथापि संभवे अर्थप्रयुक्त एव प्रसंगो भाव्यत इति आदेशग्र
हणेनैव ज्ञाप्यते। उक्तं च सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः। एकदेशविकारे हि नित्यत्वं नोपपद्यत इति। पदमिहार्थवत्। पिंघ्यते बोध्यते=५
नेनेति युक्तस्तेः। यद्यपि सर्वविकारे सुतरां नित्यत्वानुपपत्तिस्तथापीह विकार एव नास्तीति तात्पर्यं। तथा च वार्तिकं। कार्यविपरि
णामाद्वेति। कार्यमिह ज्ञानं। योग्यतावशात्। तथा च ज्ञानविशिष्टं उत्पादविनाशादिकं विषये आरोप्यत इति भावः। नन्वेवं बुद्धिविपरि
णाममात्रस्य स्थान्यादेशभावत्वे अपवादेष्वुत्सर्गकृतं स्यात्। तथाहि। केयस्यां तादपि अत्र नेत्य प्रयुक्तो ङीप् स्यात्। अत आह वार्तिक
कारः। सिद्धं तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनादिति। स्थानेयोगेत्यनुवृत्तेरिति भावः। न चापवादः षष्ठीनिर्दिष्टस्य स्थाने विधीयते।

षष्ठी

नाभिनभं चेत्यादौ तु षष्ठ्याः स्थाने प्रथमा बोध्या। विश्रवणरवणस्त्याहादिति तु श्रवन्तं तदारोपे प्रत्ययविधानस्य विधौ ध्याति। विश्रवणरवणशब्दस्तु प्रत्ययो
न भवति अनभिधानादिति भावः। तथा च विड्रात्युपदिति सूत्रे भाष्यं। वाह्लवायोविड्रैच प्रकृत्यंतरमेव वा। नवैतत्रेति चेद्गा जिलो
वदुपाचरेदिति। अस्मिंश्च पक्षे षष्ठीनिर्दिष्टस्यादेशा उच्यंत इति द्विसूत्र्यभाष्यं यथा श्रुतमेव साधु। यत्तु स्थान्यर्थाभिधानसमर्थस्ये
वादेशत्वमित्येवं परतया द्वैपरे नभं व्याख्यातं तदन्यपक्षे तराभिप्रायेणेत्यवधेयं। अथवा श्यनः श्नित्करणं ज्ञापकं। अपवादे उत्स
र्गकृतं नेति। नचैवमित्त्वनिर्देशसामर्थ्यं तदिति वाच्यं। नित्यादेवतं हि सिद्धे नित्त्वं ह्लापुदात्तार्थं। श्यनः पित्त्वे तु पित्त्वादेवानुदात्तत्वे ह्लसार्वधा
तुकानुदात्ते च धातुस्वरेणैव सिद्धौ किं नित्त्वेन। न चानेकाच्सु विशेषः। दिवादौ तदभावात्। वार्त्तं तु वर्तनइत्यस्मादिति चेन्न। वाशब्दस्य
विकल्पार्थत्वात्। न च भ्वादिपाठेन सिद्धम् इत्यर्थं। भ्वादिपाठस्य वृधः स्यसनोरिति स्यानेतर्गणकार्ये तु पक्षीलत्वात्। नन्वेवं ततो
... समानाक्षराप्रशुना ... विकल्पेत इति यदि प्रयोगानुपपत्तिरिति चेन्न। तत्र वाशब्दस्येवार्थतया ... मपमानेव न तु तथा किंतु छन्द
... नार्थप्राप्ते समर्थात्। भयवृद्धेपट। ताध्यावादिविषये चानश्चित्स्यनोनित्त्वं प्रकृते तमपुदात्तार्थं स्यादिति। तत्र हि ल्सार्वधातुका
भावादनुदात्ताप्राप्त्याचितत्स्वरेणोदात्तत्वमेव प्राप्तं इष्टं च। तत्रानिष्टार्थमेव नित्त्वं किं न स्यादिति न स्याशयः। न त्वेतत् युक्तं। अन्यत्र वि
करणे त्याद् इति पर्युदासात् श्यन्स्वरस्य दुर्वारत्वात्। न च नित्त्वसामर्थ्यान्न बोधः। ल्सार्वधातुके चरितार्थत्वात्। तत्र स्थानिवद्भाव
... नपित्त्वेन गतार्थत्वेतिचेन्न। इह नित्यैनाति देशपर्युदासयोरन्यतरस्मिन् बाध्येति देशबाधस्यैव न्याय्यत्वात्। पूर्वान्तविधीन्
बाधंते नोत्तरानिति न्यायाच्च। यत्तु वैशिष्ट्यचानश्च तस्यापुदात्तत्वमिष्टमित्येवं परतया द्वैपरे ग्रंथं व्याख्यातं यद्विकल्पे न्योन्ययेनैत्तुप

१-पुंसं भास्त्रेति । तथा हि दैपः सानुबंधकस्यालाभस्तस्यासमहत्तेन महत्त्वं न प्राप्नोतीत्यपां स्वपत्तं देवानां नदेवस्ति अवत्तपैपतीति रूपसिद्धिः तस्मादिसुपठितस्योत्कं पदादावितुपाः
= तपमानदृष्टिचानशं तेशप्यंतो दात्तं स्यादयवितिला पुदत्तानिति पलेवैपस्य स्वस्य सत्वात् । न चानभिधानादिह चानभो न नास्ति पयो नरं पुनीनां पामाल्पादापुदान स्यैवं
= मानेस्वश्चेति सूत्रेकर्तृकर्मग्रहणं तदर्थं यं कर्मोपदिष्टो यकः यथा स्यात् अयन् मामदिति । कथान्नविशेषः यतो नाश्यमनो नापदि समसंतो पाम तेन भवितव्यं इय

3 पुंवत्सनुपचविवक्षणात्स्वरभाक्तं तद्धि पयः । इह तु विवक्षणां तमेव स्वरभाक् । सौवर्यः समस्यस्तदं तस्मात्स्यादिति सिद्धं तावदिसुन्के ... सु
संज्ञात्वं न भोपस्येन गवँ शरत्सुत्र स्येन च भाष्येण विरुद्धं चेत्सुपेक्ष्यं । किं च भातो नुपसर्गे वृद्धिति कपवादस्य गापोष्टगिति टकः । किं तु रणं तूणपर्वं
-मापवादेनुत्सर्गीकृतं भवतीति । अनन्त्यविधाविति किं । तेन तस्मान्नस्यानस्थिं अविधौ मा भूत् । तत्र अन्त्यविधौ यथा । वृक्षोरस्ते न अजन्तोपदादावि
ति विसर्जनीयस्य स्थाने विहितस्य सकारस्य स्थानिवत्त्वात् विसर्जनीयस्य प्रद्रूपदेशाद्दृव्यवायइति णत्वं प्राप्तं । अतः परस्य विधौ यथा । पौः
पंथाः सः भ्रमहत्तू द्यौ दिल्लोपो न भवति । अलो विधौ यथा । दिवउत् । घुकाभेः । लोपो व्योर्वलीति लोपो न भवति । उत्तविधाने तु अहर्विमले
घुइस्यादेश्चरितार्थं । अल्विधिविधौ यथा । पजे: नः इष्टः । वदूष्टइत्यत्र संप्रसारणस्य स्थानिवत्त्वात् दोपषष्ठे स्यादविवहमिचे सुत्वं न भव
ति । सइष्टइत्यत्र एतत्तदः सुलोपो न भवति । अनन्वइ इसु के पि संबंधसामान्ये षष्ठ्या प्राप्तु मानेकविभक्त्यर्थसंग्रहोपपत्तिसंभवति तथापि
विधिशब्दोपादानमप्राधान्येनापल्वभाअपलो निषेधार्थं । तेनामप्यथ्वेसादिसिद्धं । अत्र हि वलादेर्दृष्टस्य प्राधान्येनाल्ला श्रितः नतु प्राधान्ये
न । स्यादेतत् । स्थानम नुबंधकार्यालयपि ताहि निविधेयेर्न तथा च प्रदीव्येस्य स्थानिवद्भावेन कित्वेनेतल्भ्येनेति चेन । अनेकांताम नुबंधा
इति पक्षेऽनुबंधानां स्थानत्वलाभावात् । एकांतपक्षे पंतरंगेण लोपेन आदेशसंबंधात् प्रागेवानुबंधानाम पहारात् । न च्यपीति लिंगा
य । पनुसेह्यपि ध्वेति ज्ञापकमुच्यते । तस्यास्तिकं । अपि हृ चनासामर्थ्या त्स्यामेतरत मपरिभाषया प्रातं अनुदात्तत्वं न भवती त्यस्यापि सुवर्चलो
त् । यपपि सामान्यातिदेशे विशेषानतिदेश इति सिद्धं तः । उपस्थिते सामान्यप्रयुक्तधर्मैस्तदाश्रितव्यापकसामान्यधर्मे अविधात्कां
स्रापहले सति अनुपस्थितस्य विशेषस्य ग्रहणे प्रमाणाभावात् । अत एव चाश्लत्वदस्मिन्द्रष्ट्रियेवर्त्तितव्यमित्युक्ते माठरादिवि

शेषकार्यं नातिदिश्यते । अत एव चाशंसायां भूतवच्चेत्यत्र भूतसामान्ये विहितयोर्लुङ्निष्ठयोरेवातिदेशो न तु भूतविशेषविहितयोर्लङ्लिटोर
पीति सिद्धान्तः । तथापीह सूत्रे नल्यपीति लिङ्गाद्विशेषोऽप्यतिदिश्यते । कृत्तिपदतो विहितमात्रं निषेद्धुं हि नल्यपीत्यारभ्यते । किंत्वं चेत्कौ विशे
षधर्मः । सेट्कत्वे तदभावात् । तेन प्रदाय्येत्यादि सिद्धं । तस्मान्नल्यपीत्येव सूत्रं विशेषातिदेशोऽनुबंधकार्यातिदेशे त्वस्तु भयत्राचि ज्ञापकमि
ति सिद्धं । यत्तु प्राञ्चः । अनल्विधाविति निषेधो विशेषातिदेशज्ञापक इति । तच्चिन्त्यं । व्यूढोरस्केन कद्रूष्ट इत्यादौ विसर्गस्य यत्वस्य
च व्यापन्नीभूतयोर्रदुरहश्शब्दयोर्निषेधेन चरितार्थत्वात् । यदपि स्फूदेशे कत्वं प्रत्ययत्वाद्यतिदेशमभ्युपेत्य कद्रूष्ट इत्यादौ हश्शब्दा
दि विशेषातिदेशो न प्राप्नोतीति प्रिश्रेष्ठः । तत्र विसर्गत्वयत्वयोर्रदुरहश्शब्दत्वेनैकार्थं विशेषधर्माविति विपश्चित एव विदांकुर्वन्तु ।
पयचितस्यानापन्नत्वात्सुमेलभत इति न्यायसिद्धं । अत एव श्रीहिंस्यात्मनेपदेषु नीवोरेपुर्वचनं विनैव श्रीहिधर्माप्रतिपादनात्पः क्रियते । तथापि
तेषां प्रकृतापूर्वसाधनत्वप्रयुक्ततयाप्युक्तं नीवारादावनुष्ठानं । आङोयमहन इति हते रात्मनेपदं तु न हिंसाधर्माभिधानप्रयुक्तं येन वधौ
भवेत् । किंतु स्वरूपभित्तिवचनात् स्वरूपविशेषप्रयुक्तं । अत एवाघ्नत इत्यादौ न भवति । तस्मात्पुक्त एवातिदेशोऽयं भः । स्यादेतत् ।
मामत्र न्यायेन गतार्थता । ज्ञापकमात्रं भविष्यति । तथाहि । युष्मदस्मदोरनादेश इति सूत्रे अनादेशग्रहणं ज्ञापयति । आदेशः स्था
निवत्स्यादिति । अदोऽजधि इति सूत्रेऽतिकितीत्येव सिद्धे ल्यब्ग्रहणमनल्विधाविति भवं ज्ञापयति ॥ अप्राधान्येनापवर्गाश्रय ए
निषेधइत्यंशं च । तथा च किं सूत्रे लेति । उच्यते । उत्तरार्थं तावत् स्थानिवदादेश इति कर्तव्यमेव । तस्यैव योगविभागमात्रे लोपप्रपञ्चोऽस
त्यां आर्थापत्तिकं वचनं न कर्तव्यं । एवं स्थिते अनल्विधाविति यमप्यंशः स्वपप्रतिपत्त्यर्थं क्रियते । उत्तरसूत्रे द्वितीयविधिग्रहणस्यानुवृत्त्य

= युष्मदस्मद्भ्यां ङसोऽशि सत्यपि लुक्कःरलं त्वा युष्मानित्यादेशसंग्रहणं वेसपि वोधं = २

= वक्ष्याम इति । चिकंसयाकृत्रिमपक्षिपंक्ते इति माघश्लोके तु चिकंसे आदुन्निधेदः । अप्रत्ययादिस्वकारप्रत्ययान्ते तु चिकीर्षिषेत्येव भाष्यादिसम्मतः । ग्रन्थसंमतमस्तीति दिक् ॥ ७

५ र्थं च । तत्प्रयोजनं तु तत्रैव वक्ष्यते एतदेव च समवृत्तमभिसंधाय प्रोक्तं भगवता । आत्मनेपदमाप्यस्मिन्सूत्रे इति । स्यादेतत् । अस्तु सूत्रारंभः । तथापि कार्यातिदे
शात्कार्यमिति कुतः । प्रकारान्तरस्यापि संभवात् । तथाहि । अतिदेशः षोढा । निमित्तव्यपदेशतादात्म्यशास्त्रकार्यरूपातिदेशभेदात् । तत्र
निमित्तमशक्यमतिदेष्टुं । आत्मनेपदवत् । नहि आत्मनेपदस्याप्रयोजनादौ निमित्तभूतं आत्मनेपदवचनशास्त्रं नापि सन्निधिदेष्टुं शक्यते । परवत्त्व
नइत्यत्रापि प्रकृतिगतं निमित्तं ङित्त्वादि न सन्नंतेति दिश्यते । किंतु प्रकृतिगतमेव तत्तनाव्यवधानेन सन्यपि आत्मनेपदं प्रवर्त्तयतीत्ये
तावन्मात्रमतिदिश्यते । एतावतैव च निमित्तातिदेश इति व्यवहारः । न चायं कार्यातिदेश एवास्त्विति वाच्यं । चिकंसते प्र
चिकंसते इत्यादावित्प्रसंगात् । निमित्तादेशपक्षे तु अनुपसर्गात् प्रपूर्वस्य क्रमेरवेह सनाव्यवहितो आत्मनेपदं प्रवर्तितवानि
ति अनुक्रमोपनात्मनेपदनिमित्ते इति नियमादिदं न भवति । निमित्तं हि तत्र प्रत्ययोपहितमेव गृह्यते न तु स्वरूपयोग्यमात्रमिति वक्ष्यामः ।
सिद्धं चात्मनेपदेन समानपदस्थस्येत् प्रतिषेधादिति वार्तिककारीया तु होइपि कार्यातिदेशतामुवाच । व्याख्या चेति तत्रैव वक्ष्यते ।
व्यपदेशातिदेशस्तु आद्यंतवदेकस्मिन्निति । एकस्मिन्नपि आदित्वं तद इति च व्यपदेशोऽतिदिष्टो तत्सूत्रे तत्रैव कार्यापत्तिरिति भावः । त
थाचमांच । आद्यन्तवत् व्यपदेशो निमित्तं पूर्ववत्सनइति । तथ निमूलमिति तत्स्मिन्नेव सूत्रे हरदत्तः । तस्यायंभावः । कार्याति
देश एव तत्र युक्तः । सर्वातिदेशानां कार्यार्थतया कार्यस्यैव प्राधान्यात् । अत एव कार्यातिदेशाभ्युपगमे यत्र बाध्यभावतात्स्तत्रैव
प्रकारान्तरानुसरणं । न चाद्यन्तवत्सूत्रे तदस्ति । प्रत्युत व्यपदेशातिदेशपक्ष एव बाधकं । तथाहि । कुरुते कुर्वे इत्यादावंत्यव्यपदेश आदिव्य
पदेशश्चास्तु । तथापि अंत्योपादिर्यस्येत्येवं रूपस्य कृञस्तदर्थस्याभावाद्धि संज्ञाया अभावे टेरेत्वं न स्यात् । कुर्वाते इत्यादौ दृष्टस्य

देरेत्यास्य स्वकार्यस्यातिदेशे तु न कश्चिद्दोष इति। तादात्म्यातिदेशस्तु भिन्नयोरभेदातिदेशः। सुबामन्त्रिते पराङ्गवत्स्वरे इति यथा। तेन यत्तेदि
वो दुहितर्मर्त्तभोजनमित्यादौ आमन्त्रितस्य चेति आष्टमिकसूत्रेण पदस्वरस्यामन्त्रितस्य क्विपमात्रेण निघातो दिवो दुहितरिति समुदा
ये प्रवर्तते। शास्त्रातिदेशस्तु कर्मवत्कर्मतोस्य अपाक्षिको वक्ष्यते। कार्यातिदेशो गोतो णिदित्यादिः। रूपातिदेशस्तु द्विर्वचनेचि इ
त्यत्र क्रोष्टुरित्यादिः। तदिह कार्यातिदेश एवेत्यत्र किं विनिगमकमिति चेत् उच्यते। कार्यस्य प्राधान्यात्तदतिदेश एवायं। अतिदेशान्तरे
बाधकसत्त्वाच्च। तथा हि निमित्तव्यपदेशातिदेशो नावतारक्षिका विमुक्ते। शास्त्रातिदेशोप्येवं। तादात्म्यातिदेशस्तु द्वयोः सहावस्थित
योः स्यात्। सुबामन्त्रितयोरिव। इह तु स्थानी आदेशेनापहृत इति तदसंभवः। रूपातिदेशे तु आदेशविधानं व्यर्थं स्यात्। ननु वचनं वचन
रूपप्रामाण्यात् द्विकल्पः। विभाषा लुङ्लृङोरिति विकल्पारंभात्। तस्मात्कार्यातिदेश एवायमिति स्थितं। यत्तु न्यासकारेणोक्तं व्य
पदेशातिदेशः संज्ञापक्षे पर्यवसन्नः। स च वत्करणसामर्थ्यादिह न भविष्यतीति। अत्रेदं वक्तव्यं। अस्तीह संज्ञापक्षे दूषणं। तथा हि। आ
ङो यमहन इत्यात्मनेपदे वधेरेव स्यान्न तु हन्तेः। तथा वेनवरस्मादित्यादौ अंगकार्यादि न स्यादिति संज्ञापक्षे दोषद्वयं। न चेदं व्यपदेशातिदेशे
ऽस्ति। स्वं रूपमिति वचनाद्धि हन्तेरितिरेव संज्ञा। न व्यपदेशस्य वधावप्यतिदेशो तु भाष्यकारमतेन पदं लभते। ननु हन्तेरेव। एवं स्थानि
निमित्तानां धात्वंगादिव्यपदेशानामादेशेऽतिदेशात् अंगादिकार्याण्यपि सुलभान्येव। तस्मात्प्राधान्यात्कार्यातिदेशोऽयमिति सि
द्धत्वं। अत्र वार्त्तिककाराः। तस्य दोषस्तुपक्रम्य तयादेश उभयप्रतिषेधः। ह्वाप्रग्रहलोऽदीर्घः। आहिभुवोरीट्प्रतिषेध
इत्यादि पेठुः। न च उभयशब्दे यथा नातिप्रसंगस्तथा सर्वादिगणव्याख्यावसरे उपपादितं। ह्वाप्रग्रहलोपिङिदीदू आ आप्

5

इति दीर्घप्रश्लेषाददितिस्वद्भून अतिस्वद्भूद्यादौ नातिप्रसंगः। न चैवमपि अतिस्वद्व्यायेत्यत्र दोषतादवस्थ्यं। उपसर्गेनस्त्रीप्रत्ययेतदादिनियमसत्वा
त्। न चैवंप्रश्लेषवर्णनं वैयर्थ्यं। अतिस्वद्भूद्यादौ अंगाधिकारविरहेणावयवादानेतास्वरस्य मात्रिसहत्वद्यादिलोपापत्तेः। नहि
तत्रविहितविशेषणाश्रयणं युक्तं। यः सः इत्यादावतिव्याप्तेर्या सेत्यादावव्याप्तेश्चेत्युक्तं। अत एव सूत्रकारोपि तत्र दीर्घग्रहणं कृत
वान्। दीर्घप्रश्लेषस्तु तत्संस्पारस्यानायवर्णतेद्युत्यदेतत्। युक्तं चैतत्। आर्त्विक्प्रते अतिस्वद्व्यायेत्यादौ वंगाधिकारवलेनकथंचि
न्निर्वाहेपि जरसेनसप्तेद्यादावतिप्रसंगस्य दुर्वारत्वात्। सुतौ भिक्षुन सुतौ त्रियादौ सुलोपापत्तेश्चेति दिक्। आहि भुवो रितिवा
र्त्तिकं तु इत्थं भाष्यकाराः प्रत्याचख्युः। आस्थेत्यत्र आहेः स्थानिवद्भावे नत्रा लोपि भुवई लू न भवति। आहस्थ इति शापकात्। तेन हि स्व
ादेः परत्वं विधीयते। न चकृतेपीत्यभूतपूर्वगत्या झलादित्वात्प्रथकारोस्तु इति वाच्यं। एवं हि सति प्राथमे व विद्यमानत्वात् गाथयानात्। ति
बादानां पंचानामपि झलादित्वादासामपि भूतपूर्वगत्या झलादित्वात्। तस्मादाह स्थ इति ज्ञापकादाहे। थत्वविधौ स्थानि
वद्भावो नेति स्थितं। अस्तेर्भूरिति विहितस्य भुवोपि स्थानिवत्वनिषेधो न वक्तव्यः। अस्मिन्निचोपकृद्इति सकारस्य निर्देशेन सकारां
तादेवास्तेः परस्य ईडिधानादिति। स्यादेतत्। अस्तुस इति सकारस्य निर्देशे धातुत्वाभावात् श्तिबेवानुपपन्नः। पदमध्यमविशे
षसकारेण स्तिचो विशेषणं संभवे स्तिपा अयस्य ईटः प्रसंगश्च। न चास्तेः सांतत्वेन विशेषणसामर्थ्यात् स्तिच प्रयुक्तोपीण्नेति वाच्यं। त
थापि स्वतंत्रस्य भवतेरिति प्रसंगस्य दुर्वारत्वात्। तथा चार्थभेदाभावेपि स्वतंत्रास्वतंत्राभ्यां भूभ्यां अभूवीदभूदिति रूपद्वयापत्तिः।
पत्तु एतद्दोषोपन्यासपूर्वकं भाष्यवार्तिकं कृतं। स्तिचोत्पाचस्त्वादुह विषयत्वेनाभ्यर्हितत्वात् अपूर्वनिपातेकृतेऽस्ति सिच इति

वचनात्तं आदिना विधीयमानस्तिचड्डुसप्यर्थो लभ्यते । अत एव श्तिप्प्रयोगो विसार्थकः । अथो न्वेहि स्थिसंस्थमयाम्बिसि वर्भूयात् । न चैवमसत्ता
वस्यतो ऽतिप्रसंगः । विकरणव्यवधाने नतान्यंपरस्याप्रकसार्वधातुकस्याप्रसंभवादिति । तच्चिंत्यं । एवमपि विश्ति कृप्रसारणस्याभावाने
न द्वित्सकारको निर्देशः इति भाष्यस्यानिर्वाहात् । एतेन स्थिजअअस्तूचस्थिचस्तु । समाहार द्वंद्वे लुप्तषष्ठीकं पदं । अथ स्मयादित्येन
मत्वान्वकृत्तसशब्दे । अस्तिचतत्सिलस्तूचेति कर्मधारयः । ते न लुप्ताश्तिचो भूभावे नापहृतादस्तेश्नपरस्य नेति कृत्वनापि प्रसुला
उक्तरीत्यारूपसिद्धावपि भाष्यानिर्वाहात् । तस्मादिह भगवतोपि प्रायां तदेवं वक्तव्यमिति । अत्रोच्यते । अस्तिसिचस्तु इति
छेदः । सांतादस्तेः न तु कृतनुभावात् । सांतात्सिचः श्रूयमाणादिति यावत् । तथा च सिचइत्यस्यानंतरं सकारः प्रश्लिष्यते न तु
श्लिष्टः प्राक् । येन भाष्यवोक्तः श्तिपः प्रत्ययानुपपत्तिरूपो दोषः स्यात् । अत एव सिचोपृक्त इति द्विसकारको निर्देशः इत्युक्तं भाष्ये ।
अन्यथा ह्यस्तीति निर्देश इत्येव ब्रूयात् । नन्वेवं अस्तिसिचोपृक्त इति संहितायां कथं निर्वहतीति चेत् । दृष्ट्वं । संयोगांतस्य लोप इति द्वि
तीयः सकारो लुप्यते । ननु लुप्तविभक्तिकं सइति पदं । न चैतत्संयोगांतं । तथा च संयोगांतं यत्पदं तत्स्याद्विधीयमानो लोपः कथ
मिह स्यादिति चेन्न । संयोगांतस्य पदांतस्य लोपः स्यादिति व्याख्यानात् । संयोगेति हि लुप्तषष्ठीकं पृथक्पदं । संयोगस्य पदस्येत्यु
भयं चांतस्य विशेषणं । एष एव च सूत्रकृतोभिप्रायः । यदि हि बहुव्रीहिरयं पदं चान्यपदार्थ इति वृत्तिकारकृतं व्याख्यानं संमतं स्यान्न हि
अंतग्रहणं न कुर्यात् । संयोगेन पदविशेषणादेव तदंतलाभात् । अपि च । सरूपसूत्रे पृथक्सर्वे व्योविभक्तावेकशेष इति प
क्षे वृक्षस् स् इति प्रसज्येते सा शंक्यसंयोगांतलोपात्सिद्धमिति भाष्यग्रंथः प्रकृतव्याख्यानएवानुकूलः । यत्तु तत्र केय

= प्रकृते राक्षेपे लोपः । न चाप्राप्तपक्षे यः सत्सादावति व्याप्तिः । विशेषविहितत्वाद्धि भवेद्यस्तदन्तलेन हलं ताया प्रकृतेः परस्य भावाज्झाही दंवि हितविशेषलसिद्धमेव नापि धातोः स्यादव्याप्तिः । आवृत्तस्य तत्त्वस्य प्रसङ्गे हलंता स्व रत्नस्या =
= नपेक्षत्वात् । एवं त्वेतिरवहितस्यापि प्रकृतेराव तत्व विग्रहदुपसर्जनस्त्रीप्रत्ययेतदादि नियमस्य सल्लाङ्गृह्ण्यादि लोपप्रसक्त्या आवि हितप्रवृत्त्युपमर्दने नैव पर्याप्तमापद्यते । किंत्वाविति प्रत्ययान्ताद्धलोऽन्तेदंतं न्महलो देवतेन =
= चप्रकृते विशेषणाद्वं तौ ताया प्रकृतेः तस्य सोर्लोपः इत्यर्थे दोषप्रसंगादित्याशयः । प्रसिद्धस्यापमर्थस्य दुर्णाभिस्यादाव लंता तात प्रातिपदिकादिति व्याख्यानदर्शनात् ॥ = ४८ =

6 दोषस्यति । वस्तुतः संयोगांतस्य लोपात् । हल्ङ्याब्भ्यादि लोपादिति तत्र तु मल्लस्वरस्यापि विरुद्धं । अन्यथा चक्षतद्ध्युपक्रमाद्यपरितोष मस्ते च । अतएव
हलंत्यसूत्रे अन्योन्याश्रयोद्धारार्थं अंत्यस्य करस्य संज्ञायां लक्ष्योऽलि त्वे स्वरार्थं क्रियमाणं ज्ञापकमिति प्रक्रमस्य न तु लवकारः अव लार्थ
एवेत्याशंक्य अपृक्तं हल्ङिति हल्ङ्याब्भ्यो हल्ग्रहणं ल्व्यावर्तयेक्रियमाणं लक्लोपस्य कर्तां ज्ञापयतीति वक्ष्यति । तस्यायमाशयः । येनेत्यादौ
डादेशे हल्ङ्याब्भ्यो हल्ग्रहणस्य व्यावर्त्यं न संभवति । सुतिसीति प्रत्ययैः प्रकृते राक्षेपे ल्हलंताया प्रकृतेः परेषां स्वादीनां लोपः न च डादेशं प्र
तिताम्संताप्रकृतिरिति । एवं चेहापि वृक्षसूरित्यस्य प्रकृतित्वाभावात् कथं हल्ङ्याब्भ्यादिलोपः । अस्ति सिचो यक्कृद्धिसकारवकोनिर्देशाद्
तिप्रकृतत्वं यथोपि दुक्क्व्या स्वायामनुकूप[illegible]ता व । न च वस्तु कर्ती त्या संयोगांतलोपः तथापि तस्यासिद्धत्वाद्रोरुत्वं दुर्लभमिति
चेन्न । संयोगांतलोपो रोरुत्वे इति वार्तिकेनासिद्धत्वनिषेधात् । हदिवोमेदिनंत्वेत्यादिवत् । सिचोपकृद्ध्विति प्रकृतनिर्देशाए
व च वार्तिकोक्तार्थज्ञापकोबोद्धव्यः । अथवा अस्तु व्यत्तिकारो रूपएव संयोगांतस्य लोप इति सूत्रस्यार्थः । अंतेन्महलं तु प्रत्येकं संयो
गसंज्ञेति पक्षे संयोगावंतौ पस्यति द्विलावगातयेस्तु । संयोगसंज्ञासूत्रे भाष्ये पर्यायस्तथैवाभिधानात् । प्रकृते तु मा स्तु सं
योगांतलोपः । किंतु द्वयोः सकारयोः रुत्वेकृते अतोरो रित्यनेन एकएवउकारो भविष्यति । विधेयविशेषणस्य एकत्वस्य पश्येकत्ववद्वि
वक्षितत्वात् । रोरिति जातिपरनिर्देशेन अतः परत्वस्य पूर्वत्वस्य च संभवात् । जातिपरत्वे प्रकृतनिर्देश एवप्रमाणमस्तु । न च परत्वा
द्द्विचेति प्रथमस्यैव रोरुःस्यादिति वाच्यं । रुत्वस्यासिद्धतया हश्यर परत्वाभावात् । न चाश्रयासिद्धत्वमिति वाच्यं । स्थान्यंशे तथात्वे
पि निमित्तीभूतहशंशे तदसंभवात् । एषएव च द्विसकारनिर्देशं वदतो भाष्यकारस्याशयः न तु संयोगांतलोप इति । अतएव वृद्धवि

(२ वस्तुतस्तु नलं इति वचनं तस्य स्वेत्यपकृष्यते तत्सामर्थ्यात्संयोगान्तस्य पदत्वाभावेऽपि लोपः स्यादुः २)

देति सूत्रे शुषः कृइत्यादिवत् योगविभागेनास्य नकारस्य कथमनुवृत्तिरिति ॥१॥ अथ अन्यतरस्यां न ध्यांख्येति संहितापाठेन नकारान्तरप्रश्लेषइ
त्युक्तं भाष्ये । हलोयमामिति लोपइति हितस्याशयः । पूर्वोक्तरीत्या तु संयोगान्तलोपेनैवासिद्धे संहितापाठपर्यन्तं नोपन्यस्येत् । संहितायां म
पि हि हलोयमामिति लोपस्य बहिरंगत्वेन त्रिपादीस्थत्वाभ्यामसिद्धत्वात्संयोगान्तलोपेनैव भाव्यं संयोगान्तलोपे यत्नः प्रतिषेधः न वा झलो लो
पात् । बहिरंगलक्षणत्वादिति वार्तिकोक्तपक्षत्रये प्रथमचरमयोः तस्य दुर्वारत्वात् । तस्मात्समुदाये प्रत्येकं वा संयोगसंज्ञेति पक्षद्वयानु
रोधेन इह समाधानद्वयं व्यवस्थितमिति भाष्यार्थः । पूर्वोक्तरीत्या सिचइति समाहारमाश्रित्य तदुपरि सूत्रइति छेद इति पक्षे तु अस्ति
महल्ग्रहणव्याख्यानपरतया पीदं भाष्यं योजयितुं शक्यमिति दिक् । एतेन संयोगान्तस्य लोप इति सूत्रे अन्तग्रहणं शक्यमकर्तुमिति प
दमंजरी प्रत्युक्ता । पक्षद्वयेपि प्रयोजनस्योक्तत्वात् । विधमानं यत्सिच इतिपक्षे वा योज्यो । यत्तु सिचः परत्वादीटि प्राप्ते आगहि
श्रुवोरीट्प्रतिषेध इति वार्तिकबलान्निषेध इति केचिदुक्तं । तन्न । तस्य दोषद्वयस्तुपक्रमात् स्थानिवद्भावप्रतिषेध [illegible] परे एतदुक्त
वार्तिकेन तावत्तः परत्वमुपजीव्य प्रवृत्तस्येटो निवृत्तावपि सिचः प्रयुक्तस्यानिवार्यत्वात् । अस्थादगादित्यादावनुक्तदोषतादवस्थ्याच्च ।
तस्मात्तत्रागुक्तेष्वेवान्यतमः पन्थाः । श्रा रक्षणमित्यत्रेव [illegible] कुना । व्याद्धश्लेषिद्भुतत्व प्रतिषेध इडिधिश्चेति वार्तिकान्तरं । अस्यार्थः । हते त्वुलि
कृते बहुलं तत्स्यन्नवपक्षगाज्जि वक्ष्यमाणिदाघ्यर्थमिति वार्तिकेन संज्ञाछंदसोर्वध आदेशः स च हलंत इति मत्वादिड्डिषापाद्यते । हन
स्तो वधलो इति तद्वारश्च । तयोः कर्तव्ययोः स्थानिवद्भावः प्रतिषेध्यः । तथा आवधिषीष्टेत्यादौ स्थानिवद्भावेनांगतया एकाचइ

तीण्निषेधः प्राप्तः। तस्मिन्नप्रवृत्ते स्थानिवद्भावेनांगता नेति वाच्यं। तदेतदिड्विधिश्चेत्यनेनार्थादुक्तं। एतदपि भाष्ये प्रत्याख्यातं। तथा हि। वध्यादेश
स्तावददंतः। अन्यथा अवधीदित्यत्रातो हलादेरिति वृद्धिप्रसंगात्। एतच्च उत्तरसूत्रे भाष्ये स्पष्टं। वध इति तु नायं लुङ्। किं तु हनो वध
श्चेत्यौणादिकसूत्रेणाप्कुन्प्रत्ययः। तथा चेह वृद्धितत्वयोः प्रसंग एव नास्ति। आवधिषीष्टेत्यादाविलङ्विषयेऽपि न भवति। वध्यादेशो आघुङ्दाननिपा धो३
तनसामर्थ्यात्। न चैवं सति लिङि नते नयदावधिषीष्टेत्यादौ प्रत्ययस्वरो बाध्येतेति वाच्यं। आर्धधातुकीयानामादेशानां प्रत्ययविवक्षामात्रे
ण प्रवृत्तस्य प्रत्ययस्वरस्यैव सति शिष्टत्वादिति। स्यादेतत्। इड्विधिश्चेत्यंशो पूर्वपक्षत्वं विशिथिलः। तथा हि। उपदेशोऽनुदात्तादिति निषिध्यतो
नेच वधिस्तथा। स्थानिवद्भावेनायं तथेति चेन्न। अल्विधौ स्थानिवद्भावविरहात्। सत्यं। नेह स्थानिवद्भावं ब्रूमः। किंतु हंसुपदेश एव वधे
रुपदेशः। कृञुपदेशादिव कृतः कर्तुं मिस्यादौ कृषिसादीनां। स्थानिवद्भावस्तु अंगसंज्ञार्थं न त्वतद्धर्मुक्तमेव। न चैवमपि प्रीहरक्षयोऽ
संगत एव। यदि हि प्रागेव प्रसंग्यासत्तेर्वधादेशोऽभ्युपगतः स्यात् तर्हि वधभावात् सीयुटि चिण्वद्भावो विप्रतिषेधेनेति स्यसिच्सूत्रीयं वार्त्ति
कं विरुध्यते। अंतरंगबहिरंगयोर्विप्रतिषेधायोगात्। तथा च कर्मणि सीयुटि वधिषीष्टेत्येकमेव रूपं स्यात्। इष्यते तु घानिषीष्टेति द्वि
तीयमपि। अत्रोच्यते। वार्त्तिकमते आर्धधातुक इत्यस्य विषयसप्तमीत्वे पि लिङ्लुङीत्यादीनां परसप्तमीत्वाभ्युपगमेन न विप्रतिषेधः संभ
वत्येव। अत एवेहाघुङ्दाननिपातनासंभवादिड्विधिश्चेत्युपसंख्यानं। भाष्यकारास्तु अयमाशयः। आर्धधातुक इति विलिङ्लिङ् इत्यादेर
पि विषयसप्तम्येव। तथा चाघुङ्दाननिपातनेनैवोपपत्तौ इड्विधिश्चेति न कर्तव्यमेव। घानिषीष्टेति कथं सिध्येदिति परमेव शिष्यते। तत्रे
दमुत्तरं। प्रतिपदविधेर्बलीयस्त्वाच्चिण्वद्भाव इति। एतच्चास्यति च सूत्रे कैयटेन स्पष्टमुक्तं। तस्माद्वार्तिकमते विप्रतिषेधाच्चिण्वद्भाव

= यदावधिषीष्टेत्यादौ सतिशिष्टे न तेन प्रत्ययस्वरस्य बाधः संभवतीत्यादिति भावः।१३=

= भानर्थक्यमुपपादयति । अंतरंगत्वात्प्राप्ति = ५ = इ सेवरूपं स्यादिति । तथाहंते: स्त्रीपुरी संशं विनापि वधे: स्त्रीपुंस्यार्थ आतुंक स्येतीटापि सिध्यतीत्येतदंशस्यानर्थक्यापत्ता तत्सामर्थ्यादंतरंगस्यापि वधादेशस्य बाध इति शंकाशयः = ६ =

प्रवः। भाष्यमते तु प्रतिपदोक्तत्वादिति विवेकः। एतेन एकाच उपदेश इति सूत्रे प्यार्थधातुकीयाः सामान्येन भवंतीत्यादि भाष्यं यथाव्याख्याताः।
प तु तत्रैकैपदेनोक्तं विप्रतिषेधे उपपत्तिश्चिंत्येति तन्तु प्रागुक्तोपपत्तिरेव स्मर्तव्येत्येवं परं। स्यादेतत्। प्रतिपदविधित्वमिह किंचिन्न क्षितं।
अनवकाशत्वं वा साक्षादुपादानमात्रं वा। नाद्यः। स्यसिचूस्त्रेह नू न्महलस्य प्रचारितिस्यतद्दस्यादौ लब्धावकाशत्वात्। तत्रत्यस्य सं, पूर्
महलस्य तु काशिवीषे स्यादेकतार्थत्वात्। न च अजंतादौ नां च तु र्थ स्यादि च तुष्कसंबंधे अस्य चरितत्वाच्य यथासंख्या भावेहंते: स्त्रीपुरी
तियोंशस्तस्यानर्थक्यमेव। अंतरंगत्वा द्विवधभावे कृते तत्स्यस्थानिवत्वे नहंतिं स्नहणा स्त्रीपुटिचि त्वविदिति कृते णत्वे ऽपाविषय ङितिपूर्वविप्र स्नहलोन ५
प्रतिषेधे नात्रोपेप्रतिवधि पीष्टे सेवरूपं स्यादिति वाच्यं। अंतरंगेण वधिना पहारेण्याप्यसति असंभवादेव हंते: स्त्रीपुटा समं संबंधायोगा
त्। संभवे व्यभिचारे च स्यादिशेषणमनर्थवदिति न्यायात्। अतएव भस्याढ इति सूत्रे भातः स्थानइत्येतत् स्वशब्दस्यैव विशेषणं न तु भस्था
दीनामिति वक्ष्यते। तथा नित्ये स्त्रीऽस्ती विकल्पो त्रिस्पत्र स्त्रीऽपां तच्चोऽसंभवादेव नैव तदन्वय इति वक्ष्यते। नांत्यः। वधादेशोपिह नो वध
लिङीति साक्षादुपादानस्याविशिष्टत्वात्। अंतरंगत्वस्याधिकत्वाच्चेति चेत्। अत्रोच्यते। चित्वविदित्वेति चकारस्यानुक्तसमुच्चयार्थत्वेन
व्याख्यानाद्धंतेरपि परस्य स्त्रीपुरश्चिणवद्भावो विधीयते। तस्य चानर्थकत्वमेव प्रतिपदविधित्वं। अनुक्तसमुच्चयार्थत्वं चास्य भाष्यका
रेणैव वक्ष्यते। चं भगवानिति कृतवांस्तु तदर्थमिति। अतएव हि आ भात्सूत्रप्रत्याख्यानपक्षे कृते पीढि लोपः सिध्यतीति। सूत्रारंभे परं दूत्वा
सिद्धत्वेन मेलुप्यते लिङिति वक्ष्यमाणं बोध्यं। यद्वा लिङीति सामान्यं। स्त्रीपुरीति विशेषः। हंतेरित्युभयत्राविशिष्टं। तथा चापवादत्वमे
व। चिण्वदिट इति नास्य संभवः। येनहंतिः स्त्रीपुटानांन्वियान्। तथा चक्कै पदोक्तं प्रतिपदविधित्वमपि सम्यगेव। पुनश्चैतत्। यदिह संभवे

= कारिष्यतद्दस्यादौ लि। लोप सिद्ध्ये च कारस्यानुक्त समुच्चयार्थत्वं । हरवेलोक्तं भाष्य कृता नत्संगच्छता यात् अतीपि। ७ = चं भगवानिति। चं भगवान्कृतवांस्तु तदर्थं तेन भवेददिलोपश्चिन्निवर्तितिरिति तत्रोक्तं। अतत्र वहति।

४ स्तर्हि येनाप्यसंभवि नो विधानायोगेन प्राप्तुं कपक्षस्य दुर्बलत्वात् । अथवा वक्ष्यमाणनिष्कर्षरीत्यांतरंगां वङी पदस्य स्यामित्यं बहिरंगमित्यनेन प्रत्याख्या
नात्तस्य चकृतित्वात्गयहतो नानित्यत्वात् कृष्णानुरोधेन हत्यागापुंस्त्वे विप्रतिषेधः । अथ कालिङ्गाति परस्सप्तम्यो वास्तु । परत्वा आनिलवदिद् । आघुदन्त
निपातनं तु मास्तु । न चैवं वधिषीष्ट स्यन्द्र इति निषेधापत्तिः कृतेस्यादाविवेति वाच्यं । वधेर्हि हन्त्युपदेशो ऽहस्त्युपदेशो वध्युपदेशश्चेत्येकाच इति सूत्रे भाष्य
एव स्पष्टं । तथा च वध्युपदेशे ऽनेकाच्त्वादिण्निषेधो न भविष्यति । एकेति विशेषणसामर्थ्याद्धि अनेकाचो ऽपदेशो व्यावर्त्यते । ननु च
हन्त्युपदेशे ऽजन्तस्यैव स्यात् । नैवं । पचादीनामनुदात्तत्वस्यैव पर्य्यापत्तेः । अत एवकत्वविवक्षया अच इत्यस्य एकौच तद्धतः इत्यर्थे लब्धे एकग्रहण पो ५
सामर्थ्यादुक्तार्थलाभः । न च यत्रैकाज्ग्रहणमिति परिभाषाप्रवृत्तये एकग्रहणमिति युक्तं । धातुविशेषणतादस्य एकाच इत्यर्थमेवाश्रित्य प
रिभाषाप्रवृत्तेः सुवचत्वात् । न चैवं मिहेव विशेषणसामर्थ्यमेवेक्षिता । श्रुपेत्यादि परिभाषाज्ञापकत्वं न स्यादिति वाच्यं । श्रीङः सार्वधातुकेगु
णः दीङो युड् वीत्यादि सानुबंधनिर्देशानामेव तज्ज्ञापकत्वसंभवात् । तदेवं सर्वथापि वधेः परस्येडस्त्येवेति स्थितं । अत एवानिट्कारि
कासु व्याघ्रभूतिना अदंतपर्युदासः कृतः । अदंतमदंतमत्तोवदेङ्कर्आविस्यादिना । यत्तु कौमुद्यां भावकर्मणः कारस्युत्पादनावसरे द्या
निषिध्येत्युदाहृत्य पक्षे वधादेशस्त्वं तत्र कैरीत्या भाष्यमते वार्तिकमते वा उभयथापि निर्बाधमेव । एवं स्थिते पक्षे वधादेश इति प्रतीक
मुपादाय यदुक्तं तुमिति ऽतं तद्विरुद्धं । भाष्यादौ वधादेशानभ्युपगमादित्येव दन्तमसारस्कारः प्रस्तुतस्यैवकण्ठकमाविष्कृतोत् । यदपि ते नस्त
रीपभ्रमवीजभूतं वार्तिकमुदाहृतं हनिलिङ्गादेशप्रतिषेधश्चेति नैतल्लिङि प्राप्तस्य निषेधपरं किंतु स्यादिष्वपि स्वितवदिसतिदेशे न प्रा
मस्य । अत एव अंगाधिकारादंगस्यैवातिदेशो न तु हलिलिङादेशानां अनंगत्वादिति अंगाधिकारबलेनैव भाष्येत वार्तिकं प्रत्याख्यातं च
ययेतास्सिद्धं तत्र वधे ष्वाविनादमेव तथाप्यंधस्येवांधलग्नस्येति न्यायेन प्रसादतां यं दृष्ट्वा बालामामास्येपुरिसेतदर्थमस्माभिः स्फुटीकृतं ॥

मकृतमनुसराम: । आकारांतान्नुक् पुक् प्रतिषेधः । ओऽदेशेऽभावं न भावयितुं हि ओपै ल प्रतिषेधः । यादेशे स्यंत प्रतिषेधः । ओमूर्विधौ च । स्व
रे चवस्वादेशे । एतान्यपि पंच वार्तिकानि प्रत्याख्यातानि । तथा हि । विंज्ञापयति भाष्य वती स्य च नुक्पुको न भविष्यतः । ओई औई इति ईकारप्रश्लेषात् ।
ह्रस्वप्रश्लेषाद्वा । तथा श्रिष्टा तृह ताता श्रिंता त कुरु ता त स्नातद इस त्र परत्वात्तातङ् कृते धूा हो । हं ते ज्र्तः । कुक्षन्त्व्यो हेर्धिः । उतश्च प्रत्ययाद
संयोगपूर्वात् । ध्व मेरेडु विस्येते विधयो यद्यपि प्राप्नुवंति । तातङः स्थानिवद्भावे नाहि न्वह लो नन्वहलान्तः । तथापि सकृद्गतौ विप्रतिषेधे य
द्बाधितं तद्बाधितमेवेति न्यायान्न भवंति । एवं पुष्णीतादि सत्र हलः श्नः शानज्झौ इति न भवति उभयोर्निसपोः परत्वात्तातङः प्रवृत्तेः । तथा तिसृ
णामपि सत्र परत्वात् निसृभावे न बाधितत्वे स्वरूपमिति त्र यादेशोपि बाधित एव । एवं च तस्यास्थि ष्टी सत्र परे णा च तसृभावेन चतुरनडुहोरित्याम्
बाध्यते । तथा अशान्सं त्वा विदुषी सस्मिन् हन् निस त्र विदेः शतुर्वसुरि ति वस्वादेश स्य शात्वन्नह लो नन्वहलाछ तुरनुमो नपजादी इत्यस्य
त्रैलोक्ये तो क्षा नातद् शा त्रे ता तृ परत्वमुपजीव्य प्राप्तं न पाउदात्तत्वं यस्मै वं विदुषो ज्ञिहोत्रं जुहूति इ सत्र विदुष इति षष्ठ्या उदात्तत्वं च न भवति अतुम
इति निषेधात् । तथा हि । अविपमा न उमूय स्येति वृकुश्री हिः उमू इति च समनाथातस्तुकारात्प्रभृति भानुमो मकारात् प्रत्याहारः । तनादि कृञ्म
भ्य इ सुकारात्प्रभृति का । तत्र च वसुः संप्रसारणं चांतर्भूतं । न चैवं ह्रीतीयपक्षे नुनतां अध्वार्वं प्रथमाजानती गादि साद विपि निषेधापत्तिः ।
तनादि कृञ्भ्य इ सु पक्षे भाव स्य प्रस्यापि त अंत भर्भावादिति चेत् न । तद्वि प ह्र भावप्रवृत्तावपि शतुरनुमू त्वान पायात् । नुमागमान ह लाम
से पि हि शतु रे व तद्धाहि संविशेषणत्वेन तु शत्रंतस्य । मुंचतां मुंचते इत्या दाव पि निषेधापत्तेः । इदं तु वार्तिकं सिद्धांते पि स्थितं । गोः पूर्वणित्वा
ल स्वरेषु प्रतिषेध इति । चित्रगवा गभिस्तत्र हि सर्वत्र विभाषा गोरिति पूर्वस्वरं प्राप्तं । नांतः पादमिति पाठस्य इको गुणवृद्धी इति सूत्रे भाष्ये च

9 स्थितत्वेन तद्भावात्सा सर्वत्रेति स्वरस्यापि पूर्वरूपविधायकत्वौचित्यात् । कैयटस्तु भाष्ये ऽस्मिन्सूत्रे ह्रस्वश्चेति चकारेण प्रकृतस्येत्स्यनुकृष्यत इति दर्शनात् प्रकृष्टान्तःपाद
मित्यपाठमनुसृत्य वार्तिकस्यैव पूर्वपदं तस्यापि पूर्ववत्प्रकृतिभावो ऽवङ्पक्षेऽपि इति सूचितवान् । न च सर्वत्र विभाषेत्यत्र एङः इत्यनुवर्त्य अवङि विधित्वान्निषेधः
स्यात् । हे चित्र गो अग्रमित्यत्र एवमप्यतिप्रसंगात् । न ह्यत्र स्थान्यत्र आश्रयणं । स्वतन्त्र एव तत्र ऽन्तत्वात् । चित्रगुरित्यत्र गोतोणिदिति णित्वं प्राप्तं । चित्र
गुश्चित्रगव इत्यत्र तु आ गो तो म्नूश्शसोरिति षाष्ठवार्तिकेन सा भात्वं प्राप्तं । अत्र लिङ्गत्वाल्लिङ्गविशिष्टग्रहणं शब्दस्य भवतु । गोत इति तपरकरणसामर्थ्याद्देवलिङ्गलो
लोपवतेः । औतो म्शसोरिति पाठस्यैव स्थापयिष्यमाणत्वाच्च । अपि च नवमि स्यादावतिप्रसंगस्य भूयसा साहचर्येणापि वारणसंभवात् । स्वर । बहुगुमान् इह
इहस्वनुड्भ्यां म तु बिसुदात्तेनापानगोश्वन्निति निषेधः प्राप्तः । तस्मात्तैः पूर्वस्वरयोरिति पठनीयमिति स्थितं । एवं च न गोश्वन्निति सूत्रेऽपि तौ पूर्वस
च्यते बहुगुना बहुगुभ्यामित्यादावन्तोदात्तादुत्तरपदादन्यतरस्यामिति प्राप्तः प्रतिषिध्यते । तच्चिन्त्यं । भाष्यवार्तिकविरुद्धत्वात् ॥ अचः परस्मिन्पूर्ववि
धौ । परनिमित्तोऽच आदेशः स्थानिवत्स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य तस्माद्विधौ कर्तव्ये । बभूव । इह ऊरदित्सत्त्वस्य स्थानिव
द्भावेन संप्रसारण इति निषेधाद्वकारस्य न संप्रसारणं । न च पूर्वसूत्रेण गतार्थता । अ[illegible]लिविधित्वात् । न च परग्रहणं निमित्तत्वं म सिद्धमिति वाच्यं ।
अंगाक्षिप्तप्रत्ययनिमित्तकत्वात् । न च प्राग्भ्यासविकारेभ्योंऽगाधिकार इति वाच्यं । आ सप्तमाध्यायसमाप्तेरिति पक्षस्य सिद्धान्तयिष्यमाणत्वा
त् । पूर्वस्माद्विधौ यथा । तन्वन्ति । तन्वते । इह यणादेशस्य स्थानिवद्भावान्नेट् । तत्र हि तद्दूष्यं गं निमित्तं । नस्य उकारात्पूर्वमिति । अचः इति किं । विश्नः ।
प्रश्नः । धूत्वा । स्यूत्वा । अभिगम्य । तथा हि । विश्नः प्रश्न इत्यत्र छकारस्य शकारः परनिमित्तकः । तस्य स्थानिवद्भावात् छ्वेति तुक्प्राप्तः अच इति
वचनान्न भवति । स्यादेतत् । इहान्तरंगत्वात्पूर्वमेव तुक् भाव्यं । न च वार्णादांगं बलीय इति शकारः स्यादिति वाच्यं । यत्र ह्येकमेव निमित्तं रूपयुग
पदांगवार्णयोः प्राप्तिस्तत्र वार्णादांगं बलीयः । यथा करोतेर्लिटि णलि कृ अ इति स्थिते गोदित्यत्र सावकाशगुणमचो ञ्णितीति वृद्धिं बाधित्वान्तरंग

५= सिद्धान्तयिष्यमाणत्वादिति । न च प्राग्भ्यासविकारेभ्योंऽगाधिकारे एव भ्यासेन प्रत्ययाक्षेपो भविष्यतीति वाच्यं । अभ्याससंज्ञैव वाच्यत प्राच्छि टिपरेयेह तयोः पूर्वस्य ऋत उदित्सर्थेषत्वस्य परनिमित्तत्वानुपपादनात् - स ... स्थषष्ठीत्वेन तद्विषये स्मिन्तस्य ये ह्रुत्स्यर्थेन परनिमित्तस्य रूपपादत्वा थं -५=

= निर्विषयतापत्तिरिति • इयतुरियायेसादौ सर्वत्रैव सवर्णपरत्वेनेयङ् प्रवृत्तेर्वक्तुमशक्यत्वान्न सूत्रस्य निर्विषयत्वादिति भावः = ५ = तदिति • असवर्णग्रहणमित्यर्थः । = ७ सामर्थ्यादिति • असवर्णग्रहणसामर्थ्यादित्यर्थः । = ८ = नातिप्रसंग इति • असवर्णे = ॥
= तस्यां न स्यादपवादो यङ्वर्णस्तस्य यङि • सर्वाश्रयणाद् बाधादनं = ११ =

णां तत्प्रासंग्यत्वं वृद्धिरेव बाधते । प्रश्लिष्टसूत्रे कुर्वाणस्य नइति भिन्नं । तुल्यस्तु छः । भिन्नकालानामनयोः प्राप्तिः । ननु यत्रैव स्मिन्नविषये युगपदप्राप्तिस्तत्रैवेयं प
रिभाषेत्यत्र किं प्रमाणमिति चेत् । धर्मिग्राहकमेवेति गृहाण । तथाहि । अभ्यासस्यासवर्णे इति सूत्रे असवर्णग्रहणमस्याः परिभाषाया ज्ञापकं । एतच्च
३ षष्ठे प्रथमाह्निकांते भाष्ये स्थितं । न हि इयतुः इयतुरित्यादिवारणाय तदुपयुज्यते । अंतरंगत्वात् सवर्णदीर्घत्वं तत्रैव यङुवङोर्बाधात् । तौ हि अंगसंज्ञामपेक्ष्य
समसंज्ञं चापेक्षमाणत्वाद् बहिरंगौ । न चैवमप्यपवादत्वात्तावेव स्यातामिति वाच्यं । येन नाप्राप्तिन्यायेन तयोर्गुणं प्रत्येवापवादत्वात् । न च विषये सादौ प्रव
र्तस्यापि गुणस्य इयङ्पायेयत्र प्रवृत्तौ पाश्चात् इइ हुवं चक्रे चीति रूपातिदेशेनापहारित्वेन कृते सवर्णदीर्घस्यापि प्राप्त्या सोऽपि येन नाप्राप्तिन्यायेन तद्
यङुवङ्भ्यां बाध्येतेति चेत् । तर्हि कृतेऽप्यसवर्णग्रहणे निर्विषयतापत्तिः । असवर्णग्रहणसामर्थ्यात्तु पुनर्गुणं द्विः सवर्णदीर्घं बाधित्वा स्यातामिति
चेत्तन्न । इयतुरित्यादौ चरितार्थत्वात् । नन्वेवं सति असवर्णग्रहणं विनापि येन नाप्राप्तिन्यायेन इयङ् तौ इति परत्वाद् बाधने सिद्धे तन्न कुर्यादिति चेत् । तर्हि
सामर्थ्यादियेषसादौ गुणादिप्रवृत्तिरिति फलितोऽर्थः । तथा च पुनरपि असवर्णग्रहणं व्यर्थमेव । अतैवेत्ति सूत्रस्य वाच्यो इति चानुवर्त्य अते इत्यस्य
स्य ज्ञापकादियङ्विधेये अभ्यासस्येयुक्तिः सामर्थ्येनापि इयेषसादेः सुसाधत्वात् । नन्वतेदितिभिन्नानिर्देशो ऽस्य परत्वेन इयङ्लुकोः परङ्
न स्यादिति चेत् । तर्हि दिसेवोच्यतां । इलोपतिर्तिसाह चर्याश्च धातुग्रहणं भविष्यति । अंगेन तु विशेषणलाघवं । तेन अत्तारमतिक्रांते रससत्व
१८ मिति स्यादौ नातिप्रसंगः । नन्वेवमपि इयेषेसत्रैई इयतुरित्यत्रापि इयङ् स्यादिति चेन्न । अंतरंगेण दीर्घेण बाधस्य युक्तत्वात् । न चैवमियेषे
सत्रापि तुल्यमिति वाच्यं । तत्र गुणसंभावनायां विना भवेन्मुखेन निमित्तेन दीर्घप्रवर्तनात् । वक्ष्यते हि समर्थानां प्रथमादिति सूत्रे समर्थग्र
हणमकृतव्यूहाः पाणिनीया इति परिभाषां ज्ञापयतीति । अत एव सौऽस्थितिर्वैक्षमाणिरित्यत्र भाविन्या आदिवृद्ध्या अंतरंगस्यापि सवर्णदी
र्घस्यानिमित्तविघाताद् प्रवृत्तिर्माभूदिति साधु स्थितिर्वायीक्षमाणिरित्यत्र निरूपं कार्यितुं समर्थग्रहणं । परिनिष्ठितत्वं च तत्र समर्थग्र

= तुल्यमिति • एवं चाभ्यासस्येत्यंशस्य पुनर्वैयर्थ्यमित्याशयः । दीर्घप्रवर्तनादिति • तथा चाभ्यासस्येत्यंशस्तत्र सार्थकोऽसवर्णे इति त्वनर्थकमिति भावः । न चैवं सत्यभ्यासग्रहणसामर्थ्येनेयेषेस्यादेः सुसाधत्वं पूर्वमुक्तमसंगतं स्यान्नः
= दीर्घप्रवृत्तेर्न्यायप्राप्तत्वात्तत्संहितापि प्रवृत्तौ व्यर्थं सदभ्यासग्रहणं ज्ञापकमिति युक्तत्वादिति वाच्यं • अभ्यासग्रहणसामर्थ्येन दृश्यसंभावनामादाय प्राप्यकृतव्यूहपरिभाषाप्रवर्तते तदुक्तस्यार्थस्यैव ज्ञापनोचित्यात् • असवर्णग्रहणं तु
= स्येव वार्णादंगं बलीय इति परिभाषाज्ञापकत्वपरभाष्यात् • अन्यथाभ्यासस्येत्यंशस्य तत्र दृश्यसंभावनामादाय प्राप्यकृतव्यूहपरिभाषाप्रवर्तते तदाऽसवर्णग्रहणस्य ज्ञापकत्वासंभवः

=विधेया सेति-चेन्न दीर्घविधेः स्थानिवद्भावस्यापि संग्रह इति बोध्यं। ग्रेपादिकं स्येन सवर्णदीर्घादि विधेः स्त्रग्रहणमितिमतं सर्वमेव समाधानं। किंच। यदि कृते गुणे स्थानिवत्वेनैव ये षे स्यात्तो सवर्णदीर्घस्य निमित्तं विनाशो भूस्वं न स्यात् तो ऽन्तरवूहपरि-
=भाषाया अप्रवृत्त्या सवर्णदीर्घे सत्यभ्यासस्येयुषः पुनर्व्यर्थः सन् स्थानिवत्त्वाप्रवृत्तिमविज्ञापयति। तत्र सामान्यापेक्षमभ्यासस्य कार्ये तद्‌गुणे कृते इदेशस्येत्यत्र यप्रतिबंधकीभूतं स्थानिवत्त्वं सेनेति। अन्तरवूहमीत्यादौ यत्वादे=
=श्च स्यस्थानिवत्त्वादभ्यासस्य कुर्तो पद इति दीर्घो दुर्लभ इत्यपास्तं। अपित्वित्यादिस्तन्नतु स्थानिवत्वेनेयङ् भवत्येव। स्थानिवत्त्वस्याभ्यासकार्यप्रतिबंधकत्वाभावादित्याहुः ॥ ५ ॥

10 दस्यार्थः। कृतमपि निवर्तयतीति ज्ञापयतां ए[illegible]लं तुल्यमेव। ओत्सर्वं परमधिकमिति दिक्। तत्र श्रेयेषेस्या[illegible]दो गुणे कृते सवर्णदीर्घप्राप्तौ यणि प्राप्ते तस्ये
येयङ् पवादः। ईयतुरित्यादावंतरंगत्वात्सवर्णदीर्घेण बाध्यत इति असवर्णग्रहणमनर्थकं सत् ज्ञापकमेवोक्तपरिभाषायाः। ननु गुणेन कथं
निमित्तविघातः। अचः परस्मिन्निति स्थानिवत्त्वेन सवर्णदीर्घप्राप्तिस्तदवस्थैवेति चेन्न। दीर्घस्य पूर्वपरविधित्वेन तस्मिन् कर्तव्ये स्थानिवत्त्वा
भावात्। पूर्वस्येव विधौ सः। ननु पूर्वपरयोरिति विधिग्रहणव्यावर्त्यनिरूपणं बसरे उपपादयिष्यमाणत्वात्। सवर्णयोर्विधिः सोपि सवर्ण
विधिरिति तत्र कर्तव्ये न परं तेतिनिषेधाच्च। तेनासवर्णग्रहणं कृते स्थानिवत्त्वेनेयेषे सत्येयङ् न स्यात्। नत्वासवर्णग्रहणसामर्थ्या
च्छ्रौतासवर्णमाश्रित्येयङ् प्रवर्ततां। श्रुतीतिप्रबलत्वादिति वाच्यं। तथा सति परिभाषा ज्ञापनासंभवात्। इयर्तीत्येकप्रयोजनाय हि उभे
तिवक्तव्येऽभ्यासस्येति वचनसामर्थ्यादिवं तावियङ् वडौलालीनां तु सिद्धे दीर्घमविशेषात् ज्ञापयतामिति तद्वा। अथवा सवर्णग्रहणस्य चरिता
र्थत्वादितिप्रत्युक्तं। सवर्णे परे न भवतीति प्रसज्यप्रतिषेधाश्रयणेन तत्र चोक्तरीत्या स्थानिवद्भावे प्रतिसिद्धेः ईये षेस्यादेर्यणएव प्राप्त्या तद
पवादत्वेन निर्णीतयोरियङ्‌वङोरंतरंगेण दीर्घेण ईयतुरित्यादौ बाधसंभवात्। सा च ज्ञाप्यमानानसमानाश्रये युगपत्प्राप्तौ चेत्सेवं कृपवि
शेषविषये बलवत्त्वानुरोधेनेतिप्राचांभावः। अत एव स्योन इति सिवेरौणादिके नप्रत्यये वकारोपधपवादे उठि च कृते सिउ न इति स्थिते तत्र रंग
त्वाद्यणः। न त्वांगोस्युपधागुणः। व्याश्रयत्वात्। न चोठं वाधित्वा परत्वाल्लघूपधगुणः शंक्यः। ऊठं प्रत्यभिन्नलक्षणामुपधामंगं चापेक्षमाण
स्य गुणस्य बहूपेक्षत्वेन बहिरंगत्वात्। एतच्च येन विधिरिति सूत्रे कैयटे स्पष्टं। वस्तुतस्तु एकादेशोच्चेनं। प्रकृतमनुसरामः। उरु कसीसत्तुवि कृते
शादेशः। तथा च विश्वप्रश्नयोस्तुक् श्रूयते वेति तन्निवृत्तौ यत्नांतरमास्थेयं। अच इत्यस्य प्रत्युदाहरणं तरं चेति चेत्। सत्यं। अस्त्वेन यत्नां

६ =सवर्णेपर इति। तथा चासवर्णग्रहणसामर्थ्यात् श्रौतासवर्णमाश्रित्येयङ् प्रवर्ततामिति मंथोनि मार्गं अद्य नत्वेति परिभाषाज्ञापकत्वंन विरुध्यत इति भावः। कथं तर्हि विजेसा दायियङ् प्रवर्तितः स्थानि

= पघमात्वं नस्यान्नहि लोपः स्यादिति ज्ञापनायेत्यर्थः =३

तरं। ष्णोरिति सनुबन्धनिर्देशस्य पाष्ठ भाष्यादौ स्थितत्वात्। स्यादेतत् अकृतव्यूहाः पाणिनीयाः कृतं वा निवर्तयन्तीति परिभाषाभ्यां [illegible]भयोः
सिद्धौ किं सनुबन्धनिर्देशेन। न चोक्तपरिभाषयोरनित्यत्वज्ञापनं तत्फलं। तेन च व्याहृवायितेति सिद्धं। अन्यथा यश्च्यह लड् इति भाविनं ङो यमाङो
कृतं वा निवर्त्येत ३ च्यप्रागेवात्वं न क्रियेत। लक्ष्णूत् पितृक्योति भवकानिस्मादौ चावव्यून श्रूयेतेति वाच्यं। अदोजग्धिर्ल्यप्पूर्वग्रहणस्य प्रस्थयोत्तरपदयोरि इतिसूत्रे ३
ति सूत्रे उत्तरपदग्रहणस्य च क्रमेण ल्यप्पूर्वकोरन्तरङ्गबाधकताज्ञापनार्थतया सिद्धत्वे तदन्यथेति सिद्धं स्यैव तत्परिभाषाद्वयानित्य
त्वज्ञापकत्वसंभवात्। अथ निर्युक्तिकं सिद्धान्तप्रवादेन श्रद्धेयः। ल्यबुत्तरपदग्रहणयोरसामर्थ्यव्यर्थत्वात्। अकृतव्यूहपरिभाषावशा
दप्राप्तस्य प्रवृत्त्यादिति चेन्नहि मा भूत् ल्यबुत्तरपदग्रहाभ्यामपि अकृतव्यूहपरिभाषाया अनित्यत्वे प्रकृतिप्रत्यापत्तिवचसा त्वज्ञापकत्वसंभवात्। मा
नुवातदपिक्लैः सोपि लोपः स्यादिति निर्देशाभावेन ज्ञापकत्वात्। तथा हि कइसउ इति द्वन्द्वे तोः पदान्तरप्रयुक्ते यलग्देशे कृते आकुलस्य निमित्त
विघातादकृतव्यूहा इति न्यायेन गुणत्वेन स्यात्। न चासिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषाभ्यां निस्तारः। वक्ष्य इदमित्याद्दोकृते पिदेः
र्देशनिमित्तविघातेन तत्र पचावेदमित्यादौ च सावकाशयोर्द्वयोरपि परिभाषयोर्येन नाप्राप्तिन्यायेनाकृतव्यूहपरिभाषाबाध्यत्वात्। अन्य
ङु थापे● षो जग्गुणइत्याद्यपि न सिध्येत्। एवं हि विप्रहत्यत्र गुणं निषेद्धुं क्रियमाणं नङोरिङित्वमेवाकृतव्यूहपरिभाषां ज्ञापयतु। समर्थानामिति
च मास्तु। अत एव समर्थः पदविधिरिति सूत्रेऽकर्तव्यं च क्रियते समर्थानां प्रथमादिति भाष्यं संगच्छते तस्मात् प्रत्यापत्तिसामर्थ्यं ल्यबुत्तर
पदग्रहः। सनुबन्धत्वं चपं चापि न कार्यमित्यवशिष्यते। अत्रोच्यते। वार्णादाङ्गमिति परिभाषाया अनित्यत्वं ज्ञापयितुं सनुबन्धग्रहः। तथा हि स
मानाश्रयेइति प्राचां संख्यानानुरूप्यमाणुक्तं न तु क्षोदक्षमं। व्याश्रयेष्वपि बहुधा तत्स्वीकारात्। तथा च कैयटेनासिद्धवत्सूत्रेऽस्मिन्नस्यत्र वार्णा

= नङोरिङित्वमेवेति। सनुबन्धनिर्देशस्याभावे शेले हि यदि विभ्रइत्यादौ तुक् स्यान्नङोरिङित्वं व्यर्थमेव स्यादिति तज्ज्ञापकमिति भावः =४

=क्ष्मारीति । आदितः प्रत्ययस्थात् अप्यस्त आदेश उपदेशे इत्यादि म्नह: =३

दांगस्य वृद्धीयस्मात् तत्पूर्वैकादेशो वा धित्वोऽल्लोपश्च ऽनकः । न च तत्रोभयोरकृतांशोऽस्मानाश्रयत्वं न क्ष्येते इति वाच्यं । विश्व: स्थो नइ यत्रापि छकारे कारां
शस्यास्येनन्वाश्रयत्वोपन्यासविरोधात् । किंच अंगस्य आद्धीनघो: शतिङो कृद् अचः परस्मिन्नु यं नवि धिः उपेधिका न वा शब्दानु: आर
ऽ आदीनां । अगादेपूर्वते यस्य अदस्स औस्तु लोपश्च । सार्वधातुकमपित् । उपसर्गात् सुनोति । स्तुकर्मोरनात्मनेपदनिमित्त इत्यादि सूत्रेषु दे
म दृह्रदत्तादि सर्वकृत्ग्रन्थाः समानाश्रयता धृत्विदाहृदयधृविदनादसप्रवन्नाद इति स्पष्टमेव लिङ्गं तपरिभूश न शात्तिनां । यासु भाष्ये प्र
थमाहितं कांतेवा ल्लोदांगमितिपरिभाषाया: प्रयोजनान्यपि व्याश्रयसाधारणान्येव । न माङ् योग इति सूत्रस्य कैयटग्रंथो प्येवमेव (आतो
नुपसर्गे कः इति सूत्रे प्येवमेव) तस्मादुहिरं अपरिभाषाकृतव्यूहपरिपाचयोरिव वा ल्लोदांगमिति संख्या अपि अनित्यत्वमेव शादं तं । तथ्यसतु धू
म्रहणेन ज्ञाप्यते । न च परस्मिन्न पूर्वविधाविति स्थानिवद्भावे न तु वंचारयितुं सः । अन्यार्थतया वश्यकृतस्येनाचइत्यस्यैव गतार्थत्वात् । एवं
चान्यार्थं प्रत्ययग्रहणं सतुकं ग्रहणं अकृतव्यूहा इत्यस्याप्यनित्यतां कामं ज्ञापयतु । प्रकृतसूत्रे विभ इति प्रसुक्ताहरणं तु यथाश्रुतशीसा । ए
वं स्थिते नङोऽडिल्लस्यस्तु लनि षेधे च चरितार्थत्वाद् कृतव्यूहपरिभाषायां ज्ञापकांतरमास्थेयं । तथ्यस्तु प [illegible] वचनं उत्तरपदग्रहणं सम
र्थग्रहणं वा तेश्योल्पुत्राल्पवूम्न लोहे मेवेति तु निष्कर्ष: । आँचारधिवं तार्थं प्रत्ययग्रहणं तवममादिवाध्यँ नार्थं मँप्राप्तविधार्थंचोत्तरप
दग्रहणमिति हि स्थास्यति । मपर्यंतानुवृत्तिरेव सापिक्षेति हरदत्तोपेक्षा तु अंतरंगस्यापवादवाध्यत्वाद्युक्तेति समनमेवक्ष्यते । एवं च
पामाघंतर्गण सूत्रेविषाणि त्सुमरपदलोपश्चाकृतसंधेर्दिस्स आकृतसंधिग्रहणमप्यनावश्यकं । वीक्ष्समालगदि म्यः कृतसंधिग्ध्य ए
वेतद्धितादृतिस्पष्टीकरणार्थं वास्तु । एवं च स्त्रियाः पुंवदिति सूत्रेन [illegible] देषा परिभाषा सर्वत्राश्रीयत इति कैयट: समीचीन एव ।

=आचारधिवं तार्थमिति । लमिवा चरतित्वदति मरतिइत्यादौहि प्रातिपदिकादेव क्विपि लमावेक वचनइति विभक्तिपरत्वाभावा भयाप्रायुंवं तिलदारम: सतिप्रत्ययग्रहलेऽसि ध्यंति । वाधनार्थमिति । मपर्यंतस्येत्यनुवृत्ताविदं । तदनत्
=र्थोत्तवममादीनां स्थितनिर्णलेन युष्मद स्मत्वात् अनेनादेशविधानेऽप्राप्तविध्यार्थमिति विवेक: । लमावेक वचन इत्यत्र मपर्यंतानुवृत्ते स्त्वदमादेरिति भाव: । =५ = मपर्यंतानुवृत्तिरेवेति । सर्वादेश लाभायम
=पर्यंतस्येत्यवश्यानुवर्त्यं । तथापर्यंतग्रहणं आदेशाः स्थुस्तर्हित्र त्यवोत्तरपर्यंत दयोर्मपर्यं ... मिति तदाशय: =३ = मपर्यंतानुवृत्तिरेवेत्येव कारेण सर्वादेश लाभाय तवं
=ममादय: स्थानिनिमित्त स्वार्थमनुवर्तनीया: तवादीनां प्रमेग इत्यर्थं सिद्धं मपर्यंतानुवृत्ति ... तमित्यादि ... तत्र तवाद्यनुवृत्ति सहिता मपर्यंतानुवृत्ति ... पिके तिवेयटो ... परंग

आभात्त्वग्रस्य कैयटस्तु । निमित्तापायपरिभाषा भाष्यासंमते सेवं रूपे आपाततः । धुवोः धकृतस्येनहीदं वचनं नापि न्यायद्दृसेवं रूपो हृदत्तग्रंथोप्यापातत
एव । समर्थानामितिसूत्रे परिभाषापरिष्कारस्य त्वयमेव कृतत्वात् । अथवा उरूपपरिभाषयोर्मध्ये कृतवृहत्परिभाषेवं लोपवादादनर्थक्यान नतु
कृतमपीति गौरवादिस्येवं परतया कथंचिद्रूथो नेयः । फलं तु निर्विवादं । लोपकार्यं तत्र लाभमपि सुलभत्वात् । तद्यथा । चाविति सूत्रं दीर्घं विदध
द्धिहस्वापवादं । अंतरंगे हि यत्तिकृते प्रतीनद्र्सादेकं धंदीर्घस्य विषयलाभः । औकिवन्यायोपीह सुवचः । लोके हि निमित्तमुभयविधमपि दृष्टं ।
कार्यस्य स्थितौ नियामकं । तदनियामकं च । आद्यं यथा । न्यायनयेऽपेक्षाबुद्धिः । तन्नाशेन द्वित्वनाशाभ्युपगमात् । तथा वेदांतनये प्रारब्धस्य
विक्षेपस्थितिनियामकत्वं । उपाधेः स्फटिके लौहित्यादिस्थितिनियामकत्वं च प्रसिद्धमेव । द्वितीयं तु दंडादि । तन्नाशे घटनाशादर्शनात् । ए
वं स्थिते लक्ष्यानुरोधेनेहापि द्वैविध्यं कल्पनं भवेत् । तथा च यस्य च लक्षणं तदेव निमित्तं विहन्यते नास्ताव निसद्दृस्स्य धकचिक्ताश्रयणं धचि
ने सेवं रूपे सिद्धांते लौकिकद्विविधव्यवहार उपष्टंभकत्वेनोदाहृतः । कैयटादिभिः 'वालिसुग्रीवयोर्युध्यमानयोर्भगवता वालिनि हते पिन
सुग्रीवस्य वालिनः प्राबल्यं व्यवहरंति । भगवत्सहायैः पांडवैर्दुर्योधने हतेपि पांडवानां प्राबल्यं व्यवहरंति चेत्यादि दिक् । स्यादेतत् । यदिदुत्वोरिति स
ंध्यक्षरनिर्देशात्सहितरालृतोपेतस्यैवानुवृत्तिः स्यात् । तथा च हृः हरेकुरदृस्य त्रलोपो न स्यात् । विंतुधत्वात् । न चानुवृत्तिसामर्थ्यात्तुबंधविनै
वतत्र ग्रहणतां । साधो हिंसायामित्यत्रातइत्यनुवृत्तेपि अवर्णेद्ववेति वाच्यं । वकारमात्रान्वयस्यापि सुवचत्वात् । यत्तु सतुधकवितु चौहृ
वपरिहृतिनिर्दिश्यते इति तन्न । समाहारद्वंद्वे एकवचनापत्तेः । इतरेतरयोगे बहुवचनापत्तेः । धकारयोः समाहारे समासंकत्वावकारे तरेत
रेतरयोगद्वंद्वे करिष्याम इति चेन्न । समाहारे टच्प्रसंगात् । यथासंख्यासंभवापत्तेश्च । अत्रोच्यते । धकारवकारयोः समाहारद्वं

= योगेति । एवं चादिशब्दरूपसमुदायकार्यनिवृत्तावपि आदेशावयवानिमित्तको यणादुर्वारइति भावः = ५

१२ हेतुत्वेधकारान्तरस्य द्व्यन्तरमस्तु । आदेशे विशदृश्यप्रश्लेषः । तथा चान्तरतम्याद्यथासंख्यन्यायाश्रयेण सिद्धं । अस्तु वा सतुर्थो निर्देशः । शाल्मोपेनुस्साम सैन २
र्थ्यात्तत्केवलस्यान्वयः । नध्याख्येति नत्वं निषेधाल्लिङ्गात् । मूर्तद्वस्य तेहि छुःलोपविना नत्वप्राप्तिरेव न संभवति । एवं मृत्सौ घनः द्वं वं मरुर्ति स्पर्श
योश्यः द्व्यादिनिर्देशात् अपि संग्राह्यं तद्वृत्तिदिक् । अस्मिन्पक्षे अचइत्यस्य प्रत्युदाहरणं तु घत्वात् स्मृत्वेति । अत्र द्वतः स्थानिवत्त्वाद्यणेन स्या
त् । ननु स्वाश्रयमत्वं भविष्यति । अतिदेशान्तं स्वाश्रयकार्यानिवर्तकत्वादिति चेन्न । विधिग्रहणप्रयोजनकथनावसरे द्वस्तु स्वा
श्रयकार्यनिवर्तकः सिद्धान्तयिष्यमाणत्वात् । नन्वेवमपि योऽत्र यणो विधावाश्रीयते अचूनात्स्याद्वादेशः । यश्चादेशः द्वतिसमु
दायः नासौ यणो विधौ निमित्तमितिचेन्न । अनुबन्धानामनेकान्ततया लक्षणतत्वेष्वप्युद्दितस्वरावयाउकारस्यैवादेशत्वात् ।
वतिनिर्देशादभावो घ्यतिदिश्यतद्वृत्तिवक्ष्यमाणत्वाच्च । एवमभिगास्येत्यपि प्रत्युदाहरणं । अत्र हि अनुनासिकलोपः परनिमित्तकः ।
तस्य स्थानिवत्त्वात् हस्वस्यपिति कृतीति तुङ् न प्राप्नोति । अथ परस्मिन्निति किमर्थं युवजानिः । अत्राकारायाता निङः स्थानिवत्त्व
वात् यलोपो न प्राप्नोति । स्वाश्रयनिवर्तनिरभावातिदेशश्चवक्ष्यतद्वृत्तिहुः कमेव । किं च याम्प्रत्येव पादावस्याप्रपात् । पादस्य
लोपोह स्वादिभ्यद्वस्य परनिमित्तकोलोपः । न तोगर्गादित्वाद्यञ् । वैयाघ्रपद्यः । लोपस्य स्थानिवत्त्वात्पादः पदितिपद्भावो
न स्यादिति । वचनसामर्थ्याद्भविष्यतीति चेत् पादे नेत्यादावतिप्रसंगः । किं च पादश्चातस्ये तिलोपवचनसामर्थ्यात् स्थानिवत्त्व
वाप्रसक्तौ सत्यां द्विपदिके स्यादौ पद्भाववचनं चरितार्थमिति ध तस्य सामर्थ्यं । परस्मिन्निति कृते तु वैयाघ्रपद्य इत्यादौ पद्भाव
स्य चरितार्थतया पादेनेत्यादावेकादेशस्य स्थानिवत्त्वात् पद्भावो नेति स्थितं । नन्वेकादेशो नाचः किं त्वचोः । तत्कथं स्थानिव

चात्वे सतीति । एवं देविकाशिंशपाद्याधायादित्वे च सतीति द्रष्टव्यं =३

त्वमिति चेन्न । वर्णनिर्देशे जातिग्रहणात् । अत एव श्रायसौ गोमतौ चातुरौ आनडुहौ इत्यादि सिध्यति । श्रेयस्त्वापस्यमित्यत्र । देविकाशिंशपादित्यवा
इ्दीर्घसत्रश्रेयसामित्याकारादेशः । तत्र चतुर्थ्योप्यणि ते य्य औ प्रत्यये एकादेशस्यादिवत्त्वात्प्राप्तो नुमागमो न भवति । तथा दुध्वाहे उदक
यहतीति किम् एणयम् । संज्ञायामुदभावः । ततोऽत्रैकादेशस्यादिवत्त्वात् भत्वे सति प्राप्तौ वाह ऊठ् न भवति । पूर्वविधाविति किम् । नैधेयः ।
निपूर्वाद्धाञ उपसर्गे घोः किः आतो लोपः । ढ्रच इतश्चानिञ इति ढक् । आकारलोपस्य स्थानिवत्त्वे तु सति यकारव्यपदेशेन ढकत्वं विरुध्
येत । न हि त्रिपुत्रोऽद्विपुत्रव्यपदेशं लभते । नन्वेवमपि विधिग्रहणं मास्तु । पूर्वस्येति षष्ठ्या कार्ये कर्तव्ये इत्यस्याक्षेपेणाभ्युपगत्वात् इति
चेन्न । पूर्वस्य विधिः पूर्वस्माद्विधिरिति समासद्वयलाभार्थं विधिग्रहणात् । पंचमीसमासे उदाहरणं तु तन्वतीसुकमेव । स्यादेत
त् । यदि पंचमीसमासोपीष्टस्तर्हि विगणय्येत्यादि न सिध्यति । ल्यपि लघुपूर्वादित्ययादेशे कर्तव्येऽल्लोपस्य स्थानिवत्त्वात् । नचा
रंभसामर्थ्यं । अनुगमय्येत्यादौ चरितार्थत्वात् । अत्रोच्यते । पूर्वस्माद्विधौ स्थानिवत्त्वमनित्यं । निष्ठायां सेटीति ज्ञापकात् । त
था हि । तत्र सेटीति पदं न तावदनिड्व्यावृत्त्यर्थं । लिडंतासंभवात् । ननु संज्ञपितः पशुरित्यत्र यस्य विभाषेतीण्निषेधः संभवत्ये
व । सनीवन्तर्धेति विकल्पितेट्कत्वादिति चेन्न । यस्य विभाषेत्यत्रैकाच इत्यनुवृत्तेः । अन्यथा दरिद्रितः इतीण् न स्यात् । तस्मादेकाच्त्वे
धारणार्थं सेड्ग्रहणं । इडित्कृते णिलोपो न तु ततः प्रागिति । अन्यथा कारितमित्यादौ णिलोपे कृते एकाजुपदेशात् इतीण्निषेधः स्यादि
ति सेटीति वदतो भावः । पूर्वस्माद्विधौ स्थानिवत्त्वे तु न प्राप्नोत्येवनिषेधः । णिचा व्यवधानात् । तस्मात्सेड्ग्रहणमनित्यतां ज्ञापयतीति स्थितं ।
तथा चाष्टमे अंत इति सूत्रे हरदत्तः । अनित्यः पूर्वस्माद्विधौ स्थानिवद्भावः । निष्ठायां सेटीति सूत्रे सेड्ग्रहणात् । एतच्च स्थानिवद्भावप्रकरण

चाणिपतिदरिद्रातिभ्यः सन्यद्रक्षितिविकल्पितेट्कत्वादितिभावः =४

= सामर्थ्यादिति । अपि च इत्यादि सेव वक्ष्ये येन व्यवधानमिति न्याय्यानुगमव्येत्याद्येव व्यवायेसिद्धस्यार्थः । ननु तर्हि इत्यादि इतिन्यासे विगलत्येयादान लोपस्य स्थानिवत्त्वेन साक्षात्पदयोः परत्व संभवे येन नाव्यवधानमिति याचे न प्रवर्तेत इति चेन्न = अन्तरमेव लघु मुपाश्रित्य तत्र परस्य तोरयादेशस्य वर्णमात्र स्यात्वात् । स्थानिवत्त्वाद् च रईत्वा निमित्तलेनाश्रितास्य रस्य विधौ कर्तव्य इत्यर्थस्य व्यवस्थापि विषय प्राप्तत्वात् । अन्यथा हे गौ दिस ■ सिद्ध्यापन्ने हि सहाय: = ४

एवं व्याख्यातमिति । यद्यपीह प्रकरणे स्वयं न व्याख्यातं । तथापि न्यासकारादिभिर्व्याख्यातमिति तद्ग्रंथस्यार्थः । लेखक प्रमादात् ग्रंथभ्रंशो वाक्यनीयः । एतेन ओः पुयण्जीति सूत्रे यदत्र वक्तव्यं तत् द्विर्वचनेचीति सूत्रे वोक्तमिति सविस्तरं तद्ग्रंथो व्याख्यातः । तथा न स्वकाचूसूत्रेक्षे यदुक्तः । पूर्वस्मादपि विधाविति तदनित्यमिति । माधवाचार्यास्तु पदे द्व्यग्रहण तद्व्यत्ता सिद्धता मुद्व्याश्रयत्वोत्तपविहस्य पूर्वस्मादपीति स्थानिवत्त्वमाश्रीयते भिन्नस्य प्रस्तुतप्रत्ययस्यादि माध्योदाहरणे न बलेन समादधुः । यथा । अपि लुपुपूर्वादिसने न सामर्थ्यादन्यपदार्थस्य वर्णस्यापेक्षायां वर्णग्रहणे ऊ इति ग्रहणे व्यवधानेपि न दोष इति । केचित्तु पंचमीसमासस्य हि मातुप्रयोजनाभावात् । तथाहि । वेभिदिता मा थितिकः । अपि पचन्निति प्रयोजनत्रयं भाष्ये उक्तं । तत्र वेभिदितेत्यितानदन्यथा सिद्धं । एकाचः उपदेश इत्यत्र विहित विशेषणत्वाश्रयणात् सामथितिकः पिमथितं पण्यमस्येति विग्रहे तदस्य पण्यमिति ठकि तस्येकादेशे यस्येति लोपे कृते दूसुमुत्क्तादिति वादेशो न भविष्यति अनः विधाविति निषेधेन स्थानिवद्भावासंभवात् । ठस्येक इत्यत्र स्थान्यादेशौ ठकारस्य उ आर ग्रहणार्थतया वर्णमात्रस्य स्थानि॰॰ त्वात् । अन्तु वा स्थान्यादेशयो रकारस्य विवक्षा । न चैवमनल्विधिरित्यत्र कादेशप्रसंगः संनिपातपरिभाषया समाधानात् । न चापीपचन्निति सूदाहरणं । इह हि अंतेरकारस्य चङः कारस्य चातो गुणे इति पररूपत्वेत स्य पदं प्रत्यादि वर्णनात् ऊ ग्रहणे न ग्रहणे सति भिन्न व्यवस्तेतेषु सूत्रापत्तः । तिलोपस्यैकादेशस्य नास्थानिवद्भावात्र भवतीति वाच्यं । वेर्हि लव्येवान्तरत्वेहि सं भवतीति तत्स्याह चर्यादर्भ्यस्ताद पि लङ् एतन्दूषेषु व्रविधानात् । न च मिथास्याह चर्यादभ्यस्तादपि ॰॰॰ नुजोपिन्नहणस्य स्थितिवाच्यं । विप्रतिषेधे परमिति परत्वाह चर्यस्य बलीयस्त्वादिति । अत एव भवतेर्यङ्लुगंतालुङि अबोभूवन्निति माधवः । पंचमी समास प्रयोजनतया अपीपचन्निसुदाहरतो भगवतस्तु नेहस्याह चर्य नियामकतया संमतं । कस्थोर्यग्रहणादिष्टापकात्स्याह चर्येन सर्वत्राश्रीयत इसुसूदीधीवेवी टामिति सूत्रे । तस्माद्यङ्लुकि मुकोलुङि

= वलीयस्त्वादिति । अत एव नुदविते देवत्रौदीमाह चर्यादि धादिकस्य विदेर्विहितं विभाषा गमहनविद विशामिति सत्रा विधिरिति सत्याह चर्या औदारिकस्येति वदंति । उभेऽभ्यस्तमिति सत्रस्य भाष्य संमते = मसे सिषमि सत्यात्मुदोतु पूर्वे गमत्स्याह चर्या द्भवरूपादेशानपह ॰॰॰ मनिष्कर्षः = ३

ङसेर्वोचितः। आत इति नियमस्य ङसि च परत्वमाश्रित्य योऽनुसृष्टा समस्तमात्रपरतया भाष्ये नैवोक्तत्वाद् व्यक्ता अपस्यानुमो दुर्निरत्वात्। यदि तु
ऽपवादात इति नियमः सामान्यापेक्षः तदानुस्मभावेऽदव्यस्तादिस्यात्। तथा चाबोभ्युरबोभवदिति पक्षभेदेन रूपं लभ्यते। नित्यत्वेन तु कोगुणेन बा
धकत्वात्। भाष्ये वोदाहृतमबोभूवन्निति तु चिंत्यमेव। अंत्यादेशस्य दुर्लभत्वात्। अपि पचन्नित्येतत्सिद्धये पंचमी समासआश्रयणीयः। विग
णव्येसादावतिप्रसंगस्य तु पूर्वोक्तारणेवोद्धाराः स्मर्तव्या इति पुनः पंथाः। ननु पंचमीमाश्रित्य तेन वदतो मते तन्वंतीस्यत्रे दूस्यादिति कुतो नोक्ता समासो ४
वितमिति चेन्न। बहिरंगस्य यणः सिद्धत्वात्। न च नाजानंतर्य इति निषेधः। आनंतर्ये कार्यविधौ यत्र च आनंतर्यमिति केयटेनाभ्युपगमात्। कथं
तर्हि तन्वंतीति पंचमी समासोदाहरणं प्राग्दत्तमिति चेत्। हरदत्तमते नेत्यवेहि। न हि यत्रांतरंगे बहिरंगे वा अचोरानंतर्यमि[illegible]व्याख्यातः। न तिध
न्वेवं नपदांतसूत्रे दध्यत्रेत्यत्र निमुपादाय स्थानिवद्भावप्रतिषेधसामर्थ्यात् बहिरंगपरिभाषा न प्रवर्तत इति मिश्रोक्तिर्विरुध्यते। बहिरंगे
यणि अचोराश्रयत्वेन नाजानंतर्य इति निषेधादेव परिभाषाया अप्रवृत्तेः। किं च संयोगांतस्य लोप इति सूत्रे असिद्धं बहिरंगमिति परिभा
षामाश्रित्य क्रियमाणं यणः प्रतिषेध इति वार्तिकस्य प्रत्याख्यानमपि विरुध्येत। अपि च लोहितसूत्रे उरणमपरह इति परे लोपे क्षेत्रे
स्यत्रेफद्वयं श्रूयेत सुतं तदपि विरुध्येत। रोरीति लोपसंभवात्। असिद्धपरिभाषाया श्रौत्रीस्यानिषेधात्। किं च नधातुलोप इति सू
त्रे प्रेद्धमित्यत्रस्य भाष्येण संयोगांतस्येत्यत्र यण इत्यस्य प्रत्याख्यानं भाष्येणापि विरोधः। किं च तत्रैव इत्यत्र पचावेदमित्याद्यानतिप्रसं
गमाश्रयस्य बहिरंगतया स्वकृतं समाधानमपि भज्येतेति दिक्। तस्माद्धरदत्तकृता व्याख्या पूर्वापरस्वग्रंथेन भाष्येण च विरुद्धेति चेत् सत्यं।
अत एवेमां व्याख्यां न धातुलोपसूत्रे एवानुपादेयामवोचाम। केचित्तु इत्यादि ज्ञापकान्नाजानंतर्य इत्यस्यानित्यतामाश्रित्य वा कथंचित्सम
र्थनीयं। स्यादेतत्। कैयटमतेऽपि अचोरिति द्वित्वं विवक्षितं न वा। आद्ये मल्लभूतज्ञापकविरोधः। न हि कोसि च त्कोस्ये। सादावनंतरेषत्य

14 विधावचोराश्रयत्वात् । द्वितीये तु मूलभूतं ज्ञापकं संभवेत् । यदीयस्य नह लोपः पूर्वं स्यात् तर्हि तु परत्वात् [illegible] ति स्थितं । अथ पदेऽनह् लोपेऽह्लोपे वेति चेद् तर्हि एवं तु ना
म । अजानंतर्यं तु न गतमित्याशयः । तर्हि अस्तु कथं चित् ज्ञापकमित्याह । अयजइंद्र दक्षइंद्र [illegible] मित्यादौ परत्वात् सवर्णदीर्घस्तु दुर्वार एव । न ह्यत्रा
सिद्धं बहिरंगमिति प्राप्नोति नाजानंतर्यइति निषेधात् । न चैतत् रंगं बहिरंगवदिति परिभाषांतरेणैतोदोऽसिध्यति । तथा च विप्रतिषेधसूत्रेऽंतरंगं चे
सुपकृत्यइत्यत्र [illegible] द्विशीनामाद्युलः सवर्णदीर्घादिति प्रयोजनं पठितमिति चेन्न । न संपठितं । किंतु बहूनि प्रयोजनानि पठित्वाऽसिद्धं परि म ४
भाषैवेगतार्थत्वान्नेयं कर्तव्येत्युपसंहृतं । एतेन प्रकृतसूत्रे पठ्यमानं द्येत्युदाहरणं दूतो न प्रस्तावे असिद्धपरिभाषा भाष्यकारेणोदाहृता म
नरंगं बलीयइत्येतदुपलक्षणं तया व्याचक्षाणोऽपि कैयटः प्रत्युक्तः । विप्रतिषेध [illegible] सूत्रस्य भाष्यविरोधात् । तस्मादिह सिद्धं नतत्व मन्यदे
पा १ ववक्तव्यमिति उच्यते । अंतरंगपरिभाषाया अपवादत्वादसिद्धपरिभाषायास्तु नाजानंतर्यइति सापवादत्वादुभयोरावश्यकता । विप्रति
षेधसूत्रस्थं भाष्यं तु अभ्युच्चयपरमेवेति भावं [illegible] जिकारः । कैयटस्तु विवरणकारादयोप्येवं । इह द्विवरणकारास्तु नाजानंतर्यइति परि
भाषामास्तु तज्ज्ञापकतया यत्संभवं तेनासिद्धपरिभाषाया अनित्यत्वमेव ज्ञाप्यतइत्याहुः । अस्मिंश्च पक्षे विप्रतिषेधसूत्र [illegible] स्थं नाजानंतर्य
इति भाष्यमपि अनित्यत्वपरतया व्याख्यानेयं । अन्यथा तत्रैवांतरंगं बलीयइ [illegible] स्य प्रत्याख्यानं विरुध्येत । अतएव वृत्तौ नलोपः सुप्स्वरसंज्ञा
वत्रह भ्यामित्यत्र नलोपस्यासिद्धत्वात् दूर्घ्यस्येति तुक् नेत्युपक्रम्य संनिपातस्य बहिरंगपरिभाषाभ्यां गतार्थतामाशंक्य परिभाषाद्वयस्याप्य
नित्यतां ज्ञापयितुं तुग्ग्रहणमित्युक्तं । अतएव तत्रभित्रेरप्युक्तं । बहिरंगपरिभाषाया अनित्यत्वात् यासिस्रत्रबाहेरं [illegible] मपि स्यदाद्यत्वमंतरंगे
ऽपि नासिद्धमिति । तथा प्रतिदीव्ने सादि सिद्धे पयसिद्धपरिभाषाया अनित्यत्वं स्वीकृतं । अतएवाक्षद्यूरित्यत्र यलोपे कार्ये ऊठ् नासिद्ध इति दि
क् । एतदपवादो कृतव्यूहा इत्यादिः उत्सर्गापवादयोरपि अनित्यत्वे स्थिते लक्ष्यानुरोधाद् व्यवस्थाहेतुरिति सर्वं सुस्थं । स्यादेतत् । पूर्वस्ये

तिसंबंधसामान्ये षष्ठी । संबंधश्च बहुविधः । कार्यित्वेन निमित्तत्वेन वा । एवं च विधिग्रहणं विनैव समासद्वयस्य फलं लब्धं । विधिग्रहणे सत्यपि हि पूर्व
स्मान्निमित्तत्वेनाश्रितादिति व्याख्येयमेव । अन्यथा हे गौरित्यत्र गकारात्परस्य विधौ कर्तव्ये स्थानिवद्भावादेङ्ह्रस्वादिति संबुद्धिलोपः स्या
त् । सत्यं । विधिग्रहणं योगविभागार्थं । तेन पूर्वस्य विधौ स्थानिवद्भवेदिति नियमात्तत्राप्ययं व्यावर्त्यते । यद्वा मास्तु योगविभागः । विधि
ग्रहणसामर्थ्याद्विधिमात्रे स्थानिवद्भावो भविष्यति । शास्त्रीयेऽशास्त्रीये च । तेन परयतीत्यादौ वृद्ध्यभावो शास्त्रीयोऽपि सिध्यति । नन्वेवमपि पू
र्वसूत्रादेव विधिग्रहणमनुवर्तयिष्यते । सत्यं । पुनर्विधिग्रहणं तु द्वितीयो नियमः क्रियते । पूर्वस्यैव विधौ स्थानिवन्न तु पूर्वपरयोर्विधा
विति । तेन नद्यौ तु रिति सिध्यति । अन्यथा हि द्रुलो तु स्त्रि द्विर्वचनेचीति यणादेशस्य स्थानिरूपातिदेशाद्द्वित्वे कृते द्वित्वकाले यणोपहारा
त् पुनः प्रवृत्तिर्वेद्भ्रयेप्यायत्वेन वा गुणोदं गं बलीयः यद्वस्मिन्प्रवर्तेत तन्मात्राश्रयत्वेनान्तरंगत्वात्सवर्णदीर्घः स्यात् । न चाकृतव्यू
हा इति पाणिनीति वाच्यं । निमित्तविघाताभावात् । कृतेऽपि यणि स्थानिवत्त्वेन सवर्णदीर्घप्राप्तेः । ततश्च सवर्णदीर्घे कृते नादिवद्ध्ये स्तनेनाभ्यो
सग्रहणेन ग्रहात् अभ्यासह्रस्वत्वे दीर्घइणः किती ति दीर्घत्वे कृते दीर्घविधानसामर्थ्यादिणो यणभावे इयङ्गतुरिति स्यात् । सिद्धांते तु पूर्वप
रयोर्विधौ स्थानिवत्त्वाभावान्निमित्तविघातेनाकृतव्यूहपरिभाषये णो यणि सिद्धं रूपं । यद्वा । स्थानिवदिति वतिबलेनाभावोऽप्यतिदिश्य
ते । उत्तरसूत्रे द्विर्वचनादिग्रहणलिंगात् । विधिग्रहणं तु पूर्वस्यैव न तु पूर्वपरयोरिति तत्तदर्थमिति दिक् । इह स्थान्यादेशनिमित्तानां
त्रयाणां संनिधानाविशेषेऽपि स्थान्यपेक्षमेव पूर्वत्वं गृह्यते न तु आदेशापेक्षं निमित्तापेक्षं वा । वैयाकरणइत्यत्र आयादेशापत्तेः । तद्वक्तं । अचः
पूर्वत्वं किं स्थानादेशयोः सिद्धमिति । नन्वेवं समायेत्यत्र अयादेशप्रसंगः । लघूपधापादितिपूर्वविप्रतिषेधेन णिलोपे कृते ततः प्रत्ययलक्षणेन वृ

२ = वैयाकरणइत्यत्रेति । न चैतागमोऽयं स्यादिति विधेयस्ततः पूर्वस्य यकारस्यावयवइति यदागमाइति न्यायाधिकारग्रहणेन ग्रहणादेकारविशिष्टस्यादेशत्वेनादेशात्पूर्वस्यानकस्य चित्वेद्विधिः =
= भविता देशावयवस्येसादेशापेक्षया पूर्वत्वे प्याश्रीयमाणे न पक्षयइति [illegible] ति नार्थोऽपि तु पूर्वोच्चारणविषयाविरोधे त्वमन्तरपक्षे पर्यवसाना =
= दर्थोऽयेन लक्ष्यं कापरप्रभूतमन्तस्य भावः स्यैव मानत्वात् । एतेनामन्तरेऽयागशाश्वयजन्तस्यायसंयजत्त्वात् न स्यात् प्रातिपदिकस्याय वक्तव्यादिति हरदत्तोक्तिः प्रत्युक्ता । तादृशप्र =
= प्रयोगमस्य मानानुपलब्धादित्याहुः = २

अकारेऽपि पदवसानमात्र्याचोक्तिः स्थानिवद्भावोऽपि सिध्यतीति भावः = १

15 द्वौ सस्यामेकदेशविकृतस्यानन्यत्वाद् दिव्यहलो न स्याहलान्त । एवं घास्यादिसत्त्रवद्यादेशप्रसंगइति चेन्न । आदिष्टात्योरपि स्थानिवद्भावात् नादिष्टादचः पूर्वत्वात् । ननु स्थानिनः पूर्वत्वेपि आदेशस्य स्थानिमायातं न त्वनादिष्टादचः पूर्वत्वं नाम शाकल्यादिकार्यं यत् स्थानिवदादेश इति पूर्वसूत्रेणातिदिश्येतेति चेन्न । अनादिष्टादचः पूर्वत्वमुपजीव्याचः परस्मिन्निति शास्त्रप्रवर्तयितव्ये स्थानिवदादेश इत्यस्य प्रवृत्तिसंभवात् । तथा चाचः परस्मिन्निति सति देश एव शास्त्रीयं कार्यं तत्पूर्वसूत्रेणातिदिश्यतइति फलितोर्थः । अत एव नपदांतसूत्रे सवर्णग्रहणं कृतं । अन्यथा शसो रल्लोपे कृते पश्चाद्ध्वन्ननुस्वारेनानादिष्टः पूर्व इति तस्य विधौ स्थानिवद्भावविरहात् सवर्णग्रहणं व्यर्थं न स्यात् । नन्वेवं कृत्रिपवंड्डति रिति न सिध्यति । तथा हि वृड्ड्यते क्विपि अल्लोपयलोपयोः कृतयोरल्लोपस्य स्थानिवत्वेनोवङि कृते उकारस्यो नादिष्टादचः पूर्वस्य स्थाने जातस्योवङः स्थानिवदादेश इति स्थानिवद्भावेनानादिष्टादचः पूर्वत्वादचः परस्मिन्निति स्थानिवद्भावेनाकारेणव्यवाया
१७ द्भावेन स्थानिवत्वादेव ओ... इति शास्त्रोति । ननु यः स्थानिद्वारा पूर्व उवङ् न तस्य द्रूकस्य तर्हि वकारस्य यस्य च पूर्वं वकारस्य न सस्थानिद्वारा पूर्व इति तन्न । तत्सूत्रितिवत् कड्ड्सस्य कंड्वृड्डादेशात् । तस्य च कंड्ड् उड्ड्सादेशे कर्तव्ये स्थानिवद्भावावश्यंभावात् । उक्तं हि सर्वे सर्वपदादेशा इति । अन्यथा निरा घ्घास्यादिसादावपि स्थानिवद्भावा नापत्त्याम्... इति । अत्रोच्यते । अनादिष्टादचः पूर्वता यास्थानिद्वारकत्वमाविर्भूत । नपदांतसूत्रे कंड्ड्तिरिति भाष्योदाहरणात् । आतोनुपसर्गे क इति सूत्रेण विधौ सर्वत्र संप्रसारणे ओड् इति वार्तिकस्य न तत्र च दृष्ट भाष्यस्य च पर्यालोचनया प्यवगम्यते । तथा च तत्र भाष्यं । यो नादिष्टादचः पूर्वस्तत्कार्यं स्थानिवत्वं इति । स्थानिद्वारके तु पूर्वत्वे ... माले ... प्रघद्कृ एवासंगतः स्यादिति तत्रैव स्फुटीकरिष्यते । तत्र्यस्मिंकेपरस्त्वापातनेः । एतेन तित्रउ माचष्टे तितापयतेरितिहृदत्त अर्थोपि समर्थि

= यो नादिष्टादिति-तत्र हि सर्वत्र संप्रसारणे ओड् इति वार्तिके कृतेपि भाष्ये प्रह्व इत्यादौ वेपरत्वादातो लोपे संप्रसारणे च कृते उवङादेशः प्राप्त आकारलोपस्य स्थानिवत्वेन न भविष्यतीति = यत्नादेशे रूपसिद्धिरित्युक्तो न यो नादिष्टादचइत्यादि-तथा ... पुनरपि कृपासिद्धिः स्तदवस्थेति भावः =२= कंड्वृड्डिति-तेन = लुकारस्यापि स्थानिवत्वेनानादिष्टादचः पूर्वत्वमस्त्येवेत्याशंक्याशास्त्रीयत्वात्तत्रेत्युक्तं =१=

= परत्वाद् वृद्धिरिति । न च हि लोपो यो न तर अचः परस्मिन्निति स्थानिवद्भावे प्राप्ते तत्र च आप्यत एव ह्वस्वत्वं वृद्ध्याद्यात् कार्यं ति देशे लक्षणं तदेव तदालम्ब्य वृद्धिरिति नित्यत्वमिति वाच्यं । यतो नानेनाऽपूर्वं कार्यं विधीयते किंत्वन्यत्र सिद्धकार्यसंनिधानमनेन क्रि =
= भिन्नरूपकार्यव्यवहारणमनेन कार्यं तुल्ये संख्या स्ये सेवा तत्र च प्रतिवीप्सादोपरत्वाद्वृद्धिरिति भाष्ये उक्तं मिसा कुः = ४ =

नः । तत्राहि लोपादिलोपे कृते तस्य स्थानिवत्त्वादचो ञ्णितीति वृध्यभावे पि अतउपधाया इति वृद्धा वाकारे कृते तस्य स्थानिद्वारा उकारात् पूर्वत्वेन पु मृ विधा
पुकारलोपस्य स्थानिवत्त्वात् पुक् न प्राप्नोति । न च यस्य पूर्वं आकारान्तस्य नाप्नोपूर्वः यश्च पूर्व आकारो न तस्य पुगिति वाच्यं । एकदेशविकृतस्यान
न्यतया सर्वे सर्वपदादेशा इत्युक्तरीत्या चाकारान्तस्यापि पूर्वत्वानपायात् । तस्मात् स्थानिद्वारकं पूर्वत्वमनित्यमिति सेव हरदत्तस्य भ्रान्तिरिति । अत्र
वेचित् । तिता पयतीत्यसाधुरेव । तथाहि । तितं णिच् इति स्थिते टिलोप श्वप्राप्नोत्यतउपधाया इति वृद्धिश्च । उभयोर्नित्ययोः परत्वाद् वृ
द्धिः । ततष्टिलोपे कृते स्थानिवद्भावादचः पूर्वमादन्तं न तु स्थानिद्वारेति पुक् न प्राप्नोति । तस्मात् पुगपि लिलोपे कृते स्थानिवद्भावादे
शेतिताययतीति भवति । न च तिताणिच् इति स्थिते अंतरंगत्वाद् पुगोऽभ्याससादेशेतितयतीति स्यादिति वाच्यं । णपि हि पुगेऽसति वृद्धेर्वी
ति बाधेनाद्गुणस्य निमित्तविघातस्यासत्त्वमानतयाऽकृतव्यूहपरिभाषया पूर्वमंतरंगस्यापि आद्गुणस्या प्रवृत्तेः । अकृतव्यूहपरिभा
षाहेतरंगपरिभाषाया अपवाद इत्युक्तं । न च तथापि पुगस्याचः परस्मिन्निति स्थानिवत्त्वाद् आद्गुणस्य न निमित्तविघात इति वाच्यं । पू
र्वस्यैव विधौ स्थानिवद्भावो न तु पूर्वपरयोर्विधावित्युक्तत्वात् । तस्मात् तितायतीत्येव साधु । न तु तितयतितितापयतीति मा । चङि तु
तिताति णिचङ् इति पुक् इति स्थिते ततो णेरेङ् : सन्वल्लघुनीत्यादि णिलोपसहे ऽन्यासस्येति दीर्घत्वनिषेधे टिलोपस्य चङ्परनिर्ह्रासस्थानिवत्त्वनि
षेधात् ह्रस्वाभावे ह्रस्वे तो लोपे तस्य स्थानिवत्त्वादसिद्धत्वाद्वा भातो लोपाभावे दीर्घविधिं प्रति स्थानिवत्त्वनिषेधात् सवर्णदीर्घे इति तादि
ति भवति न त्वतितापदिति । अत्रेदं वक्तव्यं । परत्वाद् वृद्धिरिति संगतं । नित्यत्वेन टिलोपात् । न च वृद्धिर्नित्या । अचः परस्मिन्निति स्था
ति देशे न वृद्धिप्राप्त्यावविलक्षणं तदेव प्राप्नुवन्ननित्य इति न्यायेनानित्यत्वात् । एवं च हरदत्तोक्तिः सुष्ठ्वेव । किं तु अनित्यत्वेपि स्था
निद्वारकं पूर्वत्वमिह नेष्यते इत्यस्मिन्नर्थे प्रमाणं चिंत्यं । तदेवं स्थानिद्वारकं वास्तवं वा उभयथाप्यचः पूर्वत्वमिह गृह्यत इति स्थितं ।

= अनित्यत्वादिति । अयं भावः । अतिदेशनं तत्रान्निमित्तवैरूप्येपि तत्कार्यं साक्षादवाप्यते तच्च कार्यं विभिन्नया स्थाप्यं तत्स्वरूपनिर्णयस्य विधिशास्त्रमूलकत्वेन तद्देशेनैव परशास्त्रविहितत्वरूपं परत्वं =
= तेषां नोपमतः प्रतिवीप्सादोपरत्वाद्वृद्धिरिति न विरुध्यते । एतदेवाभिप्रेत्य [illegible] इत्यभिप्रायमाह इत्याकुः = २ = पूर्वपरयोर्विधौ स्थानिवत्त्वाप्रवृत्तेरुक्तत्वात् तयाऽमु =
= पगमवादोयं = ४

= गुणाद्यागमे परेति । यस्य मते स्थानिद्वारकं पूर्वत्वमाश्रित्यादिलोपस्य स्थानिवत्त्वात् सुड् नेति

16 विधीयत इति विधिरिति कर्मणि किप्रत्ययः । पूर्वस्येति शेषे षष्ठी । अनुवादे परिभाषानुपस्थानात् । गुणागागमे पि विधेये स्थानिवद्भावः । अत एव इत्यत्र तु
आदेश इति समभिव्याहारात् योग्यतावशात् स्थानिसंबन्धलाभः । षष्ठी स्थानेयोगेत्यतः पूर्वसूत्रे ऽनुवर्तितस्य स्थाने ग्रहणस्येहाप्यनुवृ
त्तेरेवेति प्रसिद्धः पन्थाः । न्यासकारस्तु निमित्तापेक्षमादेशापेक्षं वा पूर्वत्वमित्यपि पक्षो भाष्ये उपन्यस्तत्वात् स्वीचकार । वैयाकरणा दे
तु बहिरंगयोरैचोरसिद्धत्वान्न दोष इत्याह । इदं च नाजानन्तर्ये पदिभाषाया बहिरंगपरिभाषाया एकदेशा अनित्यतेति प्राग्गुरुमतमुपष्ट
म्भ समर्थनीयं । अस्मिन्पक्षे विधिरिति भावे क्तिः षष्ठी तु अनभिहितत्वात् कर्मणि । सापि सूत्रस्यमेव । किं तु निमित्तापेक्षया पूर्वत्वेऽस्य प
घत्वस्य स्थानिवत्त्वात् हृ ध्यायिन्त्यादौ दीर्घो न स्यात् । ईयतीति त्वस्य स्थानिवत्त्वादिगन्तलक्षणो गुणो न स्यादेवमिति । तथा गुण
रश्योः स्थानिवत्त्वाद् धुवनं लावक इत्यत्र वा गो न स्यातां । इयोरेकस्य देयमिति किरतौ ऽवने इत्यादि निर्देशो पष्टमेनानित्यता ऽयत्वं तु कि
ष्टमिति दिक् । पूर्वत्वं च नात्यन्तव्यवधानगर्भं किं तु व्यवहितसाधारणं । तस्मिन्निति निर्दिष्ट इति सूत्रे निर्दिष्टग्रहणलिङ्गात् । यङः पर
निर्ह्रासे निषेधारंभाच्च । तेन परस्यति अवधीदित्यादौ स्थानिवद्भावः सिध्यति । वधादेशो ऽदन्तः । स्यादेतत् । पटयतीत्यत्रान्तर्वर्तिनो विभ
क्तेः माश्रित्य पदत्वाज्जश्त्वं प्राप्नोति । न च स्थानिवद्भावः । जश्त्वविधौ तत्प्रतिषेधात् । सत्यं । कर्मसमर्पकात् प्रातिपदिकादेव णि ध
जुत्पत्तिर्न तु सुबन्तादिति वक्ष्यमाणत्वात् । सुबन्तात्मिति पक्षे पि दृष्टवदित्यतिदिष्टया भसंज्ञया पदसंज्ञाया बाधात् । पटुमिस्य
स्यैव हि भसंज्ञा प्रवर्तत इति कथं तत्र पदसंज्ञा प्रवर्तेत । तत्र चाप्रवर्तनात् कथं तत्र मेकदेशः विकृतेऽनन्यवत् । स्रग्विणमाचष्टे स्रजयती
त्यादौ हि प्रातिपदिकात् णिजुत्पत्तिरिति पक्षे ऽप्येषैव गतिरिति वक्ष्यामः । अवधीदित्युदाहरणं तु भाष्यमते आर्धधातुकीयाः सा

मान्येन भवंतीति पूर्वसूत्रे एवोपपादितत्वेनार्धधातुकोपदेशे यदकारांतं तस्यैवोपदेशिलोपसंभवात् । वार्तिकमते तु लिङीति पदसमभिव्या-
हृतं । तथा च अतूपदिष्टादाविना तोलोपो न प्राप्नोति । अतएव बहुलं तन एवायमादेश इति तन्मतं । वृद्धिस्तु न भवति । यथा देशे वृद्धि तस्य प्रतिषेध
इति पूर्वसूत्रस्य वार्तिकात् । एवमरब्दुकोब्कुम्वब्दुक इत्यादौ वेरप आपोन्यतरस्यामिति ह्रस्वस्य स्थानिवद्भावात् ह्रस्वांतेत्यात्पूर्वमिति
स्वकारादाकारस्योदात्तो न भवति । किंतु वकुपि पूर्वमित्युभयत्र पदांतोदात्तत्वमेव भवति । अचितीकः वकु चितीकः इत्यादौ तु चितेः कपीति
दीर्घस्य स्थानिवद्भावाचित्रभूषवेकारस्य उदात्तता भवति । नचोभयत्रापि स्वरविधौ न स्थानिवदिति निषेधः शंक्यः । लोपाजादेशमा-
त्रविषयः स इति वक्ष्यमाणत्वात् । एवं पञ्चाम्बद्येति वकुभिर्व्यक्तिभिन्ना वै कृदाहृतत्वात् मखाममिषिक्तमिति भाष्ये व्यवहृतमप्युदाह-
रणं साध्येव । अकृतव्यूहन्यायेन प्रथमं पूर्वयणादेशाद्योगात् । न चैवं कर्त्र्याहर्त्र्यैत्यादावुदात्तयणः इति विभक्तेरुदात्तत्वं न स्यादि-
ति वाच्यं । स्वरविधौ व्यंजने स्थानिवद्भावेन पूर्वयणमेवाश्रित्य तत्समाधानात् । न च पूर्वस्मादपि विधौ स्थानिवद्भावात्
व्यंजनस्यैव नेति वाच्यं । देकस्मादित्यादचः पूर्वत्वात् स्थानिद्वारकस्य पूर्वत्वस्यातिसत्वात् । निष्ठायां सेटीति सेड्ग्रहणेन पूर्वस्माद्विधौ स्था-
निवद्भावस्यानित्यत्वाच्च । तस्मान्मखाममिषिक्तमुदाहरणमिति पक्षो नातीव दुःष्यति । अंत एव ह्याश्रीयमाणयामेव प्रकृतौ स्था-
निवत्त्वमिति पक्षे भकुर्व्योशाभल्लुन्याशंप्यूग्रजन्याशंगाप्याशमित्यत्र अमेण ये चेत्युलोपईह न्वपोरितीत्वं ये विभाषा
इयोहतौ स्यात्वं च प्राप्नोतीति भाष्यवार्तिकयोरुक्तं । यत्तु अंतरंगे बलवदिति वा असिद्धपरिभाषया वा आश्रित्य पञ्चाम्बद्येतु-
दाहरणं निराकरणपरं भाष्यं तत्तु अकृतव्यूहवचसोऽनिसत्ताभिप्रायेण कथंचिन्नेयमिति दिक् ॥ न पदांतद्विर्वचनवरे

= अतएवेति । स्थानिवद्भुक्तमेवातिदिश्यते न त्वादेशप्रयुक्तं कार्यं तदितिपक्षे दूषणं: =८

पलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु ॥ पदांतादिषु विधीयमानेषु पूर्वेण प्राप्तः स्थानिवद्भावो न स्यात् । पदांते । कानि संति । कौस्तः । इह य
णादेशयोः कर्तव्ययोः श्नसोरल्लोपो न स्थानिवत् । न चानादिष्टादचः पूर्वत्वविरहादेव न स्थानिवदिति वाच्यं । वाक्यादपोद्धृत्य पदानि
संस्क्रियंते इति पक्षे ऽनादिष्टादचः पूर्वत्वस्य सत्त्वात् । नहि पदांतत्वं निरपेक्षमेव पदविभागं हिश्रास्रसं स्यादिति नियमः । पुष्प युष्पदपदयुक्ता
पनुपुश्नत्वे न स्या संगतिप्रसंगात् । एतच्चांगसंज्ञासूत्रे भाष्ये ध्वनितं । केवलपदांतस्या श्रपक्षे अदद्रीचइत्यादौ अ-चद्रुति लोपो
न स्थानिवदित्युदाहार्यं । विधिग्रहणं ह कर्मसाधनः । तथा ले हि कर्मधारयो वा स्यात् । षष्ठी तत्पुरुषो वा । नायः । वि
धिशब्दस्य क्रियाशब्दत्वापूर्वनिपातप्रसंगात् । नांत्यः । पदांतस्य कस्मिंश्चित् कर्तव्ये न स्थानिवदिति पर्यवसानेन वृक्षवद्ध इत्यत्र वलोपा
पत्तेः । दूं इ निर्दिष्टेषु द्विर्वचनादिषु अनन्वयापत्तेश्च । तस्माद्भावे साधनता त्व । अंतरंगत्वाच्च । अत एव कर्मषष्ठ्यंते न समासः । शुंद्धी
तरीत्यादेः पदसंज्ञायां कर्तव्यायां यस्येति लोपः स्थानिवदेव । नहि स्वादिष्विति सूत्रे ऽपदस्यांतो विधीयते येन निषेधः स्यात् । किंतु
संज्ञामात्रं । तत्रापि यथोद्देशपक्षे ः असिद्धवदत्राभादिति कार्यकालत्वे पूर्वत्रासिद्धे चेति निषेधापत्तेः । एकदेशविकृतस्यानन्यत्वाद्धूत स्थानि
त्वमत्रः प्राप्तः । बहिरंगस्यासिद्धत्वान्नेति वक्ष्यते । भाष्ये तु पदसंज्ञायाः पदांतं स्त्रीकृत्य पदे अंत इति भसंज्ञापि पदकार्यमिति
चद्धेधा समाहितं । तत्रांत्यं षडिकेवचनसामर्थ्यादिति बोध्यं । वाचिकषडिकौ तु पंचमे वक्ष्यते । द्विर्वचने । सुध्युपास्यः । स्थानिव
द्भावनिषेधसामर्थ्यादत्र बहिरंगपरिभाषापि इह न प्रवर्तते । नाज्झलौ नंतर्य इति निषेधाद्ध । वरे इति निपातनाद लुक्कू हूं इ श्च । वरेयो
लादेशः स न स्थानिवत् । यायावरः । यातेर्निसिंस्को टिथेइति यङ् । यश्च यङ् इति वरच् । तन्निमित्तको ऽतो लोपः स च आतो लो

पद्दिचेत्याल्लोपे कृते यैन स्थानिवत्। नन्विह परनिमित्तकमेव नास्ति। आर्द्धधातुक इति विषयसप्तम्यभ्युपगमात्। अत एव हि अचो यदि
ति सूत्रे ऽङ्ग्रहणं कृतं। अन्यथा हलन्तात् त्यतो विशेषविहिततया परिशेषाद् एव यङ्विषयाति विं तेन। विषयसप्तम्यां तु ह्रस्वं
भूतं ३ धित्स्वं इत्यादावजन्तं पूर्वादपि यत्सिद्धं चे अज्ग्रहणमिति यतो नावड्सा युक्तं तः सिध्यति। सत्यं। वद्ग्रहणेन परसप्तमी पक्षो द्यो
त्यते। तथाचानुदात्ते तश्च हलादेरिति सूत्रे आदिग्रहणं कृतं हलन्तादिति मा विज्ञायीति। अस्ति च हलन्तविशेषणस्य व्यावर्त्त्यं। जुगु
प्सनो मीमांसन इति। विषयसप्तमीत्वे त्विहापि अतो लोपे हलन्तत्वात् युक्तं भाव्यमेवेति हलन्तविशेषणं वैयर्थ्यात् सामर्थ्याद् एवादिप
दिग्रहणसिद्धेः हल इत्येव श्रूयात्। एवं च यातेर्यङन्तात् क्विपि अतो लोपे यलोपविधिं प्रति स्थानिवत्त्वनिषेधाद् यलोपे च यायातीति स्थि
ते यङ्कारलोपस्य स्थानिवत्त्वात् आतो लोप इटि चेत्याकारलोपे पुनर्यलोपे यातिरिति भविष्यति। न च पुनराकारयकारश्रवणेऽचि
सति क्विनूयस्य यमात्रश्रवतेति वाच्यं। आल्लोपस्य स्थानिवत्त्वात्। चिलोलुङ्ङ् न्यायेनासिद्धत्वाद्वा। यलोपे तु साहरणं न रमपि। त
था। कण्डूयतेः क्विप्। कण्डूति॥ क्विप्तिति तु काशिकायाः प्रमादः। अप्रत्ययादित्यनेन बाधात्। न च ज्ञप्ति रित्यादावि वेह आवादित्वकल्प
नं बहुलग्रहणं बाधक दर्शनं करणीयं। भाष्यकारैर्लोके वं ड् ये स्येव भवितव्यमिति वदता एतस्याप शब्दतोक्तेः। तस्माद् यं क्विजेवं ततो लोप
यलोपो अल्लोपस्य स्थानिवत्त्वाद्भवड्। ततश्छोः शूडित्यूठ्। न चोठ्यपि स्थानिवत्त्वं। आदिष्टादचः पूर्वत्वात्। अत एव ऊठः पुन
र्वङ् न भवति। सर्वे सर्वपदादेशा इत्याश्रित्य स्थानिद्वारकं पूर्वत्वं ध्वाचिरूक्तमेवेति पूर्वसूत्रे एवोक्तं। तथा तिष्ठतेर्यङन्तात् क्विपूअ
ल्लोपयलोपयोः सतोष्ठी तीतिस्थिते अल्लोपस्य स्थानिवत्त्वाद्यिवड् यलोपः। तेष्ठितिः। तथा पेपीयतेः क्विपि अल्लोपयलोपयोरेस्ते

18 काचइतियणि लोपे कृते पेपिरिति भवति। श्रोतनन्करले। यङ्ता न क्लिचि अल्लोपयलोपाल्लोपेषु पूर्वत्रासिद्धं चेति स्थानिवत्त्वनिषेधात् छशांप इति
पत्येकृते शागच्छिरिति भवति। न च चेचीयतेश्चेच्छिरिति दिक्। तदेवं वरे यलोपे तिनेकं निमित्तं न कं तु हुंति स्थितं। वेचिन्तु वरेई इतिई कारं प्रश्लि ६२
ष्यईकारे परतो विधौ न स्थानिवदिति व्याचख्युः। तेनामलव्याः पूलमामलकं। नित्यंवधूश्शादि व्य इति भयप्। फलेलुक्। ततो लुक्
तेलुक्तिङी पोलुक्। स च यस्येति लोपे न स्थानिवत्। पूर्वोक्तव्याख्याने तु लुङ्कालुपेन स्थानिवदिति वचनं तेनं छिप्यते। तेन च लुक्तमिति
नपुंसके भावे क्तः। लुक् न स्थानिवदिति पूलितोर्थः। स्वरे। चिकीर्षकः। सनो तो लोपो लिति निकारेकारस्योदात्तत्वेकर्तव्ये न स्थानिवत्।
न च लितीत्यस्यारंभसामर्थ्यं। कारकइत्यादौ सावकाशत्वात्। भाष्ये तु आकर्षिक इत्युदाहृतं। तदापाततः। षकोलित्वसामर्थ्यात्तस्था
निवद्भावकृतव्यवधानेप्यस्य पिलित्स्वरस्य सुनचत्वात्। घ्नंतीत्यादौ कुत्ववत्। सवर्णानुस्वारयोः। शिण्ढि। अस्नोरल्लोपो न स्था
निवत्। अनुस्वारस्यानादिष्टाद्चः पूर्वत्वं तु स्थानिद्वरेत्युक्तं। यद्यपि सवर्णस्य हलामात्रे णानुस्वारे प्यासे तुं शक्यते तथा
पि विशेषापेक्षं ज्ञापकं इत्यपि संभाव्येत। तथा च यत्र न परसवर्णप्रसंगः शिंषंतीत्यादौ तत्र स्थानिवद्भावनिषेधमनुस्वारस्म
हलं। अचः परस्मिन्निति सूत्रे उत्तरीत्या अभ्यासस्यासवर्णइत्यादिषु सवर्णइति निषेधस्य लब्धावकाशत्वात् शिंढीत्यादेर
पि असिद्धापत्तेश्चेति दिक्। दीर्घे। प्रतिदीव्ना। इहहलि चेति दीर्घे ल्लोपो न स्थानिवत्। यत्तु काशिकायामुक्तं। उपधायां चेति
दीर्घ इति तत्प्रामादिकं। तथा च उपधायां चेत्यत्रोक्तं। प्रतिदीव्नेत्यत्र हलि चेति दीर्घ इति। यद्वा। आचारक्विबन्तात् क्विपूर्वचेति वि
पि संभाव्येय। नन्वेवमनुनासिकस्याधिक्झलोरिति दीर्घः स्यात्। सत्यं। अकृतव्यूहपरिभाषया भाविनमल्लोपमालोच्यांतरंगो

पिदीर्घो न भविष्यति । जग्मुष इत्यत्र ह्रस्वागमनकारादेशाविवेतिबोध्यं । ननु स्थानिवत्त्वाभावेप्यसिद्धं बहिरंगमित्यल्लोपस्यासिद्धत्वाद्दीर्घो
न स्यादिति चेन्न । कृति तु ग्विधिग्रहणेन बहिरंगपरिभाषाया अनित्यत्वस्य ज्ञापितत्वात् । यथोद्देशपक्षे षाष्ठीपरिभाषाप्रतिदी
र्घस्यासिद्धत्वयांतरंगाभावेन परिभाषाया अप्रवर्तनेः । जक्षि । सग्धिश्च मे । बब्धां ते हरी । तथा हि । अदनं ग्धिः । अदेः क्ति निबह्वं
धं दसीति घस्लादेशः । घसिभसोर्हलि चेत्युपधालोपः । झलो झलीति सकारलोपः । घि सकारे सिचो लोप इत्यस्य भाष्यकृता अनाश्रयणा
त् । वार्तिककृन्मते छंदसो वर्णलोपः । झषस्तथोर्धोऽध इति धत्वं । न च तत्र स्निदवकर्तव्ये पूर्वस्मादपीति स्थानिवद्भावः । पंचमी [illegible] समासस्या
नित्यतया याः पूर्वसूत्रत्वोपपादितत्वात् । घस्य झलां जश् झशीति जश्त्वे कर्तव्ये उपधालोपो न स्थानिवत् । समानाग्धिः सग्धिः । सहस्य सः
संज्ञायामिति सूत्रात् स इत्यनुवर्तमाने समानस्य छंदस्यमूर्धप्रभृत्युदर्केष्विति सूत्रेण समानस्य सभावः । बब्धामिति भसेर्लोट् । तस
स्तां । शपः श्लुः । अंतरंगत्वात्पूर्वं ह्रस्वमभ्यासकार्यं । ततो घसिभसोरित्युपधालोपादि प्राग्वत् । चरिजक्षतुः । जक्षुः । घसेर्लिट् । अ
तुसः उसू च । गमहनेत्युपधालोपः । खरि चेति चर्त्वं प्रति न स्थानिवत् । अत्र वार्तिकं । स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवदि
ति । तेनान्यः स्थानिवदेव । पंचभिररत्निभिः क्रीताः पंचारत्नयः । वेदे तु पंचारत्न्यः । अस्मादिषु छंदसि वावचनं । प्राङ् णौ चङ्युपधा
या इति गुणाभावे यलर । तस्य स्थानिवद्भावादिगं नकाले स्यादिनापूर्वपदप्रकृतिस्वर इत्याहुः । यद्यपि असिद्धं बहिरंगमित्येनेना
पीदं सिध्यति तथापि अकृतव्यूहपरिभाषामाश्रित्ययोज्यं । अचितीको अस्वद्रु कंद्रुत्यत्र हृस्वां तं स्यात्रर्वमित्यस्य स्य कमेहाप्रवर्त
स प्रवर्तनी पूर्वत्रासिद्धमिति तु पूर्वसूत्रेणैवोक्तं । न च तत्र बहिरंगपरिभाषायाः प्रसंगोस्ति । द्वियोः । गियोः । भ्युत्पत्तिपक्षे हलि चेति दीर्घः

11 प्राप्तः। यत्नः स्थानिवद्भावान्न भवति। अचः इत्यस्याधिकारे भुजेः क्विप्। भुक्। ऊठ्यूठ्कृरि भिदि छिदि इत्यत्र भिदुः सच क्विप्। यत्तु हरदत्तेन व्या
ख्यातं च कृत्वादिष्वेत्युपन्यस्तं न तद्युक्तं लादिषु नो भन्वेषणीयं। वाच्योः इह यण्लोपो न। अस्मिन् अवार्तिके स्वरग्रहणमात्रेमानश्य
कं। क्विपोर्निर्यौ रिति तु उपधायां चेति सूत्रेण दीर्घः। कारो रूरी स्यादुलादीनाममनुत्व जिपक्षात्वेनापि सिद्धं। वाच्योरिति तु बहिरंगत्वात् सिद्धं
तया सिद्धं। धिन्नु गुपधात्वे चऊ़पर निर्हृत्सकृत्वेषु पसंख्यानं। पूर्वत्रासिद्धे च। नस्य दोषः संयोगादिलोपलत्वणत्वेषु। अस्यार्थः। धौवि
धिं प्रति न स्थानिवत्। उवमाचेक्षालोलौः। अत्रालि चियाष्टिलोपो यश्च धोलि लोपस्तदुभयं छ्वोः शूठ् इति वकारस्य क्विनिमित्ते ऊठि क
र्तव्ये न स्थानिवत्। एत्येधत्यूठ् इति वृद्धिः। तथापि पठिपि भ्रात्तलकुलानीति दीधीवेवीटामिति सूत्रे यदुदाहृतं तदपि धौ विधिं
प्रतीति व्याख्याने एव संगच्छते। क्वौ लुप्तं न स्थानिवदिति व्याख्यायां तु कौः पिपठिषीस्तु भयमपि न सिध्येत्। तिकि इति लोपस्य
स्थानिवद्भावे रुद्रो संभवान्। पिपठिषते प्रत्यये अतो लोपे नपुंसकबहुवचने शौ प्रत्यये श्लोनुमि कर्तव्ये अतोलोपस्य स्थानिवत्वं
निषेधेन नुमसंगाश्च। एतच्च दीधीवेवीटामिति सूत्रे कैयटादि सूत्रे च भिन्नग्रंथे स्फुटं। कैयटोपि दीधीवेवीटामिति सूत्रे धौ विधिं
प्रतीसर्थो व्यवस्थितो न तु धौ लुप्तं न स्थानिवदितीत्याह। अत्र व्यवस्थितं इति यदुक्तं तत् धौ लुप्तं न स्थानिवदिति पक्षोपि ध्रुव चिरन्तनाश्रीयत एव
नियमः परं नास्तीति सूचितं। लुप्तमिति नपुंसकभावेन क्तः। एवं च सखायुर्गोमान् पदः लं अहं इति सिद्धं। तथाहि। स्वस्मात्परस्येति सूत्रे
भाष्यं। सखीयतेः सखयुः। लुनीयतेर्लव्युरिति। तच्च सखीयतेः क्विपि अल्लोपे यल्लोपे अल्लोपस्य स्थानिवद्भावान् परत्वान्न छिलोपं बाधि
त्वा इको यणचीति यणि स्यात्। ततो यल्लोपे सखवोः न इति स्यात्। अतएव क्वौ लुप्तं न स्थानिवत् इति तत्र यत्नं परिमहारकैयटः।

तथाऽनुगिदचामिति सूत्रे अधातुभक्तपूर्वस्यापि नुमर्थं अधातुग्रहणं इत्युक्त्वा गोमन्त्यतेरप्रत्यये गोमानित्युदाहृतं भाष्ये। तत्राप्यल्लोपस्य
स्थानिवत्त्वात् सर्वनामस्थानपरत्वं नास्तीति नुम् न स्यात्। न चाधातुग्रहणसामर्थ्यात् स्थानिवद्भावबाधः तदभावे सत्यपि नुम् स्यादि
ति वाच्यं। आचारक्विबन्तात् क्विप् चेति क्विपि चरितार्थत्वात्। तस्मात् धात्वन्तत्वेनैव शरणं। ननु गोमन्तमिच्छतीति क्यजन्ते उभयथापि गो
मानिति न सिध्यति। अत्यन्तस्येति दीर्घविधौ अधातोरिति विशेषणात्। सत्यं। तत्राधातुग्रहणमन्तस्यैव विशेषणं न त्वङ्गस्य
पीति तस्य भाष्यत्वान्न दोषः। तथाप्येनविधिस्तदन्तस्येति सूत्रेणैव तदन्तो विपासोऽस्ति। पादयतेः पात्। पद इति भाष्यं। अत्रापि स्था
निवत्त्वाद्व्यवधाने न पद्भावो न स्यात्। धात्वन्तेनेति सिध्यति। अत एव पादस्य पादित्यस्मादिति सूत्रितं। प्रतिपदोक्तस्यैव नह
पदादेशो मा भूत्। किंतु क्विबन्तस्यापि यथा स्यादिति। एवं च पादस्य लोप इति गुरुनिर्देशं कुर्वता सूत्रकृतैव धात्वन्तपन स्थानिवदि
ति ज्ञापितं। तत्र पादः चिल्लुक् इति तु प्रकृतसूत्रस्य नैवं विज्ञायते धात्वन्तेनेति भाष्यस्यार्थः। विशब्द महात्म्यात् सत्यता तत्रादिभा
ष्याद्येति व्यवस्थित शब्दप्रयुज्यमाने न कैयटे न ध्वनितं। युष्मानाचष्टे युष्मयति। ततः क्विपि णिलोपे सो ऽसाविति कर्तव्ये णिलोपो
न स्थानिवत्। तदुक्तं। स्थानिवत्त्वं च लोपे धात्वन्तत्वान्नाभिधीयत इति। स्थानिवत्त्वमिति। लोपस्येति शेषः। ततः धात्वन्तत्वादि सत्त्वयः।
अस्तु तर्हि धात्वन्तत्वमित्यपि नित्यमेव। तावतापि णिलोपस्यासिद्धत्वात् इतिचेन्न। पिपठिषीः अस्यासिद्धत्वप्रसंगात्। दे
वयतेर्द्युरिति तु इह कैयटे नयदुदाहृतं धात्वन्तेनेति सिध्यतीति। तस्यायमाशयः। यद्यपि इह धातोर्विधिं प्रसूत्य सिद्धः तथापि न

20 स्य स्थानिद्वारा अमादिष्वादचः पूर्वत्वे न तिङ्गोप स्य स्थानिवद्भावाद चोञ्णितीति वृद्धिप्रसंगः। तस्मात् पटोऽलुप्तं नेति वक्तव्यम्। यत्तु लोपो व्योरिति
सूत्रे वेदं दृश्यतेः स्यन्तं तादृशस्य षष्ठ्यर्थं दूः दूध्यावितिव्युत्पादनं न्वेयरआह। अतोऽपि स्य स्थानिवद्भावाघात्। तस्य दृष्टं। न च दृष्टिच तद्व्येस्था
निवत्त्वे न भेति वंधः स्यादिति वाच्यं। वक्तार स्याद्विद्वादचः पूर्वत्वादिति। तन्नु स्थानिद्वारकं पूर्वत्वमनित्यमित्याश्रित्य। तद्वीसा तु दध्यृदित्यपि सु
साधमेव। ननु अयथापि दध्यृदि सत्र प्रत्ययलक्षणेन वृद्धिः स्यादेवेति चेन्न। न। बहिरंगस्य दृष्टं वृद्धिं प्रत्यसिद्धत्वात्। एवं च स्थानिवद्भावे स
त्यपिन प्राप्ति नक्षति। बाहिरंगत्वेनैव सर्वसमाधानात्। तस्मात् दध्यृदिति पक्षद्वये पि सिध्यतीति सेवतत्वं। नन्वेव दे शृविकृ तस्मान्नन्वलो
दिवऔत्स्यादिति चेन्न। निरनुबंधपरिभाषया अप्रातुमहत्त्वात् उत्तरैवां अक्षधृदि सूत्रेन औदिति दिवऔत्सूत्रे भाष्योक्तत्वस्पष्टत्वात्। यद्यपि उ
गिदचामिति सूत्रे अप्रातु भत पूर्वादिसुधर्थ स्वाभावापीह श्यदृ विधानादिति भावः। एतेनहल्ङ्याचेति दीर्घः दीव्यतीति नामधातुप्रकृतिगोधौ
मुदाप्रसादो प्रत्युक्तो। दिनेद्दिवि दिविति व्यासमाहितमसूत्रे लोडिविदितिवदभाष्यवोपि दिव्यतीति हुस्वमेवोपलक्षणम्। प्रकृतमनुसरा
मः। द्विवचनादेशनु ओः सुपीति यणर। दध्योदध्यदृसादिवत् लपूर्वत्। कृदूः कृदु वौ कृदु बदृसादितृव दृव। संयोगपूर्वत्वतयाय
लोप्राप्तेरितिदिक्। अत्रायं संग्रहः। सरस्युर्गोमानूपदसत्वं चधौत्तु मम्यतिदर्शनं। अनित्यत्वेपि पठितिपिधौ विधौ तौ ह्वयो दृष्टः।
लुकालुप्तेन स्थानिवत्। अमल्वय्याः फूट्ट्माम लेमक्। फूट्टेलुकः प्रत्या इव्यानपक्षेतु पंचभिः पद्भिः क्रीतः पंचपदः इत्यु
दाहार्यं। तथापि चद्वन्द्वात्योऽन्याय्य अदेवतास्य पंचेन्द्रः पंचाप्निः। डिषासंनिपुत्तः आनुक्तलेकारश्चश्रयेत। न च सान्नियो
गाद्विष्यायेन निवृत्तिः। परत द्वितत्त्वंडुं निमित्तात्मा पूर्वनिवृत्तेः पूर्वयोरनुभैकारयोर्निवृत्तेः वोदात्तव्याघात मचः पर स्मि

न्निति स्थानिवत्त्वात्। ये तु पूर्वे त्र इत्यादयः ईदूतौ ग्रहणं प्रश्लेषं कुर्वन्ति तेषामिह ऋकारग्रहणं न कार्यं। उपधात्वे कर्तव्ये न स्थानिवत्। तेन पादि
रेचः शब्दा आतुरर्षिके ऽ लिकृते ऽच्छ्याद्येकान्तत्वेोपधादिति पारिभाषिकत्वात् रेफोपधलक्षणो ऽप्रत्ययो पादिरवीयः सिध्यति। अन्यथा
उपधासंज्ञायाः पूर्वत्वेन तत्र कर्तव्यायामाल्लोपः स्थानिवत् स्यात्। नन्वेवं पटयतीत्यादौ वृद्धिः स्यादिति चेन्न। यत्रोपधासंज्ञामु
पजीव्य प्रयोगविधिस्तत्र स्थानिवत्त्वं न तु संज्ञायां निषेध इति भाष्ये स्थितत्वात्। अत्र च ऊ पटन्निति ह्रस्वग्रहणमेव ज्ञापकं। यद्यं तर्हि भाष्ये पटो
पेसौ वीवकृत्ते सुदाहरणं दत्ता उपधाविधौ नेत्येव सिद्धमिति सुक्त्विति चेत्। अनास्थायाद् भाष्यं न दिस्मये हि। न च हि ते नैवोद्दिष्टिस
त्तानाद्रवि अद्लोपस्य स्थानिवत्त्वे सति स्थानिवत्त्वेनेति सिद्धे समानाश्रयस्यालोपस्याभीयत्वेनासिद्धतायां यल्लोपः
सिध्यतीति यल्लोपे न स्थानिवदित्यस्यैव सौ ... रीत्युदाहरणं। उ... पधात्वे तत्र लोपे उपयोगि न तु प्रत्ययपादिधाविति स्थितं। च
ऽ परेणो यो ह्रस्वः स च ऊपरानिह्रासः तत्र न स्थानिवत्। वृद्धिविधौ तत्प्रयोजितत्वान्न अवीवदद्वीणां परिवादकेन। प्रथमणिचो लोपस्य स्थानि
वत्त्वादनुपधा आकार इति णौ च ऊ ते सुपधाह्रस्वो न प्राप्नोति। णिसामान्यग्रहणादयं तत्सिद्धं। इदं तदुदाहरणं। णा रिआ रव्यत। अवीरत। २४
न च नाग्लोपीति निषेधः शंक्यः। परत्वाद्धौ समाति लोपइत्यभ्युपगमे नाग्लोपित्वाभावात्। अत एव हल्लकोलिखदंतनिपातनं सार्थकं। कु
त्वेन स्थानिवत्। अर्चयतेरौणादिकः कुप्रत्ययः। अर्कः। पाचयतेः क्तिच्। पाक्तिः। यो ऽकुरति कुत्वेणिलोपो न स्थानिवत्। इ. हस्ते जश्र
चर्खुरित्येव सिद्धं। विधिग्रहणं किं। द्व्येयणविध्यंतरो... पसंग्रहार्थं। तद्भुमादनार्थं वक्ति लुगित्यादि गार्गि ... कमितिनिष्कर्षः। तच्चा

२१ पिच्छि च ङ् नि ह्रौ सोपधानां ग्रहणमावश्यकं॥ लुकईकारप्रश्लेषेण गतार्थत्वात्कुत्वस्य पूर्वत्रासिद्धीयत्वात्सेत्स्वधेयं।
चजोरिति कुत्वेचाउदाहरणमन्वेषणीयं॥ पूर्वत्रासिद्धेचं न स्थानिवत्। पापच्यतेः क्तिच्। पापक्तिः॥ यायज्यतेर्याय
ष्टिः॥ पाचयतेः पाक्तिः। याजयतेर्याष्टिः॥ इहाल्लोपणिलोपौ कुत्वषत्वयोर्न स्थानिवत्। एवं लेहयतेर्लीढिः। दोहयतेर्दोग्धिः। लैरू
वेशयतेर्वेष्टिः। दाशयतेर्दाष्टिरित्याद्यूह्यं। न्यायसिद्धं चेदं। अचः परस्मिन्निति स्थानिवदतिदेशं प्रति त्रिपादीस्थस्यासिद्धत्वात्
तस्मिन्कर्त्तव्ये अतिदेशाप्राप्तेः। न चैवं स्थानिवत्सूत्रस्याप्यप्रवृत्तौ रामइति विसर्गो न स्यादिति वाच्यं॥ प्रत्ययः परश्चेत्या
दिनिर्देशो भोभगो अघो इति सूत्रे शग्रहणे न च तस्य वर्त्तोर्ल्लोपितत्वादिसवधेयं। एवं स्थिते द्विर्वचनसवर्णानुस्वारदीर्घ
जश्चरः सूत्रे नपाठ्याः॥ किंतु न पदान्तवरेयलोपस्वरेष्वित्येवपाठ्यं इति भाष्यवार्त्तिकयोः स्थितं॥ स्यादेतत्। यदि दी
र्घग्रहणं सज्यते तर्हि सार्वमिके दीर्घविधौ स्थानिवद्भावः प्रसज्येत। तथा चाचिण्णमुलोरिति सूत्रे यङ्लुङ्ताषि जंनाद्याणि चितनभ्विणि
अशंशामि अशामि इति यदुदाहृियते तन्न सिध्येत। न च दी [redacted] र्घग्रहणसामर्थ्यात्स्थानिवद्भावबाधः। कमेर्णिङ् सूत्रे हरदत्तोद्धृतकारिकायां चिण्णमुलोर्दीर्घ इत्यत्र कैयटोक्तरीत्या च अहीडीत्वे
तत्सिद्ध्या अहेडीसस्य निवृत्त्यात्तस्य चारितार्थत्वात्। उच्यते। णिलो जा त्स्यैकं ग्रहीत्वा अशामीति सिद्धं। अशंशामीति तु यङ्लुग
न्ताण्णिचि भविष्यति। न हि यङ् यङ्लुकोः स्वरे र्थे वा कश्चिद्विशेषोस्ति। येन यङ्येवं साधयितुं क्लिश्येत। एवं च ग्राहितं सोद्य

=दीर्घग्रहणसामर्थ्यादिति· प्रकृतेऽपि तं हृत्वेति कल्पितत्वेऽदीर्घग्रहणसामर्थ्यादिति भावः। =४

पिसिद्धं । पूर्वस्मादपि विधेरस्यानिबद्धत्वेन रीकोऽव्यवधाने सति ग्रहोलिटीति दीर्घस्याप्रवृत्तेः । सत्रमते तु अविहितविशेषणाश्रयणाद्ग्रहितामित्या
दौ न दीर्घः । अत एव यङ्लुगन्ते च जरीगृहितेत्यत्र न दीर्घः । अस्यानिबद्धत्वात् । सत्रमते विहितविशेषणत्वेऽपि स्थितं । यङ्लुगन्ता तु लजा
दाविटो दीर्घो भवत्येवेति माधवः । द्विःप्रयोगो द्विर्वचनं षाष्ठमिति सिद्धान्तात् ग्रहेर्विहितत्वानपायात् । यङ्लुकोऽनैमित्तिकत्वात् याऽऽद्वस्
गरेशात यालुकाल्लुप्तत्वाच्च स्यानिबद्धत्वोऽपि नास्तीति माधवस्याशयः । वस्तुतस्तु यङ्लुक्यपि द्विरुक्तो दीर्घोऽनिष्ट एव । एकाचो द्वे प्रथमस्येति
सूत्रे भाष्यकैयटादिपर्यालोचनया तथैव निर्णयात् । तथा च तत्र ग्रहेरङ्गादिति भाष्यमुपादाय कैयट आह । तच्चोहि जरीगृहीत्यत्र न तु
ग्रहेः विशेषणसामर्थ्याद्धि यथाश्रुतरूपाश्रयणमिति । यद्यपि तत्र यङन्तं प्रक्रम्येदमुक्तं तथापि युक्तिसाम्यात् यङ्लुगन्तेऽपि न दीर्घ इ
ति लक्ष्यते । अत एव एकाचो द्वे इति सूत्रे हरदत्तोऽपि यङन्ते दीर्घमाशंक्याह । एकाच उपदेश इत्यतो दीर्घ वि-धावेकाज्ग्रहणमनु
वर्तत इति । नह्यत्र पक्षे यङ्लुक्यि दीर्घस्याक्तिसंभवोऽपि स्ति । न त्वेवं ग्रहोलिटीति सूत्रे यङ्लोपे चोक्तमिति वार्त्तिकव्याख्यावसरे स्या
निबद्धत्वाद्विहितविशेषणाश्रयणाद्वा यङन्ते दीर्घपरिहरन्नकैयटो विरुध्यते । यङ्लुगर्थं यथाश्रुतरूपाश्रयणस्यैकाचो ग्रहणानु
वर्तनस्य वा प्रागवश्यकर्तव्यत्वेन गतार्थत्वादिति चेन्न । ग्रहोलिटीत्यत्रत्य ग्रन्थस्य उपायस्य उपायान्तराद्दूषकत्वादिति न्यायेन यङन्ते
उपायान्तराभिधानपरत्वात् । अत एव तत्रैव कैयट आह । अन्यत्रास्य दोषस्य सम्यग्गुप्तत्वादिति । एवं हि वेदकृतेत्यत्रे परिहारस्याव्या
पकतां एकाच इति सूत्रोक्तस्यैवावश्यकतां चाभिप्रैति । चैवं यथाश्रुतरूपपक्षे गृहीतामित्याद्यसिद्धिः । अङ्गसंज्ञाप्रवृत्तिवेलायां यथा
श्रुतरूपस्यैव तत्र सत्त्वात् । ग्राहितादौ तु नैवं । एकाच इति समाधानं तु लिङ्गभिन्नविषयकमेव । तस्मात् यङ्लुगन्तात्सितेता
यङ्लुगन्ताच्च ग्रहे रिटः । द्विधा त्रिधा चतुर्धा च दीर्घो नेति व्यवस्थितं । माधवग्रन्थस्तु विहितविशेषणपक्षस्य मुख्यतां पक्षान्तरा

णमभ्युदय तो॰ चपरिकल्प्यवृथंचिन्तेय इति प्रतिभातीति दिक्। तस्यदोष इत्यादेरयमर्थः। तस्य पूर्वत्रासिद्धे चेत्यस्य स्थलत्रये दोषः। अतिप्र
सक्तिः। तस्मान्नत्र स्थानिवद्भावस्य प्रतिप्रसवः कर्तव्य इत्यर्थः। तेन वाक्यर्थं वास्यर्थ इत्यत्र स्थोऽरिति लोपो न। निगार्यते। निगाल्यते। अ
चि विभाषेति लत्वं सिध्यति। तथा माषवपनीत्यत्र णत्वं न भवति। अल्लोपस्य स्थानिवत्त्वेन नकारस्य समासान्तत्वाभावात्। न चास
त्यपि स्थानिवद्भावेऽऽ बेव समासांतो ननु नकार इति वाच्यं। ऊ‍ुसतेः प्राप्तो ब समास इति द्वितीये वक्ष्यमाणत्वात्। एवं स्थिते तक्षय
तेः क्विपि तक्। रक्षयतेस्तु रक्। इत्यादि बोध्यं। अत्र हि संयोगादिलोपे कर्तव्ये णिलोपस्य स्थानिवद्भावान्न तत्प्रवृत्तिः। संयोगा
न्तलोपे तु स्थानिवद्भावनिषेधाद्भवत्येवासौ। गोरट् इति तु शुद्धान्तु क्विपि बोध्यं। यत्तु अचः परस्मिन्निति सूत्रे दध्यत्रेति भाष्यमुपादाय
कैयटेनोक्तं। पूर्वत्रासिद्धे चेत्येतदत्र नास्ति। तस्यदोष इत्यत्र संयोगादिलोपस्य संयोगोपलक्षितलोपोपलक्षणत्वादिति। तन्न वास्तवं।
किंतु तत्रत्य पूर्वपक्षित्वाभिप्रायवर्णनमात्रं। अत एव नपदांतसूत्रशेषे तेनैवोक्तं। स्कंदयतेः स्कन्। तक्षयतेस्तगिति। यत्तु सिद्धकांडे श्रु
त्वं धुट्त्वे इति वार्तिकव्याख्यावसरे कैयटेनोक्तं। मधु णिजीप्यते मधुङिति प्राप्नोतीति। तन्नु सकारोपदेशसामर्थ्याद्धित्वबोध्यं। सर
प्र श्चोततीत्यत्र शितु गित्यस्यांर स्याः सकारश्चरितार्थ इति चेन्नाहि ह्यौ तुमाभिति समाधेयं। कुरूमनाक्षोऽवेत्यत्रक्रुरिति माधवी दाहृतं स
म्यगेव तत्र सामर्थ्यविरहेण संयोगादिलोपाप्रवृत्तेरिति दिक्। स्यादेतत्। इह संयोगादिग्रहणं मास्तु। न चैवं वाक्यर्थमित्यादौ स्कोरिति लो
पापत्तिः। स्कोः संयोगेत्यत्र झलो झलीत्यतो झल इत्यनुवर्तते। तश्चोपसर्जनस्यापि संयोगस्य विशेषणं। न तु प्रधानयोरपि स्कोः। अ
व्यभिचारात्। ततश्च झलंतो यः संयोगस्तदाद्योः स्कोर्लोपः स्यादिति सूत्रार्थो बहिरंगतया यत्नो सिद्धत्वबाधा। अत एव हि दध्यत्रेत्यादौ सं
तू

योगांतलोपो न प्रवर्तते। तथा चाष्टमे वार्तिकं। नवा झलो लोपाद् बहिरंगलक्षणत्वादिति। न चैवमपि काष्ठतक्। राष्ट्रभृक्। इत्यादि नासिध्येदेवेति वाच्यं। अन
भिधानान्नत्र क्विप एव दुर्लभत्वात्। अनभिधाने च काष्ठतग्गौर्वनास्तीत्याष्टमिकं भाष्यं वस्तेन न्यायस्याप्यनित्यता ज्ञाप्यत इति। अत्रोच्यते। कुस्म
यतेः कुस्मिरित्यादिसिद्धये संयोगादादिति वाच्यमेव। किंच। तक्। रक्। इत्याद्यर्थमपि वक्तव्यं। न चानभिधानं। प्रमाणाभावात्। कैयटादि
भिरुदाहृतत्वाच्च। न च काष्ठतग्गौर्वनास्तीति भाष्यं तत्र प्रमाणं। यद्येवं स्यात्। तथा हि। काष्ठतक् स्यात्तेस त्र क्लुप्तः परो यः संयोगस्तदा
देः ककारस्य लोपमाशंक्य तदुक्तं। तेन यत्र कलोपप्रसक्तिस्तदभिप्रायकम नभिधानं। अत एवं क्तान्तेभ्यः क्विपू नैव परतया तन्दृष्टा
न्व्यानं। न चालिडन्तेभ्यः क्विपि कलोपप्रसक्तिरस्ति। लिडलोपस्य स्थानिवद्भावात्। न चपूर्वत्रासिद्धे चेति तन्निषेधः संयोगादिलोपे प्रवृत्ति
प्रसवेस्य आगरूपत्वात्। तस्मात् संयोगादिग्रहणं कर्तव्यमेवेति स्थितं। इदं त्ववधेयं। संयोगांतस्य लोप इति सूत्रे न वा झलो लोपाद्बहि
रंगलक्षणत्वादिति द्विधा सिद्धं तव्यवस्थापनात्। कुस्मिरिति संयोगांतलोपोपि दुर्लभः। तेन कुस्म इत्येव भवति प्रथमपक्षे। द्वितीयपक्षा
न भिप्रायेण तु माधवः। नन्वेवमपि लत्वग्रहणं व्यर्थं। निगार्थ्यै इति सूत्रे सत्स्वपि लिलोपे प्रत्ययलक्षणेन लत्वसिद्धेः। न च वर्णाश्रयत्वं
धातोः स्वरूपतस्तत्स्ये कार्यविज्ञानात्। इदं च दाडिनायनेति सूत्रे भ्रौणहत्ये तत्त्वनिपातनेन ज्ञापयिष्यते। किंच। अंतरंगत्वादपि लत्वं सु
वचमिति। अत्रोच्यते। लत्वमहद्गमित्यत्राचि नेत्यनुवर्तते। हल्डीति निवृत्तं। तथा च अलत्लिडित्यादिसिद्धये प्रत्ययलक्षणं नारंभणीयं। किंतु
एवं च २ नियमार्थं तदारंभ इति भाष्ये स्थितं। इतरथा व्यावृत्तिमात्रफलकं प्रत्ययलक्षणसूत्रेन तत्कार्यातिलुप्त स्थानिवत्सूत्रे णैव निर्वाह्यातिदेश। तत्र न ३
च प्रदीव्येतीलत्वनिवृत्तये अप्राधान्येनाप्यल्लाश्रयत्वे निषेधः स्थितः। तथा चाचि प्रत्यये विधीयमाने लत्वं स्थानिवद्भावं विना दुर्लभ
मेव। यदप्यंतरंगत्वाल्लत्वं इत्युक्तं। तदपि न। अकृतव्यूहपरिभाषया लत्वाप्रवृत्तेः। किंच उपसर्गस्यायतौ इति सूत्रे पक्षद्वयं वक्ष्यते।

अयतिपरत्वं उपसर्गस्य विशेषणं रेफस्य वेति। तत्राद्यपक्षे प्लव्ययते इति सिध्यति प्लायते इति तु न सिध्येत्। एकादेशे कृते व्यपवर्गाभावात्। उभयत आ
श्रये अंतादिवद्भावायोगाच्च। तस्मात्तत्र स्थानिवद्भावेनैव व्यपवर्गो वक्तव्यः। स च पूर्वत्रासिद्धे चेति निषिद्ध इति लत्वे प्रतिप्रसवः सार्थक
एव। द्वितीयपक्षे तु पल्ययते इति न स्यात्। पकारेण व्यवधानात्। प्लायते इत्यत्रैव परं लत्वं स्यात्। पूर्वत्रासिद्धे चेति स्थानिवत्त्वनिषेधेन
तत्र रेफस्यायतिपरत्वाविघातात्। कृते त्विह लत्वमहत्त्वे येन नाव्यवधानन्यायेन पल्ययते इत्यत्रापि लत्वं सिध्यति। स्फुटं चेदं अ
पूमे भाष्य एव। तस्मादिह लत्वमहत्त्वं कर्तव्यमेवेति स्थितं। णत्वमहत्त्वं तु व्यर्थं। तथाहि। माषवपनीति तावद् बहिरंगपरिभाषया
पि सिद्धं। न च प्रहिणोति प्रमीणातीत्यादिसिद्धये तदिति वाच्यं। अचः परस्मिन्निति सूत्रस्य प्रवृत्तिं विनापि एकादेशे कृते तस्या
नन्यतया हिनुमीनेत्यस्य प्रवृत्तिसंभवात्। न च क्षुभ्नादिषु इति सूत्रे वर्तितरीत्या प्रियाष्ट्र इत्यादिसिद्धये णत्वमहत्त्वमिति वाच्यं।
कार्यकालपक्षे बहिरंगपरिभाषयैव तस्यापि सिद्धेः। यथोद्देशपक्षस्तु न गृह्यते प्रत्याख्येये न णत्वेन सह फलसामर्थ्यात्।
एतेन प्रियाष्ट्र इति णत्वाभ्युपगमपरः पदमंजरीग्रंथो व्याख्यातः। बहिरंगपरिभाषया अनित्यत्वेपीह तदप्रवृत्तौ प्रमाणाभा
वात्। तस्मादिह लत्वमहत्त्वं व्यर्थमिति स्थितं। वस्तुतः णत्वे स्थानित्वाभ्युपगमे बाधकमपश्यामि। तथाहि। अनितेरंतिसूत्रे नइ५
तइति योगं विभज्य हे प्राण इति रूपसिद्धये पदांतस्येति प्रतिषेधं बाधितुं अंत इति सूत्रे णपदं तस्यानिते णत्वं विधीयत इत्येका व्याख्या। अं
न्त३ तश्चार्थं समीपपर्यायमाश्रित्य निमित्तसमीपस्थो योनितेर्नकारस्तस्य णत्वं निमित्तसमीपस्थस्यानितेर्यो नकारस्तस्य णत्वमिति
च योगभागं विनापि व्याख्यानद्वयं भाष्ये स्थितं। तत्र प्रथमपक्षे प्राणितीत्यादौ एकेनाकारेण व्यवधानेपि वचनसामर्थ्यात्णत्वं
प्रवर्तते। द्वितीयपक्षे तु एकादेशस्यादिवद्भावाद् व्यवहितस्यानितेः संभवात् प्रवर्तते। पर्यनितीत्यत्र तु वर्णद्वयेनैकेन च व्य

बाधात्पक्षद्वयेऽपि णत्वं न प्रवर्तते इति स्पष्टमष्टमे। यदि चेह णत्वं महत्त्वं क्रियेत तर्हि पर्यनितीतिवत् प्राप्तिस्तत्रापि द्वयेनैव न वावर्तेत यथाक्षं भवं
व्यवधानात् णत्वं न स्यात्। न च वचनसामर्थ्यात् स्थानिवद्भावकृतं व्यवधानमाश्रयिष्यते ऽत्र बाध इति कुत इवेति वाच्यं। निरलिति
दुरलितीत्यत्र चरितार्थत्वात्। न चैवं निर्दुरोरनितेरित्येव ब्रूयात्। नत्वनितेरंत इति सामान्यलक्षणं प्रणयेत् इति वाच्यं। आवत्ति
मात्रिसहे प्राणितीत्यत्र णत्वस्य प्रतिप्रसवार्थं निर्दुरोरित्यपेक्षया अंत इत्युक्तावक्षरलाघवानुरोधाच्च सामान्यलक्षणप्रणयनसं
भवात्। तस्मादत्र भिन्न भाष्यपर्यालोचनेनेह णत्वं महत्त्वं न कर्तव्यं इति निर्णीयते। अत एव व्यूढोरस्केनेत्यत्र णत्वं न। अन्यथा
दू विसर्गस्यात्वेन तदादेशस्य सस्य स्थानिवद्भावात् णत्वं स्यात्। इह णत्वमहत्त्वस्य प्रयोजनं भावसूत्र एव। ततश्च तस्य दोषः
संयोगादिलोपलत्वयोरिति वाच्यं वस्तुतस्तु न वाच्यं। पूर्वत्रासिद्धेनेति हि अंद्रुत्वादेव न्यायसिद्धमित्युक्तं। तत्रासिद्धत्वं नित्यं अ सि २
धुनेतिवद्मुनेति वाच्ये न मुनेद्युक्ते नैतियोगविभागात्। नुरीति वाच्ये नामीति लिंगाच्च। अत एव अंसादेरंगस्य सनेन व्याप्‍ इ ७
तौ सत्यामपि प्रसक्तत्वं तद्वत्सादौ दीर्घकारयितुं हि नामीत्युक्तं। रूपादिभ्यः भमूश्चान्तलोप इति सूत्रद्वये भाष्यकैयटाभ्या
लोचनेनांतरंगसामर्थ्यात् संनिपातपरिभाषया द्वित्वासिद्धत्वं स्यात् प्रविश्येषा बाधे प्राप्ते नामीत्युक्तिरिति चेत् न। कृतिलुमहणादि ग ५
ना संनिपातपरिभाषाया अनित्यत्वज्ञापनात् सामर्थ्याद्बाध इति अक्षत्वं तदित्यादौ उभयबाधे गौरवो ऽत्र। तस्मादनित्यता पक्षे विध
ज्ञापनार्थमेवत्। तेन सिद्धकांडमपि संगृहीतं भवति। एतेन ग्रामो ग्रामेभ्य इत्यादौ रुत्वस्यासिद्धत्वाद्रोरुकारस्येत्वं
शाल्लोपौ कथं स्यातामस्येतदपि समाहितं। प्रत्ययः परश्चेत्यादिलिंगाच्च। यत्तु भनुनासिकनिर्देशसामर्थ्यादित्संज्ञाव्लो
तन्त्र १ पे प्रत्ययसिद्धत्वं नेति। तत्र तरमूर्ज्जमित्यादौ हरिवेत्यस्य व्याप्त्या अतोरोरित्यत्र मानुनासिकस्येव निर्देशाभ्युप

25 गमेन चारितार्थ्यात्। गामदृत्यादावपि सानुनासिकप्रवर्त्तमानस्याप्राप्यमानतया चारितार्थ्यस्य स्पष्टत्वादिति दिक्। तेन संयोगा
दिलोपलत्वयोरसिद्धत्वाविरहात् स्थानिवत्त्वं भविष्यतीति सकलेष्टसिद्धिः। द्विर्वचनेऽचि। रूपातिदेशोऽयं। द्वित्वनिमित्तेऽ
चि यो जादेशः स स्थानिवद्रूपं लभते द्वित्वे कर्त्तव्ये। चक्रतुः। चक्रुः। द्वित्वनिमित्तत्वेनाविशेषणादिह न। दुद्यूषति।
सुस्यूषति। न ह्यूठ् द्वित्वनिमित्तं। नन्वेवं चक्रतुरित्यत्रापि स्थानिवद्भावो न स्यात्। अतुसो द्वित्वनिमित्तत्वेऽपि अकारस्या
तथात्वात्। स्वरं तु चक्रे इत्यादौ मा भवत्वाशङ्कितेति। सत्यं। इह निमित्तशब्देन साक्षाद्वा समुदायघटकतया वा द्वित्वप्र
योजकत्वमाश्रीयते। न तु साक्षादेवेत्याग्रहः। लक्ष्यानुरोधात्। किं च। सूत्रे निमित्तशब्दो नास्त्येव। किं तु लक्षणया [illegible] वा
द्विरुच्यते यस्मिन्निति द्विर्वचनमिति व्युत्पत्त्या वा द्विर्वचनमस्मिन्निति त्यप्रथमभाष्याद्वा द्विर्वचननिमित्तं लभ्यते। तथ
प्रकारत्रयं साक्षात्परंपरासाधारणं प्रयोजकेऽपि सुवचं। एतच्चाठस्यक इति सूत्रे कैयटे स्पष्टं। अतएव ऊर्णोतेः सनि सनीवं
तेतीट्पक्षे विभाषोर्णोरिति ङित्वविरहे ऊर्णुनविषतीति सिद्धं। सन्नन्तस्य द्वित्वविधानेऽपि सनो द्वित्वप्रयोजकत्वेन तत
स्मिन् गुणवादेशो यो द्वित्वे कर्त्तव्ये स्थानिवद्भावात्। तदुक्तं। तद्भावभावितामात्रेणेह निमित्तत्वमिति। वस्तुतस्तु द्वि
र्वचनाक्षिप्तः प्रत्ययोऽचीत्यनेन विशेष्यते। परस्मिन्निति चानुवर्त्तते। अभीष्टामध्ये देवदत्तात्परं मानयेत्युक्ते यथा
सजातीयेन मनुष्यान्तरेणाव्यवहितः पर आनीयते तथेहापि प्रत्ययान्तरेणाव्यवहितः परो गृह्यते। तेन द्वित्वनिमि
त्ते अजादौ प्रत्यये प्रत्ययान्तरेणाव्यवहिते परे सति यो जादेशः स स्थानिवत्स्यादिति सूत्रार्थः। एवं च चक्रतुरित्यादौ न का 25

प्यनुपपत्तिः। वक्ष्यमाणज्ञापकबलेनात्र चाव्यवहिते प्रवृत्तावपि द्दिवनीयिषतीत्यादौ अनेकप्रत्ययव्यवधानादप्रवृत्तिः। अपीप्यदित्यत्र
वर्णव्यवधानेपि प्रत्ययान्तराभावात्प्रवृत्तिः। अनुवादे परिभाषानुपस्थानेपि निर्दिष्टप[illegible]र्तव्यस्य निर्वाहश्चेति बोध्यं। अ
तएवेह परस्मिन्नित्यनुवर्तत इति न्यासकारः। तथा द्विर्वचनेनेह प्रत्ययाक्षेपवद्दल्लिङ्गं भिन्नेनव्यवहिते ज्ञापकं स्यादिति
बुबुद्धूयदोपि नदभिप्रेति। ऊर्णुनविषतीत्यादिसिद्धये तु तद्भावभावितामात्रेण निमित्तनेति स्वीक्रियत एवेत्यवधेयं।
नन्वेवमद्दिदिषतीति न सिध्येत्। ऋधातोः सनि स्मिपूङ्रञ्ज्वशां सनीति इटि कृते इसशब्दनिमित्तकस्य गुणस्य
स्थानिवद्भावे आदेर्द्वितीयस्य तिइसो द्वित्वप्रसंगात्। इष्यते तु रिसशब्दस्य द्वित्वं। अत्रोच्यते। नहि कार्यी निमि
त्ततयाश्रीयत इति दीधीवेवीटामित्यत्रोपपादितत्वात्। नेह इसशब्दो निमित्तं। अतो न स्थानिवद्भावः। न चैवं सन्न
न्तस्य कार्यित्वात् ऊर्णुनविषतीत्यपि न स्यादिति वाच्यं। मत्वर्थीयेन इनिना कार्यमनुभवतीत एव कार्यित्वलाभात्। तत्र
तु द्वितीयएकाच् द्वित्वरूपं कार्यमनुभवति। न तु सन्। अरिरिषतीत्यत्र तु रिसशब्दस्यैव कार्यभाक्त्वमिति विशेषस्यात्।
नन्वेवमचीत्यस्य जेघ्रीयते देध्मीयत इति व्यावर्त्यं न संगच्छेत। घ्रोयङ्ध्मोः इति द्वितीयाजवयवस्यैकाचः कार्यितया
यङोपि द्वित्वनिमित्तत्वाभावादिति चेत्। सत्यं। अधिजगाड इत्यस्यैव अङ्गमहत्वव्यावर्त्यमस्तु। तत्र हि गाङ् लिटीति द्वित्वकारक
निर्देशसामर्थ्याल्लावस्थायामेव गाङादेश इति भाष्य एव स्पष्टं। इदं च वार्त्तिकमतमनुसृत्योक्तं। तत्र लिटि लिङीत्या
दीनां परसप्तमीत्वाभ्युपगमात्। भाष्यमते तु आर्धधातुकीयाः सामान्येन भवन्तीत्यभ्युपगमाल्लिटीत्यादयो विषय

25 पसमभ्य एवेत्युक्तं स्थानिवत्सूत्रे । तन्मते तु अचीत्यस्य तङ्ग्लेइत्यादिव्यावर्त्यं बोध्यं । तथाहि । आदेच इति सूत्रे अशितीति परसप्तमीति
पक्षे शिदिति कर्मधारयाश्रयणात् यस्मिन्विधिस्तदादावल्ग्रहणे इत्यस्य प्रवृत्त्या आदिशितोन्यस्मिन्परे विधीयमानमात्वं ला
वस्थायां क्रियते । अतो न स्थानिवत् । न चातं इत्यात्वाञ्जिवादिषु प्रत्ययचिकृते आत्वस्यानं तथा च स्थानिवत्त्वं दुर्वारमिति वाच्यं । न संप्र
सारणे संप्रसारणं दिवियोय इति द्विः ककारककार निर्देशसामर्थ्यस्य तं च तत्राननुपपत्त्या दिहानुवर्त्य लिटि तु लावस्थायामेवेति
आत्वविधौ व्याख्यानात् । कथं तर्हि जेघ्रीयते देध्मीयते इति भाष्यवृत्त्यादिषु प्रत्युदाहृतमिति चेत् । प्रातिशाख्यरीत्येत्यवेहि । तथाहि ।
अनुस्वारोष्म अनेनवाक्ष्वरंगामिस्तु लास्वरांतरेव्यंजनान्युभरस्यति तत्र सूत्रितं । एवं च नेनिजत्स्यनेनिजुरित्यादौ एकाचक
स्य धातोः संपूर्णस्य द्विर्वचनाद भ्यस्ताश्रय भष्टाव जुस्मादि सिध्यतु । अचूके तु मध्यवर्तिनां हल्लां उपरंजनत्वात् प्रथमाजंतमेव
द्विरुच्यतां । यथा दरिद्रातौदइति । जागरैजा इति । न चैतावता धुचि इत्यपे निष्टमापद्यते येन प्रातिशाख्यपरिभाषामुपेक्ष्य
नरभार्या वद्धंजमानिइति चाश्रित्य दरुजागर इत्यादि द्विरूच्येत । अत एव चतुरवकल्पता वा घत्स्यरलोपश्चेति संगच्छते इ
ति दिक् । यदा तु षाष्ठभाष्यवार्तिकरीत्यादीता यान्तवधिकरणकाचूङ्ग्यते । गाङ्लिटीति च विषयसप्तम्याश्रीयते ।
अनैमित्तिकमात्वं शितितु प्रतिषेध इति वा अशितीति विषयसप्तमी वाश्रीयते तदा जेघ्रीयते धित्सगो जरहेइति त्रिवि
धस्यापि व्यावर्त्यस्यासंभवाद चीत्यस्य फलं किमिति विभावनीयं सूरिभिः । स्यादेतत् । भस्सेः ध्वसोधस्मि भस्सोर्ह
लि इत्युपधालोपे कृते द्विर्वं माभूदित्येतदर्थ मच्ग्रहणं भविष्यतीति चेत् । सत्यमस्ति वा हि स्वेपूर्वान्निति श्रुतो विशेषाभा

वात्। ननु दुर्लक्ष्योपि विशेषः सूक्ष्मदृशं प्रति दुर्वार इति चेन्न। दातिप्रियातिवीरवद्भूत्तु इत्यादावनिर्द्वित्वाभावसंभवात्। वक्ष्यति हि षष्ठे
लिटि धातोरिति सूत्रे। अनभ्यासग्रहणं नार्थक्यं च चखंद सिवाव च नादिति। न चैवमपि पाक्षिकं द्वित्वं स्यादेवेति वाच्यं। दृष्टानुविधान
स्येव छंदसि कर्तव्यत्वात्। अत एव हि दुर्जूतु इत्येव सिद्धे निसंध्छंदसीति सूत्रं निष्फलमित्यभियुक्ताः। लोके तु भाष्यमते धूर्तु
र्दुर्लभमुपधालोपश्च छांदस एव तदेवं जेघ्रीयते घिजघ्नेजेत्यादौ इत्येतत्सिद्धये क्रियमाणं अजग्रहणं मे वेह रूपातिदेशत्वेप्र
माणं। कार्यातिदेशत्वे हि घ्रीगाग्ला इत्येषामेव भाव्यं द्वित्वे नेति किं तेन। तथा च वार्तिकं। अजग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्येति।
देध्मीयते शाशाय्यते इत्यत्र विजेघ्रीयते इत्यनेन समानयोगक्षेममुदाहरणं। ईघ्राघ्मोरिति लोकारः। अयङ् यि क्ङिति शीङो य
ङादेशः। अचीत्यस्य प्रत्याख्यानपक्षे तु लक्ष्यानुरोधादेव शब्दाधिकारभाष्ये रूपातिदेशो व्याख्येयः। पूर्वसूत्राद्चवद्
विषयस्य तस्यानुवृत्तिरिह किमर्थेति चेत्। शुशुवतुरित्यादिसिद्धये इति गृहाण। तथा हि। विभाषा श्वेरिति सूत्रं यद्यपि शु
शावेत्यादौ सावकाशं तथापि श्वनइत्यादौ चरितार्थस्य च विस्य परी सम्प्रसारणस्य बाधकमेव। परत्वात्। लिड्यभ्यासस्योभयेषामित्यस्य
तु न बाधकं। अयमभ्यासस्य विषयकस्य विधेर्निरवकाशत्वात्। अत एव विभाषा श्वेरिति सूत्रे श्वेर्लिड्यभ्यासलक्षणं प्रतिषेध इ
ति वार्तिकमारब्धं। लिड्यभ्यासस्येति सूत्रे अश्वयतीनामिति पूरणीयमिति तदाशयः। अन्यथा हि विहितप्रतिषिद्धत्वाद्विक
ल्पात् शुश्वाय शुशुवियतुरित्यनिष्टमपि पक्षे प्रसज्येत। एवं स्थिते द्विर्वचनेचीत्यत्र। अचीत्यस्यानुवृत्तौ शुशुवतुरित्यत्रोवङ्स्था
नादेशत्वाद्विवसंप्रसारणस्यापि स्थानिवद्भावः स्यात्। तथा च शिश्वाय शिश्वियतुरित्याद्यनिष्टमापद्येत। न च संप्रसारणं

२६ तदाश्रयं च बलवदिति तिवाघवस्थायामेव संप्रसारणप्रवृत्तेरचीति नास्तीति वाच्यं। एवमपि व्यतिशुश्रुवातेद्वित्वादेर्दोषध्रौव्यात्।
न च विभाषाश्वेरिति लावस्थायामेव प्रवर्तत इति वाच्यं। एवमपि ईजाते ईजाथे इत्यादौ दोषतादवस्थ्यात्। लावस्थायां कृत्वेति विधा
नेन तत्र संप्रसारणाप्रवृत्तेः॥ न चाकित्वमपि प्रवर्त्ततामिति वाच्यं। अंतरंगैरपि बाधिर्बाधितत्वात्। किंच। स्वापेश्चङी
ति संप्रसारणे असूषुपत् इति इष्यते। स्थानिवद्भावे तु सति न संप्रसारण इति निषेधाद् व्यासेऽरूवर्णो न श्रूयेतेति
दिक्। तंत्रावृत्त्यैकशेषाणामन्यतमाश्रयणादिह कालावधारणमपि क्रियते। तथा च व्याख्यातं। द्वित्वे कर्तव्ये इति।
तेन चक्रतुरित्यादावुत्तरखंडे पुनर्यथायथं यणादयो भवंत्येव। अन्यथा प्रकृतिभाव एव स्यात्॥ नेन्यतुरित्यत्र
तु प्रथममप्रवृत्तस्यापि इयङो द्वित्वकालेऽपहारात्पुनः प्राप्तोऽथमेरत्ने कौचदिति यणा बाध्यते॥ यद्वा। पूर्वमपीयङ्
न प्रवर्त्तते। प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशत इति न्यायात्। यद्वा। आभीयत्वेनेयङोऽसिद्धत्वात् यणभाविष्य
ति॥ स्यादेतत्॥ स्थानिवत्सूत्रे ग्रहणं निवर्त्यानजं चानुवर्त्य द्विर्वचने निमित्ते चि अच आदेशो न स्याद्द्विर्वचने कार्ये इत्येव व्या
ख्यायतां॥ एवं हि सति स्थानिवदिति शब्दाधिकारकृतो गौरवोशोऽपि न भवतीति। सत्यं॥ अस्मिन्नपि पक्षे नत्रः स्वरित
त्वं प्रतिज्ञातव्यं॥ स्थानिवद्वद्स्य तु कृत्स्नमेव तदिति लाघवं॥ अस्तु वा व्याख्याद्वयमपि फले विशेषाभावादिति
दिक्। नन्वेवमपि णौ स्थानिवद्वचनं कर्त्तव्यं। नुनावयिषति चुक्षावयिषति तुष्टावयिषतीत्याद्यर्थं। अत्राहुः।
ओः पुयण्जिषु वचनं ज्ञापकं णौ स्थानिवद्भावस्येति। अस्यार्थः॥ यो तेः पूर्वं स्थासनी वंतेति स्मिन् पूर्वं श्वे

रं जश्शाभिनि स्स त्राभ्यां इति वृत्ते प्यियविघातिपिपाविष ते इत्स मं ह्रर्वं चने चीति स्थानिवद्भावाद्यकारपकारयोरवर्णपरयोः परतो यद्यप्यभ्या स उकारो लभ्य
ते। तस्य चेकाशादेशत्वविधानेन ओः पुयण्ज्यपरे इत्स त्रेप कारयकार ग्रहणं चरितार्थं। तथा च वर्णग्रहणं प्रत्याहारग्रहणं जग्रहणं च ज्ञापकं द्वित्वनिमित्तेऽस्या
चोत्ति वाध्यवधानेपि स्थानिवद्भावः प्रवर्तत इति। तं विना अवर्णपरेषु पुयण्ज्जिषु परेषु उवर्णं न स्यात् स्यात् स स्य दुर्लभत्वात्। येन नाव्यवधानं
चत्ति त्वैवेकृतद्वित्वनिमित्तस्याचो व्यवधानं माश्रीयते। तेनतिनतनीषिषती त्यादौ न स्थानिवत्। न्युः स्य स्यः ज्यां व्यवधानात्। एवं लिजता
तन्युः स्य चूः सतूः स्वपिन स्थानिवत्। तितावयिषतीत्यादि। नहि लोके कृतं स्थानिवदिति वचनमस्ति किंतु ज्ञाप्यमानः स्थानिवद्भावो ला
घवादेकेनैव व्यवधानं इत्युक्तं। इह त्वनेकेन व्यवधानं स्यष्टमेव। यद्यप्यनूद्य भाकारे शविशेषणं ... द्विषू पवि भावानोपतिष्ठते।
तथापि अचीत्यो पश्लेषविक सप्तमी वेङादेव तदर्थः पर्यवस्यतीत्यपि द्विप्रकृष्टत्ना मेवनासंतति प्रकृष्टस्य ग्रहणमिति बोध्यं। वस्तुत
स्तुपर्हस्मिन्निस्यानुवर्तत इति सूत्रोपक्रम एवोक्तं। एवं चावीभवत् अभीमवत् अशीरवत् अचीलवदित्यादिषु विभावयिषतीत्यादि
षु च ओः पुयण्जि नीत्वं प्रवर्तते। ज्ञापनफलं तु यत्र ओः पुयण्जिस्य स्यात्प्राप्तिस्तत्र बोध्यं। तद्यथा। पुक्षावयिषति। उडु इवाचरति
उडवति। उडवतेर्लो सनू। उडुडावयिषति। चङि। औडूडवत्। तुतावयिषति। अतूतवत्। सौत्रोयं तुरुस्तुशाम्यस्य त्रनिर्दिष्टः। दुर्लडुनाव
यिषति। औलूनवत्। चिस्फुरोर्णौ वियात्वस्य स्थानित्वैज्ञावात् पुस्फारयिषति। अपुस्फरत् इत्यादि बोध्यं। तुल्यजातीयापेक्षं च ज्ञा
पकं। तेन अवर्णपरे हल्येव स्थानिवत्त्वं। तेनाचिकीर्तदित्यादौ नातिप्रसंग इति भाष्ये स्थितं। यत्तु काशिकायां पूर्वत्रासिद्धमिति स्
त्रे वहेर्निष्ठायां तास्मिंचि चङि औजढदित्युदाहृत्य। किन्ते तस्य तु औजिढदित्युक्तं। तत्रैव न्यासेपि लोकस्य टिलोपस्य स्थानिवद्भावइति
व्याख्यातं तदुभयं भाष्यविरुद्धत्वादुपेक्ष्यं। अचिकीर्तदित्यस्य सिद्धये अवर्णपरधात्वक्षरविषयकमेव ज्ञापकमिति स्पष्टं भाष्ये। प्रकृत

27

सूत्रभाष्यास्यान परे वार्त्तिके अव्याप्तिरूपदोषोद्भावनपरे एओङ् ऐऔजिति तु देशास्य चुटुतु शब्दात्तौ देरित्यादि भाष्येणाप्ययमर्थो लभ्यते इत्यनुपदमेव स्फुटीकरिष्यते । अत एव शुष्किकाशुष्कि जङ्घा चक्षामिमानोजिडथेति वैयाघ्रपद्यवार्त्तिके जिशब्द एव पठ्यते । नशब्दपाठस्तु क्वचित्कः प्रामादिक एवेति वोपदेवो दुर्गसिंहादिसंमतिप्रदर्शनपूर्वकं कामधेनौ स्थापितवान् । वैयाघ्रपद्यवार्त्तिकं तु पूर्वत्रासिद्धमिति सूत्रस्य प्रयोजनं रूपसिद्धपपरं तत्र लक्ष्यमनेन सूत्रेण व्याख्यास्यामः । एवं चाककपदे लक्ष्यतो चेसस्य चडिः सत्या चूकद्वित्वे नाचिकदित्येवरूपं नत्वा चकदिति । न चैवमदंतपाठवैयर्थ्यं स्यादिति वाच्यं । तत्सामर्थ्याद्दल्लोपस्याप्रवृत्तौ सत्यां द्विपुकोश्च सति तोरकापयतीति रूपाभ्युपगमात् । न चैवं सत्यं ककपतीति रूपं न स्यादिति वाच्यं । सूचि सूत्रीत्यादिवार्त्तिके सोसूच्यते सो सूत्र्यते इत्यादिभाष्योदाहरणेन पक्षे अल्लोपस्याभ्युपगमात् । सूचि सूत्र्यादेयोग्यदंता । अत एवानेकाच्त्वेन घोपदेशत्वाभावान्नपत्वं । घोपदेशलक्षणे हि एकाच्त्वं विवक्षितमिति माधवीयस्पष्टं । एतच्च असमगादिपर्युदासात् स्विदादिसाहचर्यात् सोसूच्यते इत्यादिभाष्योदाहरणाच्च अनित्यो यत इति वक्ष्यते । एवं चाव्यशेशंसमर्थयिष्यामहे प्रार्थनाध्यवसाययोः संप्रश्नप्रार्थनेषु लिङ् इत्यादिप्रयोगाश्चेह मानं । तदेतत्सकलमभिसंधाय अदंतत्वसार्थक्याय वा अल्लोपइत्याहुः । उक्तं च कामधेनौ ॥ अल्लोपित्वं स्यान्निवर्त्यं चादंतत्वप्रयोजनं । यत्रत्वेतेन विधेयत्वाल्लोपविकल्पनं इति । कथयत्याद्यभिप्रायेण पूर्वार्द्धं । अंकयत्याद्यभिप्रायं तूत्तरार्द्धमिति विवेकः । नन्वाचिकदित्यत्र दीर्घोल्लघोरिति प्राप्नोत्यन्लोप इति निषेधे नारभ्यरितार्थ इति चेन्न । चङ्परेणौ यदंगं तस्य योभ्यास इति सूत्रार्थव्यवस्थापनात् । इह त्वंगावयवस्याभ्यासो नत्वंगस्य । एतच्च ओणृधातो माधवग्रंथे स्पष्टं । अत एव आटिटत् इत्यादौ न दीर्घः । यत्तु दीर्घविधौ हलादेरिति विशेषणं कौमुद्यां दत्तं तन्निर्मूलं । ओणेर्न वदित्यादेः सिद्धान्तमिति धुनीस्तत्र चङ्परे इत्यंगस्य विशेषणं लघोर्वेति मतभेदेनेष्यमाणो अचिचकासदच चकासदिति रूपद्वयेप्यतिप्रसक्तं च । दीर्घविधौ

चङ्परइत्यस्य लघुविशेषणतामाश्रित्यार्थसिद्धकथनं तदितिवा समाधेयं। सिद्धांतेतु माधवो न्वरीस्माउर्णावयतेरिव चकासयतेरपि दीर्घाभा
वः स्पष्ट एवेतिदिक्। एतच्च सूत्रं वार्तिककारः प्रत्याचख्यौ। तथाहि। षष्ठे द्वित्वप्रकरणे ते विप्रतिषेधः पठ्यते। द्विर्वचनं यणयवायावाल्लोपो
पधालोपणिलोपकिकिनोरुत्वेभ्य इति। तथा च दध्य इत्यादौ सावकाशो यणः। चयनं चायक इ नवनं लावक इत्यादौ चायवायावः। गोदः कंबलद इत्या
दावाल्लोपः श्लेष्मघ्न इत्यादावुपधालोपः कारणा हारक इत्यादौ णिलोपः निकूर्ती इत्यादावुत्वं चैतानि नव बिभिदतुरित्यादौ सावकाशो न द्वित्वेन पू
र्वविप्रतिषेधाद्बाध्यंते तेन चक्रतुः चिचायतुः लुलाव चिचायिथ लुलविथ पपतुः तस्थतुः जग्मतुः जघ्नतुः आटिटत् ततुरिः जगुरिः इत्यादि सि
द्धं। नन्वेवं निन्यतुरिति न स्यात्। तस्मात् द्विर्वचनेचीति सूत्रं विनापि सर्वं सिद्धमिति। भाष्यकारास्तु सूत्रं समर्थयंते। तथाहि। विप्रतिषेधस्ताव
दयुक्तः। आल्लोपादीनां नित्यत्वात्। द्वित्वस्यानित्यत्वेनातुल्यबलत्वात्। किंचापूर्वविप्रतिषेधे सर्वत्र वचनस्यारंभणीयत्वादिहतु सुतरां
तथेति च लाघवं। अपि च क्रियमाणमपि वचनं यणं तरंगाणामपि बाधकं नहि तिनवनीयिषतीत्यादावभ्यासे उकारः श्रूयेत। अथात्रा

अदर्शनं लोपः। स्थानेऽन्यतुवर्त्ततो जदर्थत्वप्रसंगेऽइति प्रसक्तस्यानुच्चारणं लोपसंज्ञं स्यात्। सं
ज्ञाप्रदेशा लोपो व्यो [redacted] र्वलीत्यादयः। अर्थस्यैषा संज्ञा तन्तु शब्दस्या। महासंज्ञाकरणसामर्थ्या
लोपसं ३ न्नानन्वेवं प्रदेशेष्वेव लोप इति लौकिकोऽर्थो गृहीष्यते। पश्चेऽपत्यं देवतेति वत्। ननु किं संज्ञयेति चे
न्न प्रसक्तस्येत्येवं रूप विशेषलाभाय सूत्रारंभात्। अन्यथा दधिमध्वित्यादौ नुगागमप्रसंगात्
असिद्धि इत्यत्र क्विपो दर्शनं ततश्च लोप इति प्रत्ययलक्षणापत्तेः। नन्वस्त्वेवं वार्त्तिकमते। भाष्यमते तु प्र
त्ययलक्षणसूत्रं नियमार्थं तत्कथं दध्यादौ नुक्प्रसंगः। स्थानिवत्सूत्रे तु न तु कं प्रवर्त्तयति। षष्ठीग्रह
त णस्य तत्रानुवर्त्तित्वात्। अत एव ग्रामणीरित्यादौ अणकार्यं न भवति। तथा च भाष्यरीत्यासंहिता
वसानयोर्लोकसिद्धत्वादिति वक्ष्यमाणन्यायेनेदमपि सूत्रं मास्त्विति चेन्न। घटं करोति ग्रामे तिष्ठती
त्यादौ ल्यब्लोप इति पंचम्यापत्तेः। अग्निमीळ इत्यादौ चादिलोप इति निपातप्रतिषेधापत्तेश्च। आरब्धे तु सू
च १ त्रे तत्र लौकिकः। शास्त्रतो वाल्यपश्चादीनां चाप्रसक्तत्वान्नोक्तदोषः। ननु वार्त्तिकमते प्रसक्तस्येत्युक्तेऽपि ग्रामणीरित्य

त्रवृद्धिस्यात्। कर्मण्यण इति प्रसंगस्त्वादिति चेन्न। वासरूपन्यायेन पक्षे णः संभवेपि क्विप्पक्षे तेनाणः प्रसं
गस्य बाधितत्वात्। वैकल्पिकयोरेकानुष्ठाने तस्मिन्प्रयोगे इतरानुष्ठापकशास्त्रप्रामाण्यस्य शास्त्रसिद्धत्वात्।
प्रत्ययस्य लुक्श्लुलुपः। अनेकसंज्ञाकरणसामर्थ्यात्तत्राहत्याद्याश्रित्य तज्ज्ञापितसंज्ञा इह विज्ञायते। लुक्श्लुप
शब्दैस्तं प्रत्ययादर्शनं क्रमादेतत्संज्ञं स्यात्। संज्ञाप्रदेशाः लुक् क्षित्रलुकि। जुहोत्यादिभ्यः श्लुः। जनपदे लुबिति।
विधिप्रदेशेषु भाविसंज्ञाविज्ञानान्न्यायोऽश्रयः। विशेषविहिता अप्येताः संज्ञा लोपसंज्ञानं बाधन्ते एकसंज्ञाधि
कारादन्यसंज्ञानां बाध्यबाधकभावो नास्तीति कडारसूत्रे वक्ष्यमाणत्वात्। प्रत्ययस्येति शक्यमकर्तुं तच्च वलु
क्तद्धितलुकीति विधीयमानमदर्शनं गोस्त्रियोरित्यनुवृत्तेर्गोशब्दस्यापि स्यादिति वाच्यं गोरुपसर्जनस्येति यो
गविभज्य स्त्रियाः लुक्तद्धितलुकीति सूत्रे स्त्रीग्रहणस्यैवानुवृत्तेः संभवात्। अन्यथा प्रत्ययग्रहणे कृते
पि गमेर्लुक्स्यात्। कंसीयपरशव्ययोर्यञञौ लुक्चेति लुगपि प्रकृतेर्न भविष्यतीत्याह। प्रातिपदिकादित्य
धिकारात्प्रातिपदिकात्परस्य लुग्विधानात्। तान्हकेपि हि प्रत्ययग्रहणे कमेः सः कंसः परान्शृणातिपरश्शु
रिति उकारसकारयोर्लुक्प्राप्नुयात् एवमेवपरिहृतं। तच्चैवं यञञोरेव लुगस्तु विधानसामर्थ्यात्। त्वयत्र अमलु
क्विकल्पः। वैयत्तु किंस्तु यञभ्यां मुक्तेरौत्सर्गिकस्याश्रवणं माभूदित्येवमर्थमिति वाच्यं यञमलुकामे

घुघुलोस्तु हूनेसत्र तु घकाल तने छिति अनद्यतनेल इति तिच ज्ञापका हू कयमेद मात्रिमेस १

ककालप्रतीतानामुद्देश्यविधेयभावासंभवात्। घुघुलोक्तदूषीयते। तस्मादप्रत्ययनिवृत्तये तावर्तनग्रहणानर्थ-
क्यं। स्थानिविशेषसमर्पणार्थमपि न। यथाहि अत्रिभृगुकुत्सेत्यत्र तावत् यस्कादिभ्यो गोत्र इत्यतो गोत्र इत्यनुवर्त्त-
ते ३ ते। नात्र्यादिभ्यो गोत्रे यो विहितस्तस्य लुक् सिद्धः। जनपदे लुबित्यत्र तु ङ्याप्प्रातिपदिकात्प्रत्यय इत्यनुवृत्तेः जनप-
२ दे विहितस्य चातुरर्थिकप्रत्ययस्य लुप्। लवणाल्लुगित्यत्र प्रकृतत्वाट्ठक एव। सर्वत्रापीह प्रत्ययस्येत्यस्य षष्ठी कल्प-
यिष्यते। तस्मादित्युत्तरस्येति। स्यादेतत्। सर्वादेशार्थं प्रत्ययग्रहणं। तेन यञञोश्च। सुपो धातुप्रातिपदिकयोरि-
त्यादिषु यत्रानेकाल् प्रत्ययस्तत्रालोऽन्त्यस्येति न भवति। तथा लवणाल्लुगित्यादावादेः परस्येति न भवतीति मे
वं ज्ञापकादेव सर्वादेशत्वसिद्धेः। घो लोपो लेटि वेति हि लोपे प्रकृते लुग्वा दुहेति लुग्ग्रहणं ज्ञापयति लुगादयः
सर्वादेशा इति। अलोऽन्त्यस्य सर्वदर्शनं प्रकृते न लोपेनापि सिद्धं। नन्वेवं परीत्यापत्तिः॥ असंज्ञातविरोधित्वेन लोपे
८ ऽलोन्त्यपरिभाषाप्रवृत्तेः। सामान्येन लुमता विषयं ज्ञापकं न तु लुङ्मात्रविषयमिति सर्वं सिद्धं। स्यादेतत्। आग- त
स्त्यकौडिन्ययोरित्यत्र लुगणोः अरित्यतो लुग्ग्रहणमनुवर्त्तते न वा। आद्ये स्यानिर्नोह्यौ आदेशास्तु लुका सह
त२ त्रय इति विषम्या यथासंख्याभावे एकैकस्य पक्ष आदेशाः पर्यायेण स्युः तत्र आगस्त्या अपि कुण्डिनाः स्युः। कुण्डिनाश्चा-
गस्तयः स्युः लुक् क्रियमाणो ज्ञापकात्सर्वादेश इति उभयत्रापि विभक्तिमात्रे श्रूयेत। अथ निवृत्तं तेनागस्तयः कुण्डि

कः २

त्वा१ नु१ आ१

नाइत्यत्र न कश्चिद्दोषः किंतु अगस्तीनां छान्नाग स्तीया इत्यत्र प्राग्दीव्यतीये अजादौ प्रत्यये विवक्षिते प्यगस्त्यादे
शस्य निषेधाभावाद निवृत्तेऽपवदृ इष्टो स्यात् प्रत्ययग्रहणोपलक्षितिलुग्ग्रहणानुवृत्त्या अगस्त्यकौण्डिन्ययोः प्रत्ययाश्र
स्य लुग्भवति अवशिष्टभागयोर्यथासंख्यं अगस्तिकुण्डिनचौ ततो नागस्तयः कौण्डिना इति सिद्धं प्राग्दीव्यतीये
विवक्षिते तु गोत्रे लुगचीति लुकि प्रतिषिद्धे तत्संनियोगशिष्टत्वादगस्त्यादेशो पि निवृत्ते अगस्त्यशब्दाद्वृद्धे
दृत्ते सूर्य तिष्य इति यलोपे चागस्तीया इति सिध्यति कौण्डिन्ये तु नास्ति विशेषः निवृत्तेपि कुण्डिनजादेशे कौण्डिन्यशब्दा
दपि कण्वादिभ्यो गोत्र इत्यणि कृते आपत्यस्येति यलोपे कौण्डिनाः स्य एव भवितव्यं तस्मादगस्त्यकौण्डिन्य [redacted]
[redacted] योरित्यत्रावश्यमनुवर्त्यो लुग्ग्रहणं तत्त्वेह प्रत्ययग्रहणमपि कर्त्तव्यमेवेति नैवं अगस्त्यकौण्डिन्ययो
रित्यत्र यस्कादिभ्यो गोत्र इति गोत्रग्रहणमनुवर्त्य गोत्रे यो विहितस्तस्य लुगिति व्याख्यानेनापि इष्टसिद्धे
तस्मात्प्रत्ययग्रहणमिह मास्त्विति स्थितं स्यादेतत् एवं सति लोपसंज्ञया सह लुगादिसंज्ञानां तुल्यव्यक्ति
तं ३ कत्वं स्यात् तद्भाविस्य संज्ञेति चेत् अविशेषाल्लोपेपि तथा स्यात् उच्यते असंज्ञात्वविरोधित्वाल्लोपसंज्ञाता
वददर्शनमात्रस्य भवति लुगादिसंज्ञासु परं अनेकसंज्ञाप्रणयनसामर्थ्यात् तद्भावितग्रहः तेन संज्ञासंकरोनेत्पु
क्तौ सति तु संकरे हन्तीति शब्दुकिस्त्राविति द्वित्वं स्यात् जुहोत्यत्र श्लौ सतितु तो वृद्धिरिति वृद्धिः स्यात् न च तत्राभ्यस्तस्य

नी१ ढ१

नेत्यत्र तु वृत्ते पर्याप्नोति नो नो नीत्यादावि विवक्षितं भविष्यतीति वाच्यं संज्ञासंकरप्रसङ्गेन तदनुपपत्तेः संभवात् अन्यथा सूत्रस्य
प ति र्विषयत्वापत्तेः नच यौति योजीत्यादिरवकाशः संज्ञासंकरेण त्वापि द्वित्वस्य दुर्वारत्वात् लोपसंज्ञा तु लुगादिसंज्ञानां व्या
पिकेत्युक्तं तेन पंचेत्यादौ प्रत्ययलक्षणं सिध्यतीति दिक् ॥ भाष्यमतं तु यद्यपि स्थानिवत्सूत्रेण पंचेत्यादि सिद्धं तथापि ते
सुदृषद्वा हलणाइत्यत्र वक्ष्यमाणरीत्या उत्तरपदाद्युदात्तत्वस्य तु पधादीर्घस्य च वारणाय लोपे सति प्रत्ययलक्षणं
एवेति नियमो वश्यं भवत्रे तीयं तथा च [redacted] तत्र लुक प्रत्ययसंज्ञाप्यादर्तव्ये त्यवधेयं ॥ प्रत्ययलोपे प्रत्ययलक्षणं
॥ ॥ प्रत्यये लुप्ते पि तदाश्रयं कार्यं स्यात् अल्विध्यर्थमिदमिति वार्त्तिकमतं तथा हि अत्र गोडित्यत्र तिहलङ्यादिलोपे पो
कृते तत्र णहइमिति सूत्रेण विधीयमानो हलादिपित्त्वार्धधातुकतिप्याइ माग मोस्मा हञ्च नाइ्ववति स्थानिवत्सूत्रेणातु न
सिध्यति अल्विधित्वात् नन्वेवं प्रत्ययलक्षणमपि न स्यात् वर्णाश्रयेनास्ति प्रत्ययलक्षणमिति निषेधादिति चे
न्न स्यैवं रूपं वचनमस्ति किंतु प्रकृतसूत्रे प्रत्ययलोपेत ल्लक्षणं इत्येवास्तु यद्वा तल्लक्षणमित्यपि मास्तु स्थानि
ब वदित्यनेनैवेष्टसिद्धेः एवं सति प्रत्ययलक्षणमित्युक्तेः फलं तत्पष्ठ्यते पुनः प्रत्ययग्रहणसामर्थ्यात् द्वियत्कार्यं प्रतिप्र
त्ययस्यासाधारणं रूपं निमित्तं तया श्रीयते स एव प्रतिइत्वादि तदेव भवतीति लभ्यते तेन गवे हितं गोहितमित्यत्रवादेशो
न भवति तद्धि धातुत्वमात्राश्रयत्वात् तस्य च प्रत्ययाप्रत्ययसाधारणात् अथात्र ननु मतेति निषेधः तद्धि स्तुय

कः 3

शाः इत्युत्पन्नविसर्जनीयस्य सः स्यात्सुकुडित्यादौ रेखरिचेति च त्वं स्यादिति रिक्त इड्मागमे तु हलादौ सार्वधातुक इति प्र
त्ययस्यैव प्राधान्येनाश्रीयते इति वैषम्यात्तस्मादृर्णा प्राधान्ये प्रत्ययलक्षणं नास्ति प्रत्ययप्राधान्ये त्वस्तीति विवेकः। त्वृ
न२ तेनैवन्यायेन न धातु [redacted] लोप इति बहुव्रीहिणो वसिद्धेत्याह धातुकग्रहणसामर्थ्यात्तत्त्वेन निमित्तता लभ्यते तु धिन्वि ते २
कृण्व्यो विचि लोपो व्योरिति च लोपस्य वलि निमित्तत्वात्तत्राह धातुकतया विचो निमित्तत्वाभावाद्गुणो भवत्येवेति तेन सु
धे सुधेनौ सुधेनः सुकः सुकेरौ सुकरा इत्यादि भवति। पठन्ति चा सुधेसुधेवा रिवधात्सु राणां सुकारेणोला घवन्तश्च रामः। वि
८ शेषणो ह्ययमिहादिकर्तुर्वेद धीति सहिकेयटीयेइति। न च तोतो [redacted] न्त्यादित्यावृत्त्या आर्धधातुकग्रहणस्य सार्थक्या
त्कथं सामर्थ्यमिति वाच्यं यइलुकण्व्यादसत्वात्भाषाविषयत्वपक्षे तु आर्धधातुकग्रहणमावश्यं सामर्थ्यमुपपा
कृ॰ ई। पृ॰ ई स्मिन्न दनीयं न न्वेतत्किं तिचेत्यत्र सूत्रस्य भाष्ये समृद्धि धातुकग्रहणं दत्तवकाशमिति तत्रोक्तत्वादिति चेन्न। [redacted] न ५
को नेयपलर्ध ५ आतामस्य यात्तथोक्तत्वादित्याहुः। तदुपष्टंभेनात्र विज्ञेवान भिमत इत्येव किं न स्यादिति चिंत्य
। किपि तु शतेन धिनः। धिन्वो धिन्वः कृणः। कृणो वाकृ एवइति भवति। सुधी सुधिनौ सुधिनः सुकीः सुकृणौ सुकृणाइ
त्यादि तु न भवत्येवेत्याहुः। यइलुको भाषाविषयत्वे आर्धधातुकग्रहणस्य तौ तौ त्यत्र चारितार्थ्यादादृत्तो चिमा तो
नाभावाद्गुणनिषेधप्रवृत्त्या सुधी सुधिना वित्ये वा सुकृणोति सुदीं सुकीः सुकी रौ सुकीरा इत्यादि भवत्वित्यपि
ई धै ३

चिंत्यं। नन्वेवं परिवीरित्यत्र तु दीर्घौ पर्यायेण स्यातां अनेनैवोभयविधाने यौगपद्याभावेन विप्रतिषेधे परमित्यस्या
प्रवृत्तेः। सत्यं। शास्त्रातिदेशस्य व्यपदेशातिदेशस्य वाश्रयणाद्दोषः। यद्वा। सति प्रत्यये यत्कार्यं भवितुमर्हति तदेवा
तिदिश्यत इति परिवीयेत्यादाविव परिवीरित्यत्रापि दीर्घ एव भवति न तु गिति कार्यातिदेशेऽप्यदोषः। भाष्यका
रास्त्वाहुः। तृणह इमित्यर्थेन तावदिदं सूत्रं। अस्यानिवत्सूत्रे शेषवचनार्थत्वात्। न चाल्विधिरयं हलीत्यस्य निवर्तनात्। न चैवं तृ
णह्नि नीत्यत्रापीमस्यादिति वाच्यं। नाभ्यस्तस्याचीत्यतोऽचीत्यनुवर्तनात्। न प्राशीरित्यत्र शासइदङ्हलोरि
त्त्वार्थमिदं। आशासः क्वावुपसंख्यानेनैव सिद्धेः। तद्धि ल्यप्यपि वाच्यं। शासइदङ्हलोरित्यत्र शासिमात्रग्रहणमि ह
क्षे तिपक्षे नियमार्थं आशासः क्वावेव यथा स्यात्। आशास्त इत्यादौ माभूदिति। यस्माच्छासेरङि हितस्तस्यैवाङः सा
हचर्यादित्वविधौ ग्रहणमिति पक्षे यथा आशास्त इत्यादौ न भवति तथा क्विप्यपि न स्यादिति विध्यर्थे तस्मात्प्र
त्ययलोपे सति प्रत्ययलक्षणमेवेति नियमार्थमिदं सूत्रं। प्रत्ययाप्रत्ययसाधारणं रूपमाश्रित्य यत्कार्यं वि
धीयते तन्निवृत्तिफलं तेन शोभना दृषदोऽस्य प्रासादस्य सः सुदृषत्। अत्र नसोर्मनसोः अलोमोषसः इति सूत्रेण
सुशब्दस्य परस्य मन्नन्तस्य असन्तस्य चोत्तरपदस्य बहुव्रीहौ विधीयमानमाद्युदात्तत्वं न भवति। अत्र हि लुप्तेऽपि
जसि स्यानिवद्भावेन असन्तमुत्तरपदमस्य वा। किं तु अस इति हि प्रत्ययाप्रत्यय साधारणं। अनिनस्म
पं

विधिरत्यंतमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥ ६

ते३ स्व२

५ न्ग्रहणान्यर्थवत्ता चानर्थकेन च तदंतविधिं प्रयोजयंतीति वक्ष्यमाणत्वात् । अतो नियमेनाशुद्धरात्त्व्यावृत्तिः सि
द्धा तथा च तन्नेस्तुभ्यामित्यतो दातृतं परं भवति । इस्तूवधेयान केवलं स्वरार्थमेवेदं सूत्रं । किंतु उक्तोदाहरणे एव प्राप्नुव
प न्नत्वसंतस्पेत्तुधादीर्घाधिक्तो नियमेनैव व्यावर्त्यः । वार्त्तिकमतं तु उक्तौ रस्पदीर्घप्राप्तेश्च सिद्धये उपायांतरमन्वे
षणीयमिति । ननु यदि नियमार्थं सूत्रं तर्हि पचेत्यत्र प्रत्ययलक्षणेन पदत्वमिति वृत्तिः कथं योज्या । एवं सम
द सत्वात्प्राप्तिपाक्षिकत्वं स्तुक्रमो रितीः । उभयप्राप्तौ कर्मणि षष्ठी इत्यादेर्याप्तिनात्राभियुक्तैर्व्याख्यातं योज्या इ कर्मणीति
ति । अत्रोच्यते योस्माकं नियमविधिः स मीमांसकरीत्या परिसंख्याविधिरिति तावत्स्य एवं विवरणादौ । तद्दोषत्र त्र
क यं स्वार्थहानिः परार्थपरिकल्पना प्राप्तबाधश्चेति । तत्र च यद्यपि गत्यास हतरइति पक्षस्तदा नियमविधेर्निषेधस्य वार्थः ।
ल प्रत्ययलक्षणशब्देन तन्निर्लक्षणं भवतीत्यनेन तु न भवतीति । ध्यासस्थानेंतरतमसूत्रे भाष्यं । नानेनांतरतमानि तप
व वर्त्यंते अपि तु अनंतरतमानि वर्त्यंत इति । अत एव वार्त्तिककारोपि वक्ष्यति उभयप्राप्तौ कर्मणीति प्रतिषेधे
ऽकादिप्रयोगे ऽप्रतिषेध इति । अस्मिन्पक्षे उभयप्राप्ताविति परिशेषिता षष्ठीत्यादिकमेण व्याख्येयं । ननु वि
हितेति । यदि तु दोषत्रयगौरवपरिहारार्थं प्रत्ययलक्षणसूत्रं यथाश्रुतं व्याख्याय अत एव ज्ञापकात्स्थानिवत्सू
त्रस्य प्रत्ययलोपे तरविषयता कल्प्यते । सामान्यपुरस्कारप्रवृत्तस्य शास्त्रस्य विशेषतात्पर्यं हि त्वयापिक

ल्प्यमेवान्यथाविकल्पापत्तेः। भाष्यमते नलोपशीकरोतीत्यन्वयथापदेशुहोतीत्यादिविधिभिराहवनीयवि
धेरिव विशेषविधिना सामान्यविधेः संकोचसंभवात्। नन्वेवं सामान्यस्य विशेषेऽनुपसंहारापत्तिः। सामान्य
शास्त्रप्रणयनवैयर्थ्यापत्तेः। विशेषेणु न कश्चित्प्रयोजनायेनैवं पर्यन्त्युयुज्येतेति चेन्नाधीकरणस्यागेयेऽनुपसंहारो मीमां
सकामभ्युपेतः। कल्पसूत्रकारास्तु तत्रापि विकल्पमेवाभ्युपगच्छन्ति भगवता कात्यायनेन सूत्रितं। अविशेषाद्वाभवेति। ए
वं च सामान्यशास्त्रस्य विशेषे लक्षणया उभयवाच्यत्वान्नयेवोपपत्तौ दोषत्रयं न सोढव्यमिति पक्षान्तरादाहुरहन्तयथाः
सम्यगेवं नैयायिकमते तु तात्पर्यसंकोचस्य स्थले लक्षणानास्त्येवेति विवादः। विशेषधर्मप्रकारकबोधस्योद्देश्यतया
मेवतदभ्युपगमात्। सामान्यप्रकारस्य विशेषविशिष्टकस्यापि लक्षणां विना निर्वाहादिति सुधीभिराकलनीयं॥ ॥
न लुमताङ्गस्य॥ ॥लुमताशब्देन प्रत्ययलोपे सति प्रत्ययलक्षणमङ्गस्य कार्यं न स्यात्। वार्त्तिकमते पूर्वसूत्रप्राप्तस्यायं नि प्रा ५
षेधः। भाष्यमते तु स्थानिवत्सूत्रप्राप्तस्य। नियमविधीनां तात्पर्यसंकोचकत्वमात्रं न तु निषेधकत्वमिति प्रागुक्तरीत्या तु
भाष्यमतेपि पूर्वसूत्रप्राप्तस्यायं निषेध इत्यवधेयं। एवमग्रेपि। गर्गाः। मृष्टः। जुहुतः। इह यञ्शपोर्लुमता लुप्तयोरंग
स्य गुणवृद्धी न भवतः। लुमतेति किं। कार्यते। हार्यते। ओरनिटी णिलोपे कृते णिज्पेक्षवृद्धिर्भवत्येव। अमार्ट्। ह
लङ्यादिलोपे निष्पन्नावस्थायां कृते पि वृद्धिः। अङ्गस्येति किं। पंचासमा। अंगस्येति स्वर्यते। नेतोगाधिकारेण रक्षते। स्वारितेना

निमलत्वादिति। अयं चक्रमोलुम इह ण्भावे नेदितव्यः। ... परत्वाद्वृद्धौ ... तदेतत्सूत्रे ... ॥ २

5 धिकार इति वचनादिति वार्त्तिककाराः। भाष्ये तु इड्दंद्रुषि जंतत्था हि एवं सति क्रामेत्यत्रातो हेरिति हेर्लुकि कृते क्रमः
परस्मैपदेष्विति दीर्घो न स्यात्। तथा जिगमिषेत्यत्र गमेरिट् परस्मैपदेष्विति इण्न स्यात्। तथा विवृत्सेत्यत्र न वृद्भ्यश्च
तुर्भ्य इति इण्निषेधो न स्यात्। तस्मात् लुमतेत्यत्र नांगाधिकारः प्रतिनिर्दिश्यते। किंतु लुमता लुप्ते प्रत्यये यदंगं तस्यांग
गमनं गं च सर्वं प्रतिषिध्यत इति। नन्वेवमुक्तदोषतादवस्थ्यमिति वाच्यं। इक्रामेत्यत्र लुप्तं परस्मैपदं तदपेक्ष्याप
दंगं [illegible]श बेतं न तस्य दीर्घो विधीयते। किंतु क्रमेः। स तु शपं प्रत्यंगं न तु लुप्तं प्रतीति निषेधाप्रवृत्तौ प्रत्ययलक्षणेन
दीर्घप्रवृत्तेः। एवं जिगमिष विवृत्सेत्यत्रापि इटो विधि[illegible] प्रतिषेधो भवत एव। तो हि लुमता लुप्ते परस्मैपदे गं स्य अ पद६१
नंतस्य न क्रियेते किंतु सकारादेः प्रत्ययस्य सन्वांगं नेति स्पष्टमेवास्माकं। पक्षद्वयेपि त्रिंश्यादिर्नित्यं। किंतु पथि
मथोः सर्वनामस्थाने इति त्रिसूत्र्या विधीयमानाः स्वराः लुकि कृतेपि प्राप्नुवंति। तथा हि। गर्गाः। विदाः। य अग्नो लुकूड
ष्टग्रीवाः इत्येवं प्रतिकृता विति कुनोदेवपथादिभ्यश्चेति लुप्तंतो ञ्नित्यादिरित्याद्युदात्तत्वं प्राप्नोति। तथा त्र्यन्तेरस्यान्ति प्रा
त्र्यत्रयः इत्यत्र स्थानिवद्भावे निषेधेत्रि भरुकुत्सेत्यादिना लुकि कृते जतः कित्त्वात् क्लित्स्यात् उदात्तो भवति इत्यंतोदात्तता प्रा प्नो
तिसा हि प्रत्ययग्रहणे तदंतग्रहणात् तत्र हि तांतस्य विधीयते। ननु सिद्धांतेपि पिदिस्वरेणांतोदात्ततया भाष्यमेव
ति वाच्यं। राशदिभ्यां त्रिप्। अदेस्त्रिनिश्चेत्युणादिसूत्रेण हि अदेरस्वकारानुबंधे त्रिप्रप्रत्ययेतस्यापि लेनानुदा
५

त्रत्वाराद्युदात्तौ त्रिशब्दः। तथा च प्रयुज्यते ऽग्नेस्त्रिवृत्स्तोमं पूर्वं स्तुतिं यथा स्तोमस्त्रेः कर्माणि क्रियन्त इति। तथाऽऽकोलु
कत्प्याद्युदात्त एव प्रयुज्यते। अग्नी शतं स्तोम मादृवद् इति। अग्नी रां स्त्रराणं हवामि ति च्चाग्नि नु प्रत्ययान्तस्तु अन्तोदात्तो नका
त्रि रान्तश्चेत्पन्यदन्तात्। सोऽपि प्रयुज्यते दूरेवाये अन्तिकाके चिरे राइ ति। तथा पन्थाः प्रियो यस्य पथि प्रियः। मथि प्रियः।
सुपो धात्विति सो लुक् किप पथि मथोः सर्वनामस्थाने इत्याद्युदात्तता प्राप्नोति। नद्येषा न्त्रिसूत्री अङ्गाधिकारस्थायेन न लुम
ताङ्गस्येति निषेधः प्रवर्तते। नाप्यन्त इत्युक्तो गस्य कार्यो सुप्तिङन्तं इति पदसंज्ञादुक्तस्वराणां प्रत्ययान्तकार्यत्वात्। तन्न स्तः कित व
इति तथा ज्ञस्तु द्वयं त्रिति सर्वनामस्थाने इति सप्तमीनिर्देशाद् उक्तोऽङ्गस्य कार्यं भवत्येवेति चेन्न। त्रिदंतस्या
देरित्यादिकमेण प्रत्ययान्तस्यैव तद्विधानात्। सो वर्थः सप्तम्यन्तं तं समस्य इति सिद्धान्तात्। एतच्च भीह्रीहु मदजन भ
धनदरिद्राजागरां प्रत्ययात्पूर्वं पिति। इति पूर्वग्रहणात् ज्ञाप्यत इति तन्नैव भाष्ये स्पष्टं। अत एवोपोत्तमं रिती त्युदात्तत्वं आ
हवनीय इत्यादौ रिदन्तस्योपोत्तमे नीशब्दस्य कारे प्रवर्तते। चतुरन्यतरस्यामिति च चतुर नस्यातं चैवं चतुरश्चासौ पुत्र त्वंश संज ९
स्यस्यात्। तथा च षड्विंशाश्चतुः कल्प यत इत्यादौ चतुर् इति पदं मध्योदात्तमिष्यमाणा न सिध्येदिति वाच्यं तत्र शसग्रह
म२ णा सामर्थ्यात्तदंत संमील बाधात्। तथा हि रथा हि ऊडिदं पदा च पुम रैषु चतुर्भ्य इत्येव ब्रूयात्। तत्र हि अन्तः सर्वनामस्था
न ग्रहणानुवृत्तेः शसः एं भविष्यति। षड्त्रिचतुर्भ्यो हलादिरिति हलादेः सिद्धान्तेप्युदात्तविधानात् न चैवं स्वरविधिषु ष
व

कः ८ ष्ठेभवति ईश्पतामिति वाच्यं। रित्स्वङ्ङ् इत्याद्यपेक्षयारिरिजिचङीत्युक्तावृद्धिमात्रा लाघवं संभवेन सप्तमी प्रयोगादिति। अ
क्रा २ श्रोच्यते। अगाधिरति दिशपृक्षेतावदुक्तदोषपरिहाराय वार्त्तिकमारभ्यते। लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानं सर्व
त ३ मन्त्रैं स्मि[?] कुस्वरवर्जं प्रयोजनं तस्मिनिति किं लुकुस्वरः पथिमथः सर्वनामस्थाने लुकीति। अस्यार्थः। लुमति लुमत्संज्ञ
याप्रतिपादितेऽदर्शनेयः प्रतिषेधस्तस्मिन् एकपदाश्रयोयः स्वरस्तस्योपसंख्यानं। प्रत्ययलक्षणेन प्राप्ताप्येकपद
८५ स्वरोन भवतीत्यर्थः पैंह्याश्रयास्तु स्यादेवा यथा दधितिष्ठतीत्यत्र पदस्य पदाधिकृत्य विहितस्तिङ् तिङ् इति निघातः। दिस्य
अत्र हि दधीत्यस्य पदसंज्ञार्थं प्रत्ययलक्षणमपेक्ष्यते। तथा इह तिष्ठेत्यादौ तिङन्तत्वलाभायापि। नन्वेवं सर्वे स्तोमोभिरि
त्र इत्यत्र सर्वस्य सुपीत्याद्युदात्तत्वं न स्यात्। तथा। सर्पिरागच्छ सप्तागच्छतेत्यत्र आमन्त्रितस्य चेति आष्टमाद्युदात्तत्वं न स्या
त्। तथा। माहि दातां माहि धातामित्यत्र आदिः सिचोन्यतरस्यामित्याद्युदात्तत्वं न स्यादित्यत आह। सर्वेत्यादि। इदं स्वरत्र
यं विहाय [illegible] स्वरान्त[illegible]रे प्रतिषेधस्त्यर्थः। नच सर्वे स्तोम इत्यत्र बहुव्रीहौ प्रकृत्या पूर्वपदमिति पदद्वयस्वरोऽयमिति वा
च्यं सर्वस्य सुपीतियुदात्तस्युदात्तत्वं तस्यैव बहुत्वेन प्रकृतिभाव [illegible] मात्रकर्तृत्वात् तथा च तत्प्राप्तिरवशेषापपादयितव्योऽति
भावात्। नच स[illegible]पिःशब्दस्यामन्त्रितस्वरं विनाप्याद्युदात्तत्वालत्वशङ्क्या। अर्चिःशुचिहुसृपिछादिछर्दिभ्य इसिरि
त्यो [illegible]णादिकेइसि प्रत्यये कृते नोदात्तत्वात्। अव्युत्पत्तिपक्षे पिपिदिस्वरेणान्तर्यात्वात्। नच तद्विषयस्येत्याद्युदात्तः। अ
कृ१ ६

निसंज्ञस्येति पर्युदासात् । केयटेन तु सर्पिःशब्दस्य च ज्ञादित्वं किमर्थं कल्पितमिति चिंत्यं । ननु सञ्ज्ञशब्दः सप्पन्स्पृस्यांजुद्भे
ति कृतिनिंतो युस्यादित्तः । तथा च नित्वादाद्युदात्तः । अयुत्येति पक्षे पितर्थं वत्तः संख्याया इति स्वचना ईति चेन्न । उभयथा
पि घृत्रादित्वेनांतोदात्तत्वात् । तथा च पर्युज्यतो समन्न्युंजंति रथमेकचक्रमिति । इह सिज्ञुग्रहणं माभूत् गांतिस्येत्यत्र सि
ज्ञग्रहणसामर्थ्याल्लुकि स्वरः सिद्धः ॥ अन्यथा हिल्लाघवार्थे लुरेव लुकं विदध्यात् । एवं घभ दृपादिस्यादिसिद्धये ऽस्ति
त्र सिच इत्येतत्कांतरं प्रक्षेपकः कोशोपि नास्मयशीयइति । ननु च लुकि आतइ तिसूत्रे विध्यर्थमेव स्यान्न तु नियमार्थं ।
तथा च तत्र लङ् इति वर्त्तये च्छि लुकीति वक्तव्यं स्यादिति विपरीतगौरवापत्तिरिति वाच्यं । ङित इत्यनुवर्त्त्येव लटो युद स्तत्वा
त त् । अस्मात्सर्वो मंत्रितस्वरवर्जमित्येवावश्यकं । वार्त्तिकारंभस्य प्रयोजनमाह । प्रयोजनमिति । अन्तिशब्दस्य यौरिका
रस्वच्चारणार्थं ॥ सुद्दिश्यो रिति वत् । एते स्वरा निवर्त्यमानतया प्रयोजनमित्यर्थः । प्रयोजनांतरमाह । पाथिमथोरिति । स्वे
वचनबलेनात्र सूत्र्या अतिव्याप्तिरुद्धृतेत्यपेतीह सूत्रे स्थितं । वस्तुतस्तु नैतदर्थं वचनं किं यते ज्ञापकबलेनैव बिदागर्गा इ
त्यादेः सिद्धत्वात् । तथा च संज्ञायामुपमानमिति सूत्रे वार्त्तिकं ऽउपमानस्याद्युदात्तत्व वचनं ज्ञापकमनुबंधलक्षणोस्वरे प्र
त्ययलक्षणप्रतिषेधस्येति । अस्मिंश्च पक्षे पथिमथ्योः सर्वनामस्थाने लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वचनं कृ
तेऽयं नास्त्ययमनुबंधलक्षणः स्वरः । येनोक्तज्ञापकबलेन वार्येत । न च स्वरमात्रविषयकज्ञापकमस्त्विति वाच्यं । आमंत्रि

कौ० ७ त स्वरस्ति झुकुस्वरयोरसिद्धिप्रसंगात् नैवमपि सप्तमीनिर्दिष्टे स्वरे प्रत्ययलक्षणं न भवतीति ज्ञाप्यतामिति वाच्यं।
सर्वेस्तोमइत्यत्र आद्युदात्तासिद्धिप्रसंगात्। यद्वा। अत्र क्तस सप्तमीनिर्दिष्टस्वरविषयकमेव ज्ञापकं। सर्वेस्य सु पीत्यत्र तु
सुपीति सप्तमीमपनीय सुप इति षष्ठीपाठ्यात् तथा च षष्ठि स्वरार्थे वचनेनारंभणीयं। किं तु स्वरार्थं तु भूयत्यामपि
म नारंभणीयमिति सर्वेसूस्यापक्षद्वयेपीदं संज्ञायामुपमानमिति सूत्रे भाष्यकारैः स्पष्टमुक्तं। तदयं निर्गलितोर्थः। नि
सूत्रस्याशंकितस्यापि तु व्याप्तिदोषस्य वचनेनोद्धारं मतं तत उक्तज्ञापके नैवेष्टसिद्धिरिति निष्कर्षोग्रे कृत इति। एतच्च सम पा ५
व धाने अंगाधिकारो निर्दिश्यत इति पक्ष इव स्कृतौ गस्य यत्कार्यमिति निष्कृष्टपक्षे पि तुल्यं। अत एव संज्ञायामुपमान
मिति सूत्रे भाष्यकारैः पक्षद्वयसाधारणे पिनेवोक्तज्ञापन वार्त्तिकं योजितं। प्रकृत सूत्रस्य भाष्ये कैयटयोरुक्त निष्कृ
ष्टपक्षे उक्तदोषप्रसंग एव नास्तीति लभ्यते तत्रैव्यमाशयमभियुक्ता वर्णयंति। ज्ञापकं हि विधेःसामान्यापेक्षं वि
शेषापेक्षं चा तत्र यदाभीह्णीत्यत्र एवं ग्रहणं न यत्र सप्तम्यर्थपक्षे तदंत ग्रहणपक्षे च फलभेदस्तत्रैवेसौ वयं सप्त
म्यस्तदंतस सप्तम्य इति ज्ञाप्यते। यथाभीह्णीत्यत्रैव पूर्वं ग्रहणभावे तदंतस्य कार्यित्वे प्रत्ययांतानां भ्यादीनामुदात्तत्वं
स्य लोपत्यय परिभाषया प्रत्ययांतस्यैवोदात्तः स्यात् सप्तम्यर्थाश्रयणे तु पितमपदाद्यभ्यादीनामेवोदात्तः स्यादि
ति स्पष्टः फलभेदः। तथोपोत्तमं रितीत्यत्र न्यत्तरस्यामित्यत्रापि तद्यादिर्निति पषष्ठि मषोः सर्वनाम स्थान इत्या श्रि ९

५स्यादितीति । तथा च प्रत्ययान्तस्येदं कार्यं न तु प्रत्ययस्येति प्रत्ययलक्षणं स्यादेवेति भावः । कामचारादिति । तथा च शब्दस्वरूपं तस्य विशेषणं न तु तद्युतः शब्दस्वरूपस्येति कृतस्य तस्येति सूत्रे तदन्तस्य कार्यिता भावात्सुप्प्रत्ययस्यैव तु कार्यित्वात् प्रत्ययलक्षणं न भवतीति भावः । =५

दोतु नास्ति फलभेदः । तत्रान्तरङ्गत्वस्य द्विकार्यत्वे प्रवृत्त्या एदेरेवोदात्तत्वं स्निहादिपर्वस्यापि कार्यित्वात्तस्यैवेति । यथा च तत्र सोव
येइत्यस्याप्रवृत्त्या तदन्ताकार्यित्वमुक्तदोषस्याप्रसङ्ग एवेति । संज्ञायामुपमानमिति सूत्रे भाष्ये केयटादिग्रन्थात्स्व
सामान्यापेक्षं ज्ञापकमाश्रित्य योजयितव्याः इति । अत्र य इत्यत्र तु स्वरो न भवति लुकि कृते कार्यिणोऽभावात् । प्रत्य
यलक्षणं स्यादस्य कार्यं तत्प्रत्ययलोपेपि भवति । ननु प्रत्ययस्यैव कार्यं तदपि न च प्रत्ययग्रहणपरिभाष
वि यातदन्तग्रहणं स्यादिति वाच्यं । एवं धिरिति सूत्रे गोवत्सादिभस्यैवक्ष्यमाणत्वात् । विशेष्यविशेषणभावे वैकामचारात् ।
नन्वेवमपि स्थानिवत्सूत्रे णस्यादेवोदात्तेति चेन्न लोपस्याभावरूपतया तदीयान्तस्यानुदात्तत्वायाश्च वाधात् । अ
त एव हि अभूदित्यादौ लुप्तस्य सिचो नेडागमभावस्याभावो वं संभवतीति भाष्यमतेऽनल्विधाविति निषेधात् । किं
जादौ नातुने ङुरी तीशिनषेधो प्रसक्तीति दिक्कु । वस्तुतो यदागमितिव्याख्यानाद्राजपुरुषइत्यादावपि निवाधाभस
ज्ञायानिषेधेनाल्लोपाभावात् । सुवन्तेल प्रयुक्तेपदसज्ञयानलोपाच्च । तथा अरहरदरातीत्यत्र रेफोपि सिद्धः । असु
पीतिनिषेधोहि वस्तुतोङ्गस्यकार्यमितिनेह प्रवर्त्तते । अङ्गाधिकारनिर्देशे तु प्रवर्त्तेतासौ । अत एव हो रविधावि
तिवचनमारभ्यते । न चासुपीतिवचनसामर्थ्यात्प्रत्ययलक्षणेनासुपीति निषेधो नेति वाच्यं । दीर्घादानि दा पइत्या
दौ हल्ङ्यादिलोपे रेफापत्तेः । एनासुपीतिपर्युदासमाश्रित्याह रदरातीत्यत्र दाधातोः सुबिन्नस्य सत्वाडे पइत्य यव:१

= अत एवेति । लुकि कृते कार्यिलोपाभावात्प्रत्ययलक्षणाभावादेवेत्यर्थः । कार्यित्वं चात्र न स्थानित्वं किं तु कार्यं प्रत्यन्वं धर्ममात्रमित्यागमोपि स्यादित्यत आह । नहीति ।
इदं च प्रत्ययलक्षणसूत्रे स्पष्टमर्थमितिवार्तिकमतं नत्वमौ । किम [illegible] मते नाह । भाष्यमत इति । =६

कृ: ४ पिकल्पनमपास्तं। दीर्घो हानिरा द्व्यस्त्यात्रानिप्रसंगात्तथपि रुत्वरत्वयोरसिद्धत्वात्पूर्वेन लोपेकृते ऽकारस्यैव रुत्व
रत्वे प्राप्नुतस्तथापि रुत्वरत्वयोर्विधेयत्वेन लोपो नेष्यते। रुत्वरत्वोभयाभावसामर्थ्यात्। नश्च कारस्य रोरे वा विशेषो
स्तीति दिक्। न च सत्त्वपुंहो न लोपनिषेधाद्धे अहर्गण्युहेदीर्घो हो निरा धेत्य सत्रं चरितार्थं त। एवमपि रूपरात्रीति रुत्वस्य वै
यर्थ्यापत्तेः। नन्वेवं तदपि संबोधने चरितार्थमिति चेत्सत्यं अहः नित्यत्वावर्ष एकेन नलोपाभावनिपातनात्सिद्धमिति दिक्
।स्यादेतत्। परमवाचा परमगोदुहा परमलिहा परमदंडिना परमदिवा परमकुमार्येत्यत्रांतवर्तिनीं विभक्तिमाश्रित्य उत्त
रखंडस्य पदसंज्ञा स्यात्। तेन श्चचोः कुः। दादेर्धातोर्घः। होढः। नलोपः प्रातिपदिकांतस्य। दिव उत्। इको सवर्णाशाकल्य
स्य ह्रस्वश्च इत्येते विधयः प्रसज्येरन्। न च भसंज्ञया पदसंज्ञा बाधः भिन्नावधिकत्वात्। भसंज्ञा हि समस्तस्य प्राप्ता। पदसं
ज्ञा तूत्तरखंडस्य। अत्र भाष्यं। भसंज्ञा सूत्रे सुपि ङंतं पदमिति सूत्रात्सुबंतमित्यनुवर्त्तनीयं सूत्रार्थस्तु यजादावसर्वे तदर्थं ५
[redacted]नामस्थाने परे यस्मात्स प्रत्ययविधिस्तदादि भं तत्पूर्वं समुदायो भसंज्ञो भवति तदवयव भं सुबंतं च यद्यपि हि तद
पि भसंज्ञं स्यात् यजादावनंतरमिति इह च समुदायस्य भसंज्ञा प्रधानशिष्टावयवस्य त्वन्वाचयशिष्टा के तु क्यङ्स
लोपश्चेति वचनात्तेन राज्ञ इत्यादौ सुबंतावयवाभावेपि भवतीति सुबंतावयवस्यैव तु तस्य समुदायस्य चेत्युभयोरपि भव
तीति विवेकः। नन्वेवमपि परमवाचो परमवाच इत्यादौ भत्वाभावात् पदकार्यं स्यादेवेति चेन्न। तत्र भत्वाभावेपि अ

सर्वनामस्थानेइति परसंज्ञानिषेधात्स्वादिष्व सर्वनामस्थानइत्यत्रापिहिसुबंतमित्यनुवर्त्ततो प्रसज्य प्रतिषेधश्चा
ति यंतत्सामर्थ्यादन्तस्यविधिर्वेस्यायो नाम्नी पतेतस्य मर्थः। सर्वना[redacted]मस्थाने परतः पूर्वः समुदायः पदं न स्यात्ता स२
स्वयवभंजं च पदं न स्यादिति। तत्र समुदायस्य स्वादिष्विति प्राप्ताऽवयवस्यतु सुबंतमिति प्राप्तापदसंज्ञा नेनवि
षिद्धेति परमवाचावित्यादि सिद्धं। नन्वेवं सुवाक् सुराजेत्यादौ कुत्वादिनस्यात्। सावपि समुदायस्यावयवस्य च प्रा
प्नयोरुभयोरपि परसंज्ञयो निषेधादिति चेन्नात्र सर्वनामस्थानइत्यत्रोत्तरसूत्राच्चीत्यपकृष्य यजादौ सर्वनाम
प स्थानेउभयविधपरसंज्ञानिषेधात्। सोतुहि विधापि परसंज्ञा भवत्येवा नन्वेवं शून्यमारोसो पूर्वस्य पदसंज्ञास्या
दिति चेन्न इष्टापत्तेः। नन्वेवमेचो प्रगृह्य स्यादूराद्धूते पूर्वस्याद्धे स्यादुत्तरस्येदुतावितिसूत्रे भद्रं करोषि गौरित्यत्राति
ति [redacted] प्रसंगवारयितुपदांतग्रहणां कर्त्तव्यमितिवार्त्तिकं कृत्वा वक्ष्यमाणां विरुध्येत क्रियमाणोपि पदांग्रहणो दोषजाद न
वस्थ्यादिति चेन्न तत्रांतग्रहणमात्रं कृत्वा वाक्यस्यटेरित्यतो वाक्यग्रहणमनुवर्त्यवाक्यांतस्येति व्याख्यानसं त२
भवात् तत्रैवंसमासचरमभागस्यपदसंज्ञा यजादौ कापि नास्तीति स्थितं क चिन्निषेधो क्व चिन्तु भत्वेन बाध इति
विशेषः। नन्वेवं द्वारान्मुक्तमित्यादावलुङ् न स्यात् जहोतापोजारावित्यत्राश्वानङ् नु स्यात् उत्तर पदेत्त द्विधा नादिति चेन्न
उत्तरपदस्याद्वस्यसमासोत्तरावयवेह तया पदसंज्ञा विरहेपि तत्प्रवृत्तेः। सर्वोतिस्यचेयं रूढिः। जेन हेतु पोतने छोड्डा
धा३
दै८

9

दिसग२

कृः

त्तारइत्यत्रमध्यमानामुत्तरपदत्वाभावात्तत्पूर्वस्यानङ्गेति दिक्त्वेवंदाधिसेचेदृशधिसेचइत्यत्रसात्पदाद्योरितिषत्व
८२ निषेधोनस्यादितिचेन्न। पदादेरिःपदांतस्यषत्वनेतिव्याख्यानात्। नन्वेवंरामेषुहरिषुचित्यत्रापिनिषेधःस्यादिति वाच्यं सा
८३ [redacted]दावित्तियापदसंज्ञानामुपजीव्यपदेनेतिनिषेधाप्रवृत्तेः। एतच्चसात्प्रतिषेधेनज्ञाप्यतेयुक्तंचपदादेर्न ८२
षेधव्याख्यानंतत्पदस्यादेरिति। तथासतिगतिकारकोपपदानामितिसूत्रयत्नैः प्रागेवसमासेदधिसेगित्याद्यौ
षत्वस्यदुर्वारत्वापत्तेः। नन्वेवमपिबहुसेचौ बहुसेचइत्यत्रषत्वंस्यादेव बहुचोऽपदत्वेनप्रतिषेधाप्राप्तेरितिचेन्न
। सापेक्षत्वनमेवेहकर्तृत्वंबहुच्पूर्वस्येति। अत्रायंस्वत्रन्यासः सातेसःषत्वंनस्यात्। ततःबहुच्पदाभ्यामाभ्यामु
मे त्तरस्यसस्यषत्वंनस्यात्। आदिग्रहणानकर्त्तव्यं। तस्मादितिपुरस्यत्येवसिद्धेः। तदिदंबहुज्ग्रहणमादिग्रहणेननिमात्तव्या
मिति। वार्त्तिकेतुउत्तरपदत्वेचापदादिविधावितिवचनेनैवपरमवाचेत्यादेः साधितत्वात्तत्रस्यसमाप्तोत्तरभागस्यपद
त्वेकर्तव्येलुमतालुप्तेप्रत्ययलक्षणंनस्यात्। अतोनकृत्वाहि। पदादिविधौतुप्रत्ययलक्षणंस्यादेवतेनषत्वनिषेधा
द्दधिसेचइत्यादिसिद्धिः। अस्मिंश्चपक्षेप्राक्सुवुत्पत्तेःसमासोत्रनाभ्युपगन्तव्यः। धनक्रीतेत्यादिसिद्धयेतस्या प
मे२ नित्यत्वायावक्ष्यमाणत्वात्कैयटस्त्वाह। दधिसेचावित्तिविग्रहेषष्ठीतिसमासः। नत्वयमुपपदसमासः। सोपप
पदात्तुविच्चनास्तिअनभिधानात्। अतोदधिसेचावित्यादिनभवत्येवेति। अस्मिंस्तुपिपक्षेवबहुच्पूर्वस्येतिव

स्वनं कर्त्तव्यमेवं कृते हि बहु त्वविशिष्टस्यार्थवत्वेन प्रातिपदिकत्वे सुपो लुकि च कृते पुनर्विशिष्टात्सुवन्तरमुत्पद्यत इ
त्यर्थवत्सूत्रे वक्ष्यते। तन्नान्तर्वर्तिनीं विभक्तिमाश्रित्य मेपदत्वं तत्कुत्वादेः कर्त्तव्ये मा भूत् तत्प्रतिषेधस्य वचनस्य चायास्तादि
ति। अवायति कर्षः। एवं स्वरूपस्य वा स्थित्वाद तु पदत्वे च पदादिविधौ वक्तव्यत्वं स्यात्। जिपा पदादिविधावेव प्रत्ययल
लक्षणं भवति न तु परांगविधाविति नियमार्थं चेदं वचनद्वयमिति व्याख्येयं। एवं च न तकर्त्तव्य इति लाघवं। आग्म
सं ५ न्पक्षे सोपदेनास्ति। प्रागुक्तकुत्सप्रभावात्। तदेतत्पक्षद्वयमभिप्रेत्य हलड्याब्भ्य इति सूत्रे भाष्यकारेहके स्तावपिप सु ५
न दं भवति। एवमप्युभ यतः पाशा रज्जुरिति। ननु आगाधिकारस्य ह्रणपक्षे वस्तुतो गस्येति पक्षे च अभूव न्निसत्य च बु
सुप्राप्नोतीति चेत् सत्यं। आनइति नियमं भवति। ननु देवदत्तेयाजपांच कारे त्यत्र लुक्बाधिता परत्वान्नित्यत्वात् दि
षु कृतेषु आमइति तेषां लुकि प्रत्ययलक्षणेन तिङन्तत्वादामन्तस्य निघातः स्यात् परस्य च न स्यादिति चेत् सत्यं। आलाव नः ५
स्थायामेवयेन नाप्राप्ति न्या येन तिवादीन्बाधित्वा लुक्प्रवृत्तेः। तदुक्तं। आमि लिलोपात्तस्य चानिघातस्तस्मा
च्चेति घातइति। ननु देवदत्तो युष्मत्सुतइत्यादौ षष्ठ्यां तस्य विधीयमानायुष्मदस्मदा देशाः प्राप्नुवन्तीति चेत्
सत्यं। स्यग्रहणान्न भवति। न च विभक्तौ परतः पूर्वभागमात्रस्य नामभ। किंतु विभक्तिविशिष्टस्येत्यत्र दर्थस्याग्र
हणं स्यादिति वाच्यं। षष्ठी चतुर्थी द्वितीयानामिति निर्देशोपिगतार्थत्वात्। सर्वस्य पदस्येत्यनुवृत्तेश्च। तस्मादि

10.

भक्तिलोपे कृते मामृदित्येतत्स्वर्थमेवस्य ग्रहणं। अवस्थानं हि अयमाणस्यैव संभवति। यद्वा नित्ष्ठजिरहानोप
७२ न्ते। यथा। समयोतिष्ठ सुग्रीवेति। समयं मा हासीरित्यर्थः। तथा चापरिपूर्णविभक्तिकयोर्द्वयोरप्याश्रयमौ विभ ६८२
७३ क्तिलस्य स्पष्टमेव लभ्यते। इदं त्वव शिष्यते। वस्तुतो गस्येति सिद्धे चिणो लुगिति तलोपे कृते हनि णिङादेशा न स्युः। अ
वधि भवतां हस्युः। अगाधि भवतां ग्रामः। अध्यगायि भवतानुवाक इति। लुङि परतोऽध्येते विधीयते इति चेत्तामेवाल
ङि यदा हि धातुकं तन्नेह निणिङादेशानां विधानात्। तस्मादुक्तत्वोगस्येति पक्षो निर्दोष इति स्थितं। अचोन्त्यादि टि
७६ । अच इति निर्धारणे षष्ठी जातौ चैकवचनं। अचां मध्ये योन्त्यस्तदादिशब्दरूपं टिसंज्ञं स्यात्। टि प्रदेशाः षित आ
६७ त्मनेपदानां टेरेत्यादयः। पचते पचेते इत्यादि। अंते भवोन्त्यः। दिगादित्वाद्यत्। अन्त्य आदिर्यस्येति बहुव्रीहिः। नि
त्यसापेक्षत्वात्समासः। अलोन्त्यात्पूर्व उपधा ॥ अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात्। उपधागुणः भ्वेतातीत्यो
ताति। वद्धेतेत्यादि। ननु पूर्वस्याविशेषितत्वात् षष्ठा सिधानोः शा इति समुदायस्य संज्ञा स्यादिति चेन्न। अलस्तन्नैवं
शास इदङ्हलोरिति शिशा इति समुदायस्य स्यादिति वाच्यं। अलोन्त्यपरिभाषया इष्टसिद्धेः। स्यादेतत्। नानर्थके
२२ लोन्त्यविधिरनभ्यासविकारेष्विति निषेधः प्राप्नोति इह च विभक्तीत्यत्र भ आमित्यन्त्यस्य यथा स्यादित्येतदर्थं
मनभ्यासविकारेष्विति उक्तं। विकारो नाम वर्णात्मक आदेशः। अत एवादेरित्यत्र लोपः सर्वादेश एव भवतीति। राम

१०

अत्रोच्यते नतावदेषापरिभाषासूत्रकृतः संमता तस्यालोपइतिसूत्रे त्रिदुङूतं सर्वलोपार्थं तस्यग्रहणात् नापिभाष्य
कारस्य संमता एतत्प्रयोजनानामन्यथोपपन्नेर्भाष्येउक्तत्वात् तथाहि अग्यक्तानुकरणस्येति तावदंत्यादेशो न भवति ना
म्रेडितस्यांत्यस्य तुवेति ज्ञापकात् इतरथाह्याम्रेडितस्य वेत्येवब्रूयात् घसोरेद्धावित्यत्रापि लोपोयीति प्रकृते पुन
र्लोपग्रहणसामर्थ्यात् सर्वादेशः तथाचेत्थं सूत्रन्यासः घोरभ्यासस्यलोपः लोपश्शेतरस्यातु छत्या सर्वलोपः
स्यात् अस्तेश्चेत् अस्तेर्घोश्चएद्भवतिहाविति अथवालोपश्शइतिछेदः संज्ञायां कृतोनुबंधः संज्ञिनि फलति यथा
ऊमुटि भाष्येतु द्विशकारकोनिर्देशः शइत्युक्ते तत्र लोपइतिभिन्नंपदं शइत्यस्यचउपदेशएवेत्संज्ञातत्फलंतु प्रयोगेस
र्वेत्रानुबंधानांकाकादिवदनवयवीभूतेव्याववर्तकत्वादिभावः अस्मिन्नपिपक्षे हलिपरे यः संयोगस्तदरित्वात्
लोपे एकशकारकस्यपाठः सुवचः स्यष्टार्थं अनउपधालोपिन इत्यादावकारस्येवेदापिसकालोपोमास्त्विति तु
भाष्याशयः आभ्यामित्यादौ हलिलोपइतिसूत्रेण अककारस्य इदमइदो विधीयमानो लोपो पितस्यसस्यस्यादिति
चेत्र अनाप्यक इतिसूत्रादनित्यनुकर्ष्यते स्यहलीतिसप्तम्याषष्ठी प्रकल्प्य अनएवलोपाविधानात् तथाचतत्रालो
त्यपरिभाषया नकारलोपे अतोगुणे इति पररूपे च कृते आभ्यामेषामित्यादिसिद्धं अत्रलोपोभ्यासस्येतिसूत्रेपि
अत्र अभ्यासस्याश्रयेनतु तदेकदेशो इति व्याख्यानात् ग्रहणसामर्थ्यात्सर्वलोपः यद्यपि सनीत्यपेक्षितं द्वे दो

तिर्दे

विषयोप्यपेक्षितः मुख्यो धर्मस्तस्यानुलोमेति। मुमुक्षतिनामित्राद्विधावृत्त्य १

षि

क्रः घावित्यादिवारणाय। सा सूत्रे इति डिज्झ पक्षे जीपे तद्वारणाय। प्रकृत्यर्थोपि पक्षजीत्यादिवारणार्थं तथापीदं सर्वमनुवृत्त्ये
वसुलभमिति। सर्वलोपार्थमेवात्र ग्रहणं बोध्यं। नन्वेवमपि विभाषा भवद्भगवद् वतामेघावस्येति वात्तिकेन विधीयमा
नस्रोकारोंत्यस्य स्यादिति चेन्न। वस्येति सिद्धे अवस्येति गुरुकरणसामर्थ्यात्तत्सर्वादेशसिद्धेः। तस्मान्नानर्थकं इति प
रिभाषा निःफला सूत्र भाष्यासंमता चेति स्थितं। एवं च शासेः शासहस्रो पधाले पिशिष्टइत्यादि सिध्यति। संयोगोपध
ति ग्रहणं कृत्रर्थमित्यपरि व्यवहारः आस्मिन्नपक्षे संग च्छंते इरिकृ। यङ्। अव व्यवधिमड्डा वः सजातीयनामेवेत्युत्सर्गः। ले
के ह्यमीषां ब्राह्मणानामत्यास्य वंमानयेत्युक्ते एक एवांत्यपारव्यवहितः पूर्वं आनीयते न समुदायः। एवं चेहाप्यलः अ
मध् व्यवहितः पूर्वोलिवसंज्ञी नतु समुदायः। तच्च ■ व्यवहितोलः संयोगोपधव्यवहारस्तु भाक्तः। अवयवधर्मस्य समुदायेऽप व५
चारात्। एवं स्थिते अल इति जसन्तमपि सुवचं। जात्याख्यायामिति वचनात्। एवं स्यपि जसंतं। अंत्योप्यलेव साजात्या ल्लभ्या ६४
स्पूर्व ४ तो। यङ्। अल इति निर्द्धारणे षष्ठी। जातावेकवचनं। अलामध्ये त्यो इत्यर्थः। तथा चेहालोतिज सऽसिद्धेः स्वेति पक्षत्रय षि३
मपि स्थितं॥ ॥तस्मिन्निति निर्दिष्टे पूर्वस्य॥ ॥सप्तमी निर्देशेषु पूर्वस्यैव कार्यं स्यान्नतु सर्वादिष्टे अव्यवहितोच्चारितेसतीत्य
र्थः। निश्लिष्टानंतर्ये दिशि रुच्चारणक्रियः। निरंतरं दिष्टो निर्दिष्टः। नियमार्थमिदं सूत्रं तेनाय्यादिः इकोयणचीत्यत्र चीति यस
च भावेन भावलक्षणमिति सप्तमी॥ अश्रूयमाणा क्रियत्वाद्वांतरगस्यास्यार्थस्यलाभः। तेनाचि सति यण् एरेभकीत्यर्थः। य राम

२१

ह्वागंगायं अयोषइतिवर्द्दो पश्लेषिकेऽधिकरणेसप्तमी। तत्र सत्त्वं परस्यैव पूर्वस्यापि संभवति। एवमुपश्लेषोऽपि तत्र युगपदेक
स्य कार्यं स्यात्। निमित्तत्वयोः संभवाद्दध्युदकं मध्विदमित्यत्रेकारोकारयोः पर्यायेण यणः प्राप्तः पूर्वस्यैवेति नियम्यते। त
था अग्निरत्रेत्यव्यवहितस्यापि प्राप्तः। अनन्तरस्यैवेति नियम्यते। ननु गावित्ययमाहेत्यादौ स्वरूपपदार्थकत्वादिति
शब्दः करोतीति श्रेयापि। एवं च तस्मिन्नणीत्यत्रैवेयं परिभाषा प्रवर्त्तेत। आस्तिदित्यत्र व्यवच्छेद्यं हे यौष्माकीणाऽस्मभ्यं
दे हि हे आस्माकीनयुष्मभ्यं ददामीत्यादौ रवणाभ्यां परस्याप्यादेशप्रसंगसत्त्वात्। तस्यां इति करणाः पदार्थो विपर्यास
कृत। लोके अर्थपरत्वाऽऽ औत्सर्गिकत्वात्तत्र शब्दपरतां करोति। शास्त्रे तु विपरीतं। किं चायदित्तस्मिन्नणीत्यत्रैवेयं प्रव
र्त्तेत न हि तत्रैव पूर्वग्रहणं कुर्यात्। तस्मान्नेदं तस्मिन्नित्यनुकरणं। किंतु अचि हलीत्यादिसकलविशेषसंग्रहार्थः स्वतंत्र
स्य सर्वनाम्नायं निर्देशः। तस्यापत्यं तत्र भव इत्यादिवत्। तस्मादित्युत्तरस्य पंचमीनिर्देशे परतः स्यैव कार्यं स्यान्न त्वाव्यव
हितत्वस्य चारिते। तिङ्ङतिङः। अग्निमीले इह न भवति। ईले अग्निं इह कारकविभक्तेरसंभवाद्दिग्योगलक्षणा पंचमी।
तत्र दिक्शब्दोऽध्याहृियमाणः उत्तरशब्द एवं पूर्वशब्दोऽप्यविशेषादध्याहृियेतोऽव्यवहितोऽपि चुग स्येत। तथा च उत्सस्या
त्स्यत्राप्युदः स्थास्तंभोरित्यस्य प्रसंगः। तदेवं पूर्वसूत्रमेतत्सूत्रं चेति द्वयमपि नियमार्थमिति स्थितं। तत याच वान्ने
कं। तस्मिंस्तस्मादिति पूर्वोत्तरयोर्योगाविशेषान्नियमार्थं वचनं दध्युदकं पचत्योदनमिति। इह परत्तस्मादिति स्व

कः तंत्रस्य सर्वनाम्नो निर्देशं प्राग्वृत्तानत्वनुकरणं। तथा हि सतिय घपि तस्मात्तु इ हि हलइत्यन्नात अत्रादेशिति दीर्घो स्पूर्वस्यांग
न२ स्यासंभवात् प्रयोजनाभावान्नैतत्परिभाषोपस्थितिर् इति सौपित्तस्मा छ सो नः पुंसि [redacted] तस्मात्तु ङ्वीति योग
ह्ये स्यात् ङ्त्रु रत अनुपलभतेऽगो रन स्वइत्यादेर्व्यो वर्ण्यस्य तत्र संभवादिति दिक्॥ स्यादेतत्॥ एतत्सूत्रं नियमार्थमस्तु
म ।पूर्वसूत्रमधि [redacted] औपश्लेषिक सप्तमीपक्षे नियामकं स्त्व। सप्तमी पक्षे तु। नियामकत्वमयुक्तं षा[redacted] भाष्यकैयट वि
त रोधात्। यथा हि। आल्लोप इत्यत्र भाष्ये नैषा परसप्तमीका तर्हि सत्सप्तमी। किं तिसत्तीति। तथा तत्रैव कैयटः। क थं पुनः स
र भवं पौपर्वसप्तम्यां सत्सप्तम्याश्रयितुं नायये षे वाक्याध्याहारादेषः। किं तिसत्तीत्येवं हि विज्ञायमाने पौर्वापर्या ना
श्रयणान्नास्ति तस्मिन्नितिपरस्याः परिभाषा या उपस्थानं यदत्वौपश्लेषिके धिकरणे सप्तमीति दा किं प [redacted] मा
य [redacted] वस्य कर्थमथ परस्येत्यनिमि नियमार्थं परिभाषोपस्थानमिति। अत्रोच्यते। षा षष्ठ ग्रंथस्य प्रकृ य
तमात्रपरत्वाद विरोधः। तथा हि। आत्रलोप इति सूत्रे शाकारवतो गृह्णां मा स्तुनादि ये वा स्त्विति प्रश्ने नंदंना दावतिप्रस मा४
दि गः स्युन्नरिति। आ नैतामित्यस्यानुकर्षणं तु हिनस्तीति नस्यात्। ततः किं जीत्यनुवर्त्यं श्रममेव क्रियमाश्रित्य हिनस्तीत्यत्र
लोपो स्त्व इति शंक्यते। यस्त्विा स्याम वस्थायां तस्मिन्निति परिभाषोपतिष्ठेत तदा नैमानादोचौ नशोऽङित्वाल्लोपः प्रवर्त्तेत ८२
।श्रमः शिस्त्करणं चानर्थकं स्यात्। तद्धि शित्वात्सार्व धातुकत्वात् ङित्त्वमिममेवाश्रित्य हिनस्तीत्यत्र न लोपे क्रियमाणे राम

नर नेर नर

सार्थकं न त्वन्यथा । तन्वार्धधातुकसंज्ञानिवृत्त्याशित्वं सार्थकं तत्स्याद्धि स्यात्यां भ्रंक्कि श्रेन क्तेत्यतो लोपः स्यात् । ह एगद्धिमि तु
नीत्यत्र गुणः स्यात् । ग. शोढीतीडागमः स्यात् । नेड्वशीति तु प्रवर्त्तेत् अकृत्वादिति चेन्न । अमः पूर्वभागस्यानेगत्ययोक्तविधी
नामप्राप्तेः । कथमनं गतेति चेत् अस्यं प्रत्ययाविधौ यत्पंचमी निर्दिष्टं धातोः प्रातिपदिकाद्यादित्तदादित्तस्मिन्प्रत्यये पर रूादिद्र
नि तेगमितिहि सूत्रार्थः । इह तु यत्पंचमी दिष्टं रुधादिभ्य इतिनास्मात्परस्य प्रत्ययः । यस्मात्त्वपरः पूर्वभागान्नासौ तस्मि
न्विधीयमाने पंचमी निर्दिष्टः । अत एव भन क्तौ त्यादावतो दीर्घो यञीति न प्रवर्त्तते । नच श्नसोर्ल्लोप इत्यत्र विशेषणार्थे २
प शित्करणं स्यादिति वाच्यं । नसोर्ल्लोपः स्युक्ते पिदोषाभावात् । नन्वेवं नोत्तम स्योर्ग्रहणं स्यात् । तथा च कनेयेड्लुकि च कोत्त
इत्यत्रापि स्यादिति चेन्न । सिद्धांते पिश्नप्रत्ययसांतयोर्ग्रहणापत्तौ वस्त इत्यादावतिप्रसंगः स्यात् । साहेच यांत्प्रत्यय नर्ये
सु धात्वोर्ग्रहणमिति तुल्यं । ननु नसोर ल्लोपइच्छमाने यत्र न प्रत्ययस्य क्ङित्यानंतरं वभाविष्यति यत्न इक्वरन्तयत्नाः
न पामत्तः शत्ता । मैवं । अस्तु वर्तमाने सार्वधातुकग्रहणे न प्रत्ययो वि शेष्यते तथा च विध्यसंस्पर्शो निर्दिष्टपरिभाषानुप
स्थितौ निमित्तस्स प्तमी सार्वधातुकनिमित्तस्य न प्रत्ययस्यास्तेश्चाल्लोपः क्ङित्यनंतर इति । ननु चाजतु त्सार्वधातुक इति
सूत्रे सार्वधातुकग्रहणं प्रत्याख्यातमिति चेन्न । सति शिष्ट्वे प्रत्याख्यानात् । तदेवं श्नमः शित्वसामर्थ्यात् कृतमिति सत्स्वप्र
स्थामापि परिभाषा नोपतिष्ठत इति स्थितं । पूर्वं क्ष्लादर्नास्य यात्तयोक्तमिति वा वर्णानीयं इह सूत्रद्वये षष्ठी प्रक्लृप्तिपक्षो

नर पर

13 ने

पिमाष्येस्यित्तः। तथा हि। षष्ठीस्थाने योगेतिसूत्रात्षष्ठीत्यनुवर्त्ततेसप्तम्यर्थोनिर्देशे एवं स्यादव्यवहितस्य षष्ठीस्था त
पंचम्यर्थनिर्देशेउत्तरस्याव्यवहितस्यषष्ठीस्यादितितत्रइकोयणचीत्यादौसत्रएवषष्ठीश्रवणात्तोषष्ठीमनुत्पूर्वस्या
नंतरस्यैषानतूत्तरस्यनवापूर्वस्यापि [redacted] व्यवहितस्येत्येतावन्मात्रमुच्यते। आनेमुगित्यादौतुषष्ठ्याअश्रवणात्स्थानि
प्रकल्प्यत इति विशेषः। साच्चानियतयोगत्वात्स्थानषष्ठीयस्यस्थानषष्ठीतस्यैवकार्यंनियमइति सोप्यर्थात्सिध्यति
सं १५ [redacted] यत्वमत्प्रभयोरितिदेशात्तत्रोभयत्रावचनप्रकल्पकोटित्वात्तितिभिन्नत्वयोरेकत्रयुगपदसंभवात्ज्ञापकाच्च तथाचैकः
म॰मे॰मै॰ प्र८ः६ पूर्वपरयोरितिसूत्रद्वयप्रमाणात्वाद्वेभवेत्तांप्रकल्पिकेषष्ठ्या [redacted] विभक्तौ [redacted] तेनात्रज्ञापनार्थत्वमास्थितमितिन
